Occasionally explanatory remarks are inserted between the verses, in which the author speaks of himself in the third person, as to what the succeeding verses are intended to show.

It ends:

ये शृण्वन्ति पठन्ति चानिशमिदं भक्तिप्रबोधामृतं
ये वा साधु निरूपयन्ति भगवद्भक्तेषु निर्मत्सराः ।
ते निर्धूय भवान्धकारमखिलं भक्तिप्रबोधामृतं
सान्द्रानन्दमनावृतं तदमृतं विन्दन्ति विष्णोः पदं ॥ १९ ॥
इति श्रीहरिभक्तिकल्पलतिकायां चतुर्दशस्तवकः ॥ १४ ॥
श्रीकृष्णसरस्वतीविरचितो ग्रन्थः संपूर्णः ॥

[H. T. Colebrooke.]

## 2509.

**827b.** Foll. 18; size 12⅞ in. by 5 in.; good, modern Bengālī handwriting; seven lines in a page.

*Bhaktilaharī*, apparently a work of a similar nature, by *Maṇirāma*. This MS. contains only the fourth chapter (*viśvasamuddeśa-taraṅga*), explaining the evolution of the universe, with the heaven of *Vishṇu* as the crowning of the edifice. It begins:

गुरुं विश्वेश्वरं कृष्णं प्रणिपत्य प्रणीयते ।
मणिरामेण विश्वस्य समुद्देशो यथामति ॥ १ ॥
नित्यस्थलजलादीनां तेजसा पञ्चमस्य च ।
सुतानध्वनिना सार्धं ज्योतिरुत्पद्यते महत् ॥ २ ॥
उभाभ्यां अडितीभूय व्याप विष्टो दिशो दश ।
विरेजे सूक्ष्मरूपेण विराट् तेन निगद्यते ॥ ३ ॥
शब्दस्वरूपा प्रकृतिर्ज्योतीरूपस्तु पूरुषः ।
प्रकृतेः समवायाद्वै तेजसश्चोपपद्यते ॥ ४ ॥
तेजोयोगाद्विभिन्नः सन् प्राज्ञः साक्षी निरञ्जनः ।
अव्याहताद्यप्रकृतिराद्या सृष्टिविधायिनी ॥ ५ ॥
जिह्वारमणयोगात्सा गुणाः(?r.गुणान्) सत्त्वं रजस्तमः ।
पञ्चभूतानीन्द्रियाणि संभूतान्यसृजन्मुहुः ॥ ६ ॥
गुणास्तन्मात्रसहितैः पञ्चभूतैः समन्ततः ।
इच्छाज्ञानक्रियाभिस्ते ब्रह्माद्यं प्रकृता जगः (!) ॥ ७ ॥

It ends:

ब्रह्मलोकश्च वैकुण्ठः शिवलोकस्ततः परः ।
शक्तिलोकस्तु गोलोको महामायाभिधः परः ॥ २३३ ॥
गुरुलोकः सप्तविधः सत्यलोकः प्रकीर्तितः ।
गोलोकाद्गुरुलोकान्तं पञ्चाशत्कोटियोजनं ॥ २३४ ॥
इति विश्वसमुद्देशः संक्षेपात्कथितो मया ।
विस्तरेण सहस्रास्यो वक्तुं नैव क्षमो भवेत् ॥ २३५ ॥
इति भक्तिलहर्यां विश्वसमुद्देशो नाम चतुर्थस्तरङ्गः ॥

[H. T. Colebrooke.]

## 2510.

**939b.** Foll. 10; size 12¾ in. by 4¼ in.; fair, modern Bengalī handwriting; eight lines in a page.

*Gauragaṇoddeśadīpikā*, or *Gaurāṅgagaṇoddeśadīpikā*, an account of the chief disciples of *Caitanya* (*Gaura, Gaurāṅga*), and the reformer's own mythic succession; composed, in 1544 A.D., by *Paramānandadāsa*, usually called *Kavikarṇapūra*, son of *Śivānanda Sena*; and pupil of *Śrīnātha*.

It begins: श्रीचैतन्यचन्द्राय नमः ॥

यः श्रीवृन्दावनभुवि पुरा सच्चिदानन्दसान्द्रो
गौराङ्गीभिः सदृशरुचिभिः श्यामधामा ननर्त ।
तासां शश्वद् दृढतरपरीरम्भसंभेदतः किं
गौराङ्गः सन् जयति स नवद्वीपमालम्बमानः ॥ १ ॥

नमस्यामोऽस्यैव प्रियपरिजनान् वत्सलहृदः
प्रभोरद्वैताद्दीनपि जगदघौघक्षयकृतः ।
समानप्रेमाणः समगुणगणास्तुल्यकरुणाः
स्वरूपाद्या येऽमी सरसमधुरास्तानपि नुमः ॥ २ ॥

गुरुं तं श्रीनाथाभिधमवनिदेवान्वयविधुं
नुमो भूपारत्नं भुव इव विभोरस्य दयितं ।
यदा स्वादुन्मीलन्निरवकरवृन्दावनरहः
कथास्वादं लब्ध्वा जगति न जनः क्वापि रमते ॥ ३ ॥

पितरं श्रीशिवानन्दं सेनवंशप्रदीपकं ।
वन्देऽहं परया भक्त्या पार्षदाग्र्यं महाप्रभोः ॥ ४ ॥

ये विख्याताः परीवाराः श्रीचैतन्यमहाप्रभोः ।
नित्यानन्दाद्वैतयोश्च तेषामपि महीयसां ॥

गोपालानां च पूर्वाणि यानि नामानि कानिचित् ।
स्वस्वग्रन्थे स्वरूपाद्यैर्दर्शितान्यादिसूरिभिः ॥

विलोक्यान्यानि साधूनां मथुरौड्रनिवासिनां ।
गौडीयानामपि मुखाद्विशम्य स्वमनीषया ॥

विविच्याम्रेडितः कैश्चित् कश्चिद्यानि लिखाम्यहं ।
नाम्ना श्रीपरमानन्ददासः सेवितशासनः ॥

यद्वत्पुरा कृष्णचन्द्रः पञ्चतत्त्वात्मको ऽपि सन् ।
प्राग्नः प्रकटतां तद्वद्गौरः प्रकटतामियात् ॥

स्वाभिन्नेन युतं तत्त्वं पञ्चतत्त्वमिहोच्यते ।
अन्यथा तदसंबन्धात्तत्त्वं स्याच्चतुष्टयं ॥

तद्भिन्नं यत्तदेवात्र तदभिन्नं विभाव्यते(°तौ Tüb.) ।
यतः स्वशक्त्येच्छयया(स्वेच्छया शक्त्या T.) कृष्णात्दृ·
स्वरूपचरणैरुक्तं पञ्चतत्त्वनिरूपणे । [शतौ गतः ॥
उपाधिभेदात्पञ्चत्वं तत्त्वस्येह प्रदर्श्यते ॥

पञ्चतत्त्वात्मकं कृष्णं भक्तरूपस्वरूपकं ।
भक्तावतारं भक्ताख्यं नमामि भक्तशक्तिकं ॥

अस्य विवृतस्तैस्तैर्यैः स संक्षिप्य विलिख्यते ।
भक्तरूपो गौरचन्द्रो यतोऽसौ नन्दनन्दनः ॥

भक्तस्वरूपनित्यानन्दः (!) विश्वरूपश्च मुख्यकः ।
भक्तावतार आचार्योऽद्वैतो यः श्रीसदाशिवः ॥

भक्ताख्याः श्रीनिवासाद्या यतस्ते भक्तरूपिणः ।
भक्तशक्तिर्द्विजाग्रण्यः श्रीगदाधरमुख्यकः ॥

श्रीमद्विश्वंभराद्वैतनित्यानन्दावधूतकाः ।
अत्र त्रयः समुद्देया विग्रहाः प्रभवश्च ते ॥

एको महाप्रभुर्ज्ञेयः श्रीचैतन्यो दयाम्बुधिः ।
प्रभू द्वौ श्रीयुतौ नित्यानन्दाद्वैतौ महाशयौ ॥

गोस्वामिनश्च विज्ञेयास्ते द्विजश्च गदाधरः ।
पञ्चतत्त्वात्मका एते श्रीनिवासश्च पण्डितः ॥

यदुक्तस्तत्र गोस्वामी श्रीस्वरूपपदाम्बुजैः ।
त्रयो ऽत्र विग्रहाः ज्ञेयाः प्रभवश्चाथ ते त्रयः ॥

एको महाप्रभुर्ज्ञेयो द्वौ प्रभू संमतौ सतां ।
गोस्वामिनश्च चत्वारो वाच्याः प्रथमपुत्रवत् ॥

एषां पार्षदवर्गा ये महान्तः परिकीर्तिताः ।
नित्यानन्दगणाः सर्वे गोपालाश्चोपगोपकाः ॥

एषां संबन्धसंपर्कादुपगोपालसत्तमाः ।
तत्र श्रीमन्नवद्वीपे विश्वंभरसमीपतः ॥

विलसन्ति स्म ते ज्ञेया वैष्णवा हि महत्तमाः ।
नीलाचले च ये ख्यातास्ते हि ज्ञेया महत्तराः ॥

दक्षिणादिदिशां याने यैर्यैः सङ्गो महाप्रभोः ।
ते ते महान्तो मन्तव्याः परे ज्ञेयाः स्वयोग्यतः ॥

अतः स्वरूपचरणैरुक्तं गौरनिरूपणे ।
पञ्चतत्त्वस्य संपर्का ये ये ख्याता महत्तमाः ।
ते ते महान्तो गोपालाः स्थानाच्छ्रेष्ठ्यादिवाचकाः ॥

रसज्ञाः श्रीवृन्दावनमिति यमाहुर्बहुविदो
यमेतं गोलोकं कतिपयजनाः प्राहुरपरे ।
श्वेतद्वीपं प्राहुः परमपि परे व्योम जगदुर्
नवद्वीपः सो ऽयं जयति परमाश्चर्यमहिमा ॥

तस्मिन्नाशमुरीचकार नृहरिर्विश्वंभराख्यं दधत्
तच्चेष्टावशतः समस्तमहतां वासो ऽपि तत्राभवत् ।
तैः सार्धं महती हरेरनु गुणाकारापि लीलाभवत्
तत्रासीज्जगतां मनो ऽपि परमानन्दाय मन्दं यतः ॥

यः सत्ये (ऽ)सितवर्णमादधदसौ श्रीहंसनामाभवत्
त्रेतायां मखभुग्मखाख्य उचितो ऽभूद्रक्तवर्णं दधत् ।
यः श्यामो दधदासवर्णकममुं श्यामं युगे द्वापरे
सो ऽयं गौरविधुर्विभाति कलयन्नानावतारं कलौ ॥

प्रादुर्भूताः कलियुगे चत्वारः सांप्रदायिकाः ।
श्रीमाध्वीरुद्रसनका भव्याः पाद्मे यथा स्मृताः ॥
अतः कलौ भविष्यन्ति चत्वारः संप्रदायिनः ।
श्रीमाध्वीरुद्रसनका वैष्णवाः क्षितिपावनाः ॥
तत्र माध्वीसंप्रदायः प्रस्तावात्परिलिख्यते ।
परव्योमेश्वरस्याभूच्छिष्यो ब्रह्मा जगत्पतिः ॥
तस्य शिष्यो नारदो ऽभूद् व्यासस्तस्याप शिष्यताम् ।
शुको व्यासस्य शिष्यत्वं प्राप्तो ज्ञानावबोधनात् ॥
तस्य शिष्याः प्रशिष्याश्च बहवो भूतले स्थिताः ।
व्यासाल्लब्धकृष्णदीक्षो मध्वाचार्यो महायशाः ॥
चक्रे वेदान् विभज्यासौ संहितां शतदूषणीं ।
निर्गुणाद् ब्रह्मणो यत्र सगुणस्य परिच्छिक्रया ॥
तस्य शिष्यो ऽभवत् पद्मनाभाचार्यो महाशयः ।
तस्य शिष्यो नरहरिस्तच्छिष्यो माधवो द्विजः ॥
पद्मनाभस्तस्य शिष्यो ऽभूत् (!) तच्छिष्यो जयतीर्थकः ।
तस्य शिष्यो ज्ञानसिन्धुस्तस्य शिष्यो महानिधिः ॥
विद्यानिधिस्तस्य शिष्यो राजेन्द्रस्तस्य सेवकः ।
जयधर्मो मुनिस्तस्य शिष्यो ऽभूद् गणमध्यतः ॥
श्रीमद्विष्णुपुरी यस्य भक्तिरत्नावली कृतिः ।
जयधर्मस्य शिष्यो ऽभूद् ब्रह्मण्यः पुरुषोत्तमः ॥
व्यासतीर्थस्तस्य शिष्यो यश्चक्रे विष्णुसंहितां ।
श्रीमाल्लक्ष्मीपतिस्तस्य शिष्यो भक्तिरसाश्रयः ॥
तस्य शिष्यो माधवेन्द्रो यद्धर्मो ऽयं प्रवर्तितः ।
कल्पवृक्षस्यावतारो व्रजधामनि तिष्ठतः ॥
प्रीतप्रेयोवत्सलतोज्ज्वलाख्यफलधारिणः ।
तस्य शिष्यो ऽभवच्छ्रीमानीश्वराख्यपुरी यतिः ॥
कलयामास शृङ्गारं यः शृङ्गारफलात्मकः ।
अद्वैतः कलयामास दाससख्ये फले उभे ॥

श्रीमान् रङ्गपुरीति सङ्ख्यासख्ये यासमाश्रितः ।
ईश्वराख्यपुरीं गौर उररीकृत्य गौरवे ॥
जगदाप्लावयामास प्राकृताप्राकृतात्मकं ।
स्वीकृत्य राधिका भावकान्ती पूर्वसुदुष्करे ॥
अनर्पिताख्यरसाम्भोधौ श्रीनन्दनन्दनो ऽपि सन् ।
आद्यो व्यूहो ऽपि चैतन्यमविशद् यत्परे पुरा ॥
विचुक्षोभ मनस्तस्य दृष्ट्वा गन्धर्वनर्तनं ।
द्वारकास्थो ऽपि भगवानविशच्छ्रीमच्छचीसुतं (!) ॥
नानावतारः सुतरामेककालप्रभावतः ।
यथा श्यामो ऽविशत्कृष्णं भगवन्तं पुरा स्वयं ॥
योगमायाबलादेते तिष्ठन्तो ऽन्यत्र यद्यपि ।
तथापि प्राविशन् गौरे ऽचिन्त्यलक्षणलक्षतः ॥
यथोक्तं व्यासचरणैः प्रभासखण्डमध्यतः ।
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदिति ॥
रघुनाथं प्रविश्यापि यथा तिष्ठति भार्गवः ।
एवं श्रीनारदमुखास्तिष्ठन्तो ऽन्येषु धामसु ॥°

It ends:

श्रीगौराङ्गगणोद्देशदीपिका रचिता मया ।
दीप्यतां परमानन्दसंदोहभक्तवेश्मनि ॥
शाके रसारसमिते मनुनैव युक्ते
ग्रन्थो मयाविरभवत् कतमस्य वक्त्रात् ।
चैतन्यचन्द्रचरितामृतमग्नचित्तैः
शोध्यः समाकलितगौरगणाख्य एषः ॥

इति श्रीकविकर्णपूरविरचिता श्रीगौरगणोद्देशदीपिका समाप्ता॥
श्रीभैरवचन्द्रदेवशर्मणो लिखितमिदं ॥

For another MS. see Roth, Tübingen MSS., p. 9. [H. T. Colebrooke.]

## 2511.

**199.** Foll. 29; size 11 in. by 5 in.; indifferent Devanāgarī writing of about 1750 A.D.; 10–14 lines in a page.

*Brahmasaṃhitā* (or *Bhagavatsiddhāntasaṃgraha*), *Adhyāya* V., consisting of a (*Paurāṇik*) account of the origin and divinity of *Krishṇa*, followed by a hymn to the same deity; with a commentary, entitled *Digdarśanī*, by *Rūpa*, younger brother of *Sanātana*, and elder brother of *Vallabha*.

The entire work is stated to consist of a hundred *adhyāyas*.

A. The text contained in the present MS. runs as follows:

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणं ॥ १ ॥
सहस्रपत्रं कमलं गोकुलाख्यं महत्पदं ।
तत्कर्णिकारं तद्धाम तदनन्तांशसंभवं ॥ २ ॥
कर्णिकारं महद्यन्त्रं षट्कोणं वज्रकीलकं ।
षडङ्गं षट्पदीस्थानं प्रकृत्या पुरुषेण च ॥ ३ ॥
प्रेमानन्दमहानन्दरसेनावस्थितं हि यत् ।
ज्योतीरूपेण मनुना कामबीजेन संगतं ॥ ४ ॥
तत्किञ्जल्कं तदंशानां तत्पत्राणि श्रियामपि ।
चतुरस्रं तत्परितः श्वेतद्वीपाख्यमद्भुतं ॥ ५ ॥
चतुरस्रं चतुर्मूर्तेश्चतुर्धाम चतुष्कृतं ।
चतुर्भिः पुरुषार्थैश्च चतुर्भिर्हेतुभिर्वृतं ॥ ६ ॥
शूलैर्दशभिरानद्धमूर्ध्वाधो दिग्विदिक्ष्वपि ।
अष्टाभिर्निधिभिर्युक्तमष्टाभिः सिद्धिभिस्तथा ।
मनुरूपैश्च दशभिर्दिक्पालैः परितो वृतं ॥ ७ ॥
श्यामैर्गौरैश्च रक्तैश्च शुक्लैश्च पार्षदर्षभैः ।
शोभितं शक्तिभिस्ताभिरद्भुताभिः समन्ततः ॥ ८ ॥
एवं ज्योतिर्मयो देवः सदानन्दपरात्परः ।
आत्मारामस्य तस्यास्ति प्रकृत्या न समागमः ॥ ९ ॥
मायया रममाणस्य न वियोगस्तया सह ।
आत्मना रमया रेमे त्यक्तकालं* सिसृक्षया ॥ १० ॥
नियतिः सा रमा देवी तत्प्रिया तद्वशंवदा ।
तल्लिङ्गं भगवाञ्छंभुर्ज्योतीरूपः सनातनः ॥ ११ ॥
या योनिः सा परा शक्तिः कामो बीजं महद्धरेः ।
लिङ्गयोन्यात्मिका जाता इमा माहेश्वरीप्रजाः† ॥ १२ ॥
शक्तिमान्पुरुषः सो ऽयं लिङ्गरूपी महेश्वरः ।
तस्मिन्नाविरभूल्लिङ्गे महाविष्णुर्जगत्पतिः ॥ १३ ॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुर्विश्वात्मा सहस्रांशः सहस्रसूः‡ ॥ १४ ॥
नारायणः स भगवानापस्तस्मात्सनातनात्§ ।
आविरासन् कारणार्णोनिधिसंकर्षणात्मकः ॥ १५ ॥
योगनिद्रां गतस्तस्मिन् सहस्रांशः स्वयं महान् ।
तद्रोमबिलजालेषु बीजं संकर्षणस्य च ॥ १६ ॥
हैमान्यण्डानि जातानि महाभूतावृतानि तु ।
प्रत्यण्डमेवमेकांशादेकांशाद्विशति स्वयं ॥ १७ ॥
सहस्रमूर्धा विश्वात्मा महाविष्णुः सनातनः ।
वामाङ्गादसृजद्विष्णुं दक्षिणाङ्गात् प्रजापतिं ॥ १८ ॥
ज्योतिर्लिङ्गमयं शम्भुं कूर्चदेशादवासृजत्‖ ।
अहंकारात्मकं विश्वं तस्मादेतद्व्यजायत ॥ १९ ॥
अथ तैस्त्रिविधैर्वेशैर्लीलामुद्वहतः किल ।
योगनिद्रा भगवती तस्य श्रीरिव संगता ॥ २० ॥
सिसृक्षया ततो नाभेस्तस्य पद्मं विनिर्ययौ ।
तन्नालं हेमनलिनं ब्रह्मणो लोकमद्भुतं ॥ २१ ॥
तत्त्वानि पूर्वरूपाणि कारणानि परस्परं ।
समवायेत् प्रयोगाच्च विभिन्नानि पृथक् पृथक् ॥ २२ ॥
चिच्छक्त्या सज्जमानो ऽथ भगवानादिपूरुषः ।
योजयन्मायया देवो योगनिद्रामकल्पयत् ॥ २३ ॥
योजयित्वाथ तामेव प्रविशति स्वयं गुहां ।
गुहां प्रविष्टे तस्मिंस्तु जीवात्मा प्रतिबुध्यते ॥ २४ ॥
स नित्यो नित्यसंबन्धः प्रकृतिश्च परैव सा ।
एवं सर्वात्मसंबन्धं नाभ्यां पद्मं हरेरभूत् ॥ २५ ॥
तत्र ब्रह्माभवद्भूयश्चतुर्वेदी चतुर्मुखः ।
स जातो भगवच्छक्त्या तत्कालं किल चोदितः ॥ २६ ॥
सिसृक्षायां मतिं चक्रे पूर्वसंस्कारसंस्कृतां ।
ददर्श केवलं ध्वान्तं नान्यत्किमपि सर्वतः ॥ २७ ॥
उवाच पुरतस्तस्मै तस्य दिव्या सरस्वती ।
कामः कृष्णाय गोविन्द ङे गोपीजन इत्यपि ॥ २८ ॥
वल्लभाय प्रिया वह्नेरयं ते दास्यति प्रियं ।
तप त्वं तप एतेन तव सिद्धिर्भविष्यति ॥ २९ ॥
अथ तेपे स सुचिरं प्रीणन्गोविन्दमव्ययं ।
श्वेतद्वीपपतिं कृष्णं गोलोकस्थं परात्परं ॥ ३० ॥
प्रकृत्या गुणरूपिण्या रूपिण्या पर्युपासितं ।
सहस्रदलसंपन्ने कोटिकिञ्जल्कबृंहिते ॥ ३१ ॥

---

* स्रष्टुमिच्छया त्यक्तः सृष्ट्यर्थं प्रहितः कालो यस्माद्रमणात् तादृशं यथा स्यात्तथा रेमे ।

† माहेश्वरी माहेश्वर्यः ।

‡ सहस्रं सूते सृजति ।

§ आपो वै नरसूनवः ।

‖ भ्रुवोर्मध्यात् ।

भूमिश्चिन्तामणिस्तत्र कर्णिकारे महासने ।
समासीनं चिदानन्दं ज्योतीरूपं सनातनं ॥ ३२ ॥
शब्दब्रह्ममयं वेणुं वादयन्तं मुखाम्बुजे ।
विलासिनीगणवृतं स्वैः स्वैरंशैरभिष्टुतं ॥ ३३ ॥
अथ वेणुनिनादस्य त्रयी मूर्तिमयी गतिः ।
स्फुरन्ती प्रविवेशन्ती(r. °शाशु marg.) मुखाब्जानि*
[स्वयंभुवः ॥ ३४ ॥
गायत्रीं गायतस्तस्मादधिगत्य सरोजजः ।
संस्कृतश्चादिगुरुणा द्विजतामगमत्तदा ॥ ३५ ॥
त्रय्या प्रबुद्धो ऽथ विधिर्विज्ञाततत्त्वसागरः ।
तुष्टाव वेदसारेण स्तोत्रेणानेन केशवं† ॥ ३६ ॥

---

चिन्तामणिप्रकरसद्मसु कल्पवृक्ष-
लक्षावृतेषु सुरभीरभिपालयन्तं ।
लक्ष्मीसहस्रशतसंभ्रमसेव्यमानं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १ ॥
वेणुं क्वणन्तमरविन्ददलायताक्षं
बर्हावतंसमसिताम्बुदसुन्दराङ्गं ।
कन्दर्पकोटिकमनीयविशेषशोभं
गोविन्दमादिपुरुषं तमहं भजामि ॥ २ ॥
आलोलचन्द्रकलसद्वनमाल्यवंशी-
रत्नाङ्गदप्रणयकेलिकलाविलासं ।
श्यामं त्रिभङ्गललितं नियतप्रकाशं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ३ ॥
अङ्गानि यस्य सकलेन्द्रियवृत्तिमन्ति
पश्यन्ति पान्ति कलयन्ति चिरं जगन्ति ।
आनन्दचिन्मयसमुज्ज्वलविग्रहस्य
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४ ॥
अद्वैतमच्युतमनादिमनन्तरूपम्
आद्यं पुराणपुरुषं नवयौवनं च ।
वेदेषु दुर्लभमदुर्लभमात्मभक्तौ
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५ ॥

पन्थास्तु कोटिशतवत्सरसंप्रगम्यो
वायोरथापि मनसो मुनिपुङ्गवानां ।
सो ऽप्यस्ति यत्प्रपदसीम्नि विचिन्त्य तत्त्वं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ६ ॥
एको ऽप्यसौ‡ रचयितुं जगदण्डकोटिं
यच्छक्तिरस्ति जगदण्डचया यदन्तः§ ।
अण्डान्तरस्थं परमाणुचयान्तरस्थं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ७ ॥
यद्भावभावितधियो मनुजास्तथैव
संप्राप्य रूपमहिमासनजानुभूषाः(?) ।
सूक्तैर्यमेव निगमप्रथितैः स्तुवन्ति
गोविन्दमादिपुरुषं तमहं भजामि ॥ ८ ॥
आनन्दचिन्मयरसप्रतिभाविताभिस्
ताभिर्य एव निजरूपतया कलाभिः ।
गोलोक एव निवसत्यखिलात्मभूतो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ९ ॥
प्रेमाञ्जनच्छुरितभक्तिविलोचनेन
सन्तः सदैव हृदये ऽपि विलोकयन्ति ।
तं(r. यं) श्यामसुन्दरमचिन्त्यगुणप्रकाशं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १० ॥
रामादिमूर्तिषु कलानियमेन तिष्ठन्
नानावतारमकरोद्भुवनेषु किंतु ।
कृष्णः स्वयं समभवत् परमः पुमान्यो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ११ ॥
यस्य प्रभावप्रभवतो जगदण्डकोटि-
कोटिष्व(r. ष्व)शेषवसुधादिविभूतिभिन्नं ।
तद्ब्रह्म निष्कलमनन्तमशेषभूतं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १२ ॥
माया हि यस्य जगदण्डशतानि सूते
त्रैगुण्यतद्विषयवेदवितायमाना ।
सत्त्वावलम्बिपरसत्त्वविशुद्धसत्त्वं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १३ ॥
आनन्दचिन्मयरसात्मतया मनःसु
यः प्राणिनां प्रतिफलन् स्मरतामुपेत्य ।
लीलायितेन भुवनानि जयत्यजस्रं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १४ ॥

---

* मुखाब्जानि प्रविवेशेत्यष्टभिः कर्णैः प्रविवेशेत्यर्थः ।

† The text makes this last *śloka* consist of three hemistichs, the number of the verses, 7–35, being removed back to the end of the preceding hemistich. In the commentary this is different, though there too the numbering is irregular, several *ślokas* being sometimes treated together under the same number, and the two sections being numbered consecutively.

‡ Thus comm., °प्यणौ text.

§ जगदण्डचया इति न चामन्ते बहिर्यस्येत्यादि ।

गोलोकनाम्नि निजधाम्नि तले च तस्य
देवीमहेशहरिधामसु तेषु तेषु ।
ते ते प्रभावनिचया विहितास्तु येन
गोविन्दमादिपुरुषं तमहं भजामि ॥ १५ ॥

सृष्टिस्थितिप्रलयसाधनशक्तिरेका
छायेव यस्य भुवनानि बिभर्ति दुर्गा ।
इच्छानुरूपमपि यस्य च चेष्टते सा
गोविन्दमादिपुरुषं तमहं भजामि ॥ १६ ॥

क्षीरं यथा दधिविकारविशेषयोगात्
संजायते न तु ततः पृथगस्ति हेतोः ।
यः संभु(r. शंभु)तामपि* तथा समुपैति कार्याद्
गोविन्दमादिपुरुषं तमहं भजामि ॥ १७ ॥

दीपार्चिरेव हि दशान्तरमभ्युपेत्य
दीपायते विवृतहेतुसमानधर्मा ।
यस्तादृगेव हि च विष्णुतया विभाति
गोविन्दमादिपुरुषं तमहं भजामि ॥ १८ ॥

यः कारणार्णवजले भजति स्म योग-
निद्रामनन्तजगदण्डसरोमकूपः ।
आधारशक्तिमवलम्ब्य परां स्वमूर्तिं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १९ ॥

यस्यैकनिःश्वसितकालमथावलम्ब्य
जीवन्ति लोमविलजा जगदण्डनाथाः ।
विष्णुर्महान्स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि ॥ २० ॥

भास्वान् यथाश्मशकलेषु निजेषु तेजः
स्वीयं कियत्प्रकटयत्यपि तद्वदत्र ।
ब्रह्मा य एष जगदण्डविधानकर्ता
गोविन्दमादिपुरुषं तमहं भजामि ॥ २१ ॥

यत्पादपल्लवयुगं विनिधाय कुम्भ-
द्वन्द्वे प्रणामसमये स गणाधिराजः ।
विघ्नान्विहन्तुमलमस्ति जगत्त्रयस्य
गोविन्दमादिपुरुषं तमहं भजामि ॥ २२ ॥

अग्निर्मही गगनमम्बु मरुद्दिशश्च
कालस्तथात्ममनसीति जगत्त्रयाणि ।
यस्माद्भवन्ति विभवं विशन्ति यं च
गोविन्दमादिपुरुषं तमहं भजामि ॥ २३ ॥

यच्चक्षुरेष सरिता(r. सविता) सकलग्रहाणां
राजा समस्तसुरमूर्तिरशेषतेजाः ।
यस्याज्ञया भ्रमति संभृतकालचक्रो
गोविन्दमादिपुरुषं तमहं भजामि ॥ २४ ॥

धर्मार्थकामनिचयः श्रुतयस्तपांसि
ब्रह्मादिकीटपतगावधयश्च जीवाः ।
यद्दत्तमात्रविभवप्रकटप्रभावा
गोविन्दमादिपुरुषं तमहं भजामि ॥ २५ ॥

यस्त्विन्द्रगोपमथवेन्द्रमहो(?) स्वकर्म-
बन्धानुरूपफलभाजनमातनोति ।
कर्माणि निर्दहति किंतु च भक्तिभाजां
गोविन्दमादिपुरुषं तमहं भजामि ॥ २६ ॥

यं क्रोधकामसहजं प्रणयन्ति भीति-
वात्सल्यमोहगुरुगौरवसेव्यभावैः ।
संचिन्त्य तस्य सदृशीं तनुमापुरेते
गोविन्दमादिपुरुषं तमहं भजामि ॥ २७ ॥

श्रियः† कान्ताः कामः परमपुरुषः कल्पतरवो
द्रुमा भूमिश्चिन्तामणिगणमयी तोयममृतं ।
कथा गानं नाट्यं गमनमपि वंशी प्रियसखी
चिदानन्दज्योतिः परमपि तदास्वाद्यमपि च ॥ २८ ॥

स यत्र क्षीराब्धी सरति सुरभीभ्यश्च‡ सुमहान्
निमेषार्धाख्यो वा व्रजति न हि यत्रापि समयः ।
भजे श्वेतद्वीपं तमहमिह गोलोकमिति यं
विदन्तस्ते सन्तः क्षितिविरलचाराः कतिपये ॥ २९ ॥

अथोवाच भगवान् भगवन्तं कमलयोनिं ॥

ब्रह्मन् महत्त्वविज्ञाने प्रजासर्गे च चेन्मतिः ।
पञ्चश्लोकीमिमां विद्यां वत्स दत्तां निबोध मे ॥ ३० ॥

प्रबुद्धे ज्ञानभक्तिभ्यामात्मन्यानन्दचिन्मयी ।
उदेत्यनुत्तमा भक्तिर्भगवत्प्रेमलक्षणा ॥ ३१ ॥

प्रमाणैस्तत्सदाचारैस्तदभ्यासैर्निरन्तरं ।
बोधयन्नात्मनात्मानं भक्तिमप्युत्तमां लभेत् ॥ ३२ ॥

यस्याः श्रेयस्करं नास्ति यया निर्वृतिमाप्नुयात् ।
या साधयति मामेव भक्तिं तामेव साधयेत् ॥ ३३ ॥

धर्मानन्यान्परित्यज्य मामेव भज विश्वसन् ।
यादृशी यादृशी श्रद्धा सिद्धिर्भवति तादृशी ॥ ३४ ॥

---

* शंभोरपि कार्यत्वं गुणसंवलनात् ।

† व्रजसुन्दरीरूपाः

‡ सुरभीभ्यः सरतीति तदीयवंशीध्वन्याद्यावेशादिति भावः ।

अहं हि विश्वस्य चराचरस्य
  बीजं प्रधानं प्रकृतिः पुमांश्च ।
मया हितं तेज इदं बिभर्षि
  विधे विधेहि त्वमथो जगन्ति ॥ ३५ ॥

इति श्रीब्रह्मसंहितायां भगवत्सिद्धांतसंग्रहे मूलसूत्राख्यः पंचमो ऽध्यायः ॥

In the *Bhaktirasāmṛitasindhu* the verses ii. 12 (यस्य प्रभावतो °) and ii. 20 (यस्यैकनिःश्वसित °) are quoted as occurring "*Brahmasaṃhitāyām Ādipurusharahasye.*"

B. *Rūpa's* commentary, which, for the most part, is illustrative rather than explanatory, begins: श्रीमते निंबार्काय भगवते नमः ॥ श्री-

कृष्णस्वरूपमहिमा मम चित्ते महीयतां ।
यस्य प्रसादाद् व्याकर्तुमिच्छामि ब्रह्मसंहितां ॥

दुर्योजनापि युक्तार्था सुविचारादृषिस्मृतिः (?सुविरा-
[दृषिवाङ्कृतिः R. M.) ।
विचारे तु मयात्र स्यादृषीणां स श्रुचिर्गतिः (?सदृशी
[गतिः)

यद्यप्यध्यायशतयुक् संहिता सा तथाप्यसौ ।
अध्यायः सूत्ररूपत्वात्तस्याः सर्वांगतां गतः ॥

श्रीमद्भागवताद्येषु दृष्टं यन्मृष्टबुद्धिभिः ।
तदेवात्र परामृष्टं ततो हृष्टं मनो मम ॥

यद्यप्युक्तं कृष्णसंदर्भे विस्तराद्धि निरूपितं ।
अत्र तत्पुनरामृष्य(r. मृश्य) व्याख्यातुं स्पृश्यते मया ॥

अथ श्रीमद्भागवते यदुक्तमेते चांशकलाः पुंसकृष्णस्तु भगवान् स्वयमिति तदेव तावत्प्रथममाह । ईश्वर इति °

The commentator quotes freely from the *Bhāgavatapurāṇa*, esp. the tenth book (*śrīdaśama*), with its *Ṭīkā*, and the *Bhagavadgītā*. Other authorities quoted are: *Uddhava* (या वै श्रियार्चितमित्यादि श्रीमदुद्धववाक्यात्), fol. 19*b*; *Kṛishṇasandarbha*, foll. 1*b*, 24*a*; *Gopālatāpanī*, foll. 3*b*, 8*b*; *Gosūktam* (गोभ्यो यज्ञाः प्रवर्तंते गोभ्यो देवाः समुत्थिताः । गोभिर्वेदा समुत्तीर्णाः स षडंगपदक्रमाः ॥), fol. 6*a*; *Gautamīyatantra*, foll. 2*b*, 3*a* (*Vṛihad-Gautamīya*, foll. 9*b*, 23*a*; *Gautamīyatantradvaya*, fol. 28*a*); *Nāmakaumudī-kāra*, fol. 3*a*; *Nāradapañcarātra*, foll. 8*b*, 17*b*; *Prabhāshapurāṇa* (*Nāradakuśadhvajasaṃvāde*; prob. the *Prabhāsakhanda* of the *Skandapurāṇa*), fol. 2*a*; *Bhaṭṭa*, fol. 3*b*; *Mṛityuṃjayatantra*, fol. 14*a*; *Brahmastuti*, fol. 4*b*; *Bhaktisandarbha*, fol. 29*a*; *Yāmunācārya*, fol. 22*a*; *Vāsudevopanishad*, fol. 3*a*; *Śuka* (?तथासौ दर्शयामास लोकस्वमित्यादौ श्रीशुकवाक्यात्), fol. 19*b*; *Śrīdharasvāmin* (comm. on *Vishṇup.*), fol. 21*b*; *Śrutistava* (स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणं °। इति नृगतिं विविच्य कवयो निगमावपनं ° ॥), fol. 28*b*; (*Trailokya-*)*Sammohanatantra* (*ashṭādaśākshaaraprasaṅga*), fol. 24*a*; *Sahasranāmavyākhyā*, fol. 13*b*; *Hayaśīrshapañcarātra*, foll. 8*b*, 28*a*.

It ends: इति ब्रह्मसंहितायामिति । तदुक्तं तत्रैवान्यत्र ।

अध्यायशतसंपन्ना भगवद्ब्रह्मसंहिता ।
कृष्णोपनिषदां सारैः संचिता ब्रह्मणोदितेति ॥

यद्यपि नाना पाठास्ताना चार्थान् स्मरंति नाना ते ।
तदपि च सत्पथ लब्ध्वा स्यास्माभिस्त्वमी प्रमिताः ॥

सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभो ऽनुजः सो ऽसौ श्रीरूपो जीवसद्गतिः ॥

इति ब्रह्मसंहितायां मूलसूत्राख्यस्य पंचमाध्यायस्य दिग्दर्शनी [नाम्नी suppl.] टीका समाप्ता ॥ श्रीमते निंबार्काय भगवते नमः ॥

For another MS. of both text and commentary (not metrical, as is there stated erroneously), see Rāj. Mitra, Notices, ii., p. 106.

[H. T. Colebrooke.]

## 2512.

**2461.** Foll. 203, one of which (fol. 93) is wanting; whilst 118–125 are misplaced after 193; size 11 in. by 4¾ in.; fairly written, in Devanāgarī, about the beginning of the 17th century; nine lines in a page.

*Vishṇudharmamīmāṃsā*, a dissertation on the worship of *Vishṇu*, by *Nṛisiṃha Bhaṭṭa*, son of *Soma Bhaṭṭa*. The MS. has suffered to some extent from damp.

It begins:

वाचामगोचरमजातिगुणक्रियाया
यं नेति नेति चकितं श्रुतयो वदंति ।
वैखानसागमपरैरधिगम्यते यस्
तस्मै नमो ऽस्तु हरये द्विपडक्षराय ॥ १ ॥
सर्वस्वं वैष्णवानां श्रुतिनि[खि]लशिरःसागरं पंचरात्रं
यत्प्राहादौ मुरारिः स्वजनहितकरो नारदायेष्टसिद्ध्यै ।
तद्व्याचिख्यासवस्तु प्रकटितवपुषे श्रीनृसिंहाश्रमाख्या-
विख्यातायाखिलाप्त्यै सततमिह नमस्कुर्महे ऽस्मै मधुघ्ने
[॥ २ ॥
वेदांताद्यविरोधेन पूर्वतंत्रानुसारतः ।
मीमांसा विष्णुधर्माणां क्रियते सोमसूनुना ॥ ३ ॥
वैष्णवकंठाभरणं कंठे धार्यं सर्वविपश्चिद्भिः ।
द्वापरपाषंडादिध्वांतात्यंतव्युदासाय ॥ ४ ॥
ईर्ष्यामत्सरपित्तदूषितधियो नैतत्कृतेः स्वादुतां
द्राक्षाक्षीरमधूपमामिह विदुः किं तावता तत्कृतिः ।
रंभामप्यमरांगनामरसिकः क्लीबो न चेद्रोचते
लावण्यादि किमत्र दुष्यति यतः संत्येव तद्भावुकाः ॥ ५ ॥
पंचरात्रविदो नत्वा गुरूनपि गरीयसः ।
प्रामाण्यं पंचरात्रस्य प्रथमं समुदीर्यते ॥ ६ ॥

सात्वतापरनामधेयपंचरात्रोक्तपूजास्तुतिनमस्कारादिना भगवंतं नारायणं भजम[ना]नामेव कैवल्यमभ्युदयो वा नान्येषां । श्रुतिस्मृतिप्रामाण्यात् । °

There are no divisions, and a rapid perusal has only yielded quotations from *Purāṇas*, the epics, the *Nāradapañcarātra*, *Brahmayāmala* (fol. 104*b*), *Ratnasāgara* (fol. 102*a* मध्यमानामिका मध्यपर्वद्वयमिह प्रिये । मेरुं कल्पजपं कुर्वंत्प्रदक्षिणमनुक्रमात् ॥ अनामा मूलपर्वादि कनिष्ठादिक्रमेण तु । तर्जन्यग्रादितो देवि मध्यामूलावभासकं ॥ °); *Parāśara*, *Śaṅkarācārya*.

It ends:

श्रीविष्णुधर्ममीमांसापदार्थानां तु संग्रहः ।
सुखावबोधनार्थं तु जिज्ञासूनामयं कृतः ॥
मीमांसिता विष्णुधर्माः श्रीगुरूणामनुग्रहात् ।
यदत्र सुष्ठु तत्तेषां यदसुष्ठु ममैव तत् ॥ ° ॥

आम्नायवेदतदनुस्मृतिवारिजानां
सोमात्मजेन विचयागुणगुम्फमाला ।
न्यस्ता हरेश्चरणयोरनया नृसिंहः
प्रीणातु मे स भगवान्द्विषडक्षरात्मा ॥

इति श्रीपदवाक्यप्रमाणज्ञसोमभट्टतनूजश्रीनृसिंहभट्टविरचिता विष्णुधर्ममीमांसा समाप्ता ॥ [GAIKAWAR.]

## 2513.

**2635b.** Foll. 20 (the first five of which are wanting); size 10½ in. by 4 in.; legibly written in Devanāgarī; 14 or 15 lines in a page.

*Śivādvaitaprakāśikā*, a treatise, in three chapters (*ullāsa*), on the unity of the deity as represented by *Śiva*, and on the practices of devotion due to that deity, by *Kāśīnātha Bhaṭṭa*, son of *Jayarāma Bhaṭṭa* and *Vārāṇasī*.

The treatise is composed in *ślokas* (chiefly compiled from *Purāṇas*) interspersed with explanatory remarks.

Ch. II. beg. (fol. 8*a*):

अथोत्पत्तिं प्रवक्ष्यामि शैवशास्त्रानुसारतः ।
निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः ॥
निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः ।
सच्चिदानंदविभवात्सकलात्परमेश्वरात् ॥
पंच भूतानि तन्मात्रपंचकं च तथा पुनः ।
ज्ञानेंद्रियाणि पंचैव पंचकर्मेंद्रियाण्यपि ॥
मनोमयाः शुद्धविद्या महेश्वरः सदाशिव इति ।

अस्यार्थः ॥ सनातनो नित्यः शिवो निर्गुणः सगुणश्च ज्ञेयः । निर्गुणस्वरूपमाह ।

तच्छक्तिभूतः सर्वेशो भिन्नो . . . . . . ।
नित्यः सर्वगतः सूक्ष्मः सदानंदो निरामयः ।
विकाररहितः साक्षाच्छिवो ज्ञेयः सनातन इति ॥

प्रकृतेरन्यः । केवलो निर्गुणः । °

Ch. III. beg. (fol. 15*a*): शैवपुराणे ।

शृणु धर्मं प्रवक्ष्यामि भक्तानां लक्षणं मम ।
भस्मोद्धूलितसर्वांगास्त्रिपुंड्रांकितमस्तकाः ॥ °

It ends (from the *citrakhaṇḍa*)

प्रदोषपूजनं शंभोः सर्वपापभयापहं ।
सर्वाभीष्टप्रदं तस्मात्सादरं तत्समाचरेत् ॥
सोमवारत्रयोदश्यां नक्तभुक् शंकरप्रियः ।
रुद्राध्यायजपी चेत्स्यात् सुकृतं को ऽस्य वर्णयेदिति ॥

इति श्रीमद्वडोपनामक(thus in all three colophons) जयरामभट्टसुत- वाराणसीगर्भसंभव- दक्षिणामूर्तिशिवाराधक- काशीनाथविरचितायां शिवाद्वैतप्रकाशिकायां तृतीयोल्लासः ॥ संवत् १८५८ शके १७२३ दुर्मतिनामसंवत्सरे वैशाखकृष्ण अमायां(!) भौमे भरणीनक्षत्रे मेषस्थिते चंद्रे वृषस्थिते रवौ कर्कस्थिते देवगुरौ काश्यां दशाश्वमेधस्थितनगरकराख्यप्रसिद्धः वडव्योपनामकेन आकुलनेरनृसींहरेण पुतदेवप्रपौत्रेण(?) नीलकंठपौत्रेण विठलात्मजेन वत्सगोत्रोत्पन्नेन पंचप्रवरान्वितेन पुण्यग्रामे ० इदं पुस्तकं जयरामशर्मणा स्वहस्तेन लिखितं । तस्येदं दक्षिणामूर्ति-विश्वेश्वरः प्रसन्नो ऽस्तु ॥

Of non-*purāṇic* authorities may be mentioned: *Purushārthaprabodha*, foll. 12*b*, 16*a*,*b*; *Paippalādopanishad*, fol. 12*b*; *Vidyeśvarasaṃhitā* (?of some *purāṇa*), fol. 17*a*; *Śāradā*, fol. 15*a*. [MACK. COLL.]

## 2514.

**1547C.** Foll. 20; size 10 in. by 4½ in.; clear, modern Devanāgarī writing; five lines in a page.

*Catushṭayasampradāyikā-paddhati*(?) and *Sītārāmapaddhati*, two short manuals of prayers, with directions for their use (?by *Rāmānuja* or one of his followers). Partly in *bhāshā*.

I. (in four sections) begins: श्रीमते रामानुजाय नमः ॥ ओं

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं चाशनं(*r.* चासनं)कुरु ॥

इति आसनमंत्रः ॥

समुद्रमेखले देवि पर्वतस्तनमंडले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

इति पादपूरमंत्रः ॥

ओं तस्य तस्य देवानां भूतप्रेतपिशाचिका ।
मलमूत्रमनुष्याणां मम दोषो न दीयते ॥

इति मलमंत्रः ॥

Follow *pātraśuddhimantra*, *mṛittikāmantra*, *dantadhāvanamantra*, *śikhābandhanamantra*, *śikhāmuktimantra*, *ācamanamantra*, *snānamantra*, *aghamarshaṇa*, *karanyāsa*, *hṛidayāyanyāsa*, *aṅganyāsa*, *hṛidayanyāsa*, *dhyānam*, *shaḍaksharamantra*.

It ends:

विलासाचार्यके अगस्त्याचार्ये ॥ ३ ॥ इति चतुष्टसंप्रदायकी-पद्धत(!) संपूर्णम् ॥

II. beg. (fol. 9*a*): अगस्त्य उवाच ॥ ओं प्रातरुत्थाय शौचस्नानं कृत्वा मलमंत्रं त्रिवारं पठित्वा ।

पृष्ठे तु पद्मनाभं च शिखे दामोदरं न्यसेत् ।

ओंकारमध्ये स गुरुं श्रीरामचंद्रं ध्यात्वा सो ऽहं हृदयं वायु-बीजं षोडशवारं जपेत् ॥ पापपुरुषं विशोषयेत् ॥ ०

Follow *tilakamantra*, *prāṇapratishṭhā*, *devanyāsa*, *shaḍaṅganyāsa*, *siṃhāsanamantra*, *āsanamantra*, *pādyamantra*, *snānamantra*, *ācamanamantra* (different from above), *candanamantra*, *vastramantra*, *pushpamantra*, *dhūpamantra*, *dīpamantra*, *naivedyamantra*, *tāmbūlamantra*, *atyārtimantra*, *pradakshiṇāmantra*, *aparāddhakshamāmantra*, *namaskāramantra*, *dhyānamantra*, *caraṇasevanamantra*, *jalagāyatrī*, *karanyāsa*, *prayogasaṃkalpa*.

It ends: अमुकवर्षे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे योगकर्णलग्नमुहूर्ते । अमुकतीर्थे ॥ श्रीसीतारामपद्धति ॥ पटलं संपूर्णम् ॥

The leaves are marked पटल or लट.

For a *Śrīrāmapaddhati*, by *Rāmānuja*, see Aufrecht, Cat. Bodl., no. 733; for a *Rāmapaṭala* by the same Author, Burnell, Tanjore MSS., p. 202*b*. [H. T. COLEBROOKE.]

## 2515.

**1068.** Foll. 149; size, oblong, 6¼ in. by 5 in.; large, clear Devanāgarī writing of about 1750 A.D.; 10 or 11 lines in a page.

A collection of hymns, and theological or devotional tracts, by *Vallabhācārya* (A), his son *Viṭṭhaleśvara* (B) and others; with extracts from *Purāṇas*, etc.

1. *Vallabhāshṭaka* (B), व्रजराजविराजितघोषवरे ० ending with eight stanzas, श्रीमद्वृंदावनेंदुप्रकटितरसिका ० ends fol. 36; 2. *Siddhāntarahasya* (A), 9 *vv.*, श्रावणस्यामले पक्षे एकादश्यां महानिशि । ० fol. 4*b*; 3. *Saptaślokī* (B), स्फुरत्कृष्णप्रेमामृतरसभरेण ० fol. 5*b*; 4. *Siddhāntamuktāvalī* (A), 21 *vv.*, नत्वा हरिं प्रवक्ष्यामि स्वसिद्धांतविनिश्चयं । कृष्णसेवा सदा कार्या मानसी सा परा मता॥ fol. 7*b*; 8. *Antaḥkaraṇaprabodha* (A), 11 *vv.*, अंतःकरण मद्वाक्यं ० fol. 8*b*; 9. *Sevāphalam* (A), 8 *vv.*, यादृशी सेवना प्रोक्ता ० fol. 9*a*; 10. *Vivekadhairyāśraya* (A), 17 *vv.*, विवेकधैर्ये सततं रक्षणीय तथाश्रयः । ० fol. 10*b*; 11. *Nirodhalakshaṇam* (A), 20 *vv.*, यच्च दुःखं यशो दाया ० fol. 12*b*; 12. Extracts from the tenth book of the *Bhāgavata* (and from the *Brahmāṇḍa*) *Purāṇa*, fol. 33*a*; 13. *Sevānantaram prārthanā* (B), 12 *vv.*, नमो भक्तिसारस्वास्वाददात्रे ० fol. 33*a*; 14. *Madhurāshṭakam* (A), 8 *vv.*, अधरं मधुरं वदनं मधुरं नयनं ० fol. 34*a*; 15. *Maṅgalastotram* (A), 3 *vv.*, मंगलं मंगलं ० fol. 34*b*; 16. *Prātaḥstavaḥ* (A), 10 *vv.*, तत्कंजरं ० fol. 35*b*; 17. *Kṛishṇastavarāja* (by?), 8 *vv.*, अनंतकंदपें ० fol. 36*b*; 18. *Shoḍaśastotram* (by?), प्रभुनंदकुमारो ० fol. 37*b*; 19. *Vṛindāshṭakam* (A), कलिंदोद्भवायाः ० fol. 39*a*; 20. *Gopījanavallabha-caraṇaikatānam* (B), रहस्यं श्रीराधेत्यखिलनिगम ० fol. 40*a*; 21. *Svāminyāḥ stotram* (B), 12 *vv.*, यदैव श्रीराधे रहसि मिलति त्वां ० fol. 42*a*; 22. *Yamunāshṭakam* (B), नमामि यमुनामहं ० fol. 43*b*; 23. *Yamunāshṭapadī* (B), *rāmakalīrāgeṇa gīyate*, नमो देवि यमुने ० fol. 44*b*; 24. *Gaṅgāshṭakam* (by *Vālmīki*), मातः शैलसुता ० fol. 46*a*; 25. *Antaḥkaraṇaprabodha* (A), 11 *vv.*, अन्तःकरण मद्वाक्यं सावधानतया शृणु । fol. 47*a* (=8); 26. *Siddhāntarahasyam* (A), 9 *vv.*, श्रावणस्यामले ० fol. 47*b*; 27. *Navaratnam* (A), 9 *vv.*, चिंता कापि न कार्या ० fol. 48*b*; 28. *Bhaktivardhinī* (A), 11 *vv.*, यथा भक्तिः प्रवृद्धा स्यात् तथोपायो निरूप्यते।० fol. 49*b*; 29. *Vallabhāshṭakam* (B), 8 *vv.*, श्रीमद्वृंदावनेंदु ० (=1); 30. *Agnikumāraproktam Sarvottamastotram*, fol. 53*b*; 31. *Kṛishṇapremāmṛitam* (B), 8 *vv.*, स्फुरत्कृष्णप्रेमा (partly=3); 32. *Haridāsoditam Śrīvallabhaśaraṇāshṭakam*, 9 *vv.*, निःसाधनजनोद्धारकरणप्रकटीकृतः । ० fol. 55*b*; 33. *Harirāyajī's Navanītapriyāshṭakam*, अलकावृतसदलकं ० fol. 56*a*; 34. *Raghunāthajī's Nāmaratnākhyastotram*, 32 *vv.*, यत्नामार्केदिया ० fol. 58*b*; 35. *Raghunātha's Stavanam*, 10 *vv.*, यः कृष्णसेवार्थमगाधबोधं जगाद ० fol. 59*b*; 36. *Mahādevakṛitam Śrī-Viṭṭhaleśvarasyāshṭottaraśatanāmastotram*, fol. 62*a*; 37. *Catuḥślokī* (A), सर्वदा सर्वभावेन ० fol. 62*b*; 38. *Premāmṛitam* (by?), 35 *vv.*, पयोदध्यामीक्षानवघृत ० fol. 67*b*; 39. *Bhujaṅgaprayātāshṭakam* (B), सुधाधामनैत्यधरा ० fol. 68*b*; 40. *Pañcapadī* (A), श्रीकृष्णरस ० fol. 69*a*; 41. Extracts (*Ṛigv.*, *Purāṇas*), fol. 118; 42. *Āryādvaye* (B), शरणागतभीतिवृत्तिपरं ० fol. 120*a*; 43. *Ācāryajīkṛita-śikshā*, चिन्तासंतानहंतारो ० fol. 120*b*; 44. *Giradharajīkrita Vijñaptiḥ*, अपराधघनोन्मुक्तचिन्ता ० (twice), foll. 121*b*, 125*a*; 45. *Nandakumārāshṭakam* (A), सुन्दरगोपाल ० (twice), foll. 124*a*, 142*b*; 46. *Snānavidhi* and *Yajurvedoktatrikālasandhyopāsanavidhi*, fol. 136*b*; 47. Extracts from *Bhāg. P.*; 48. *Haridāsoktam Śrī-Vallabhapañcākshurastotram*, 8 *vv.*, श्रीवल्लभवल्लभस्य वियोगो ० fol. 143*a*; 49. Extracts from *Purāṇas*.

[H. T. COLEBROOKE.]

## 2516.

**2611a.** Foll. 45 (foll. 15–19 of which are wanting); size 9½ in. by 4¼ in.; legibly written in Devanāgarī, about 1750 A.D.; eleven lines in a page.

*Sarvottamastotra-vivṛiti*, a commentary on the *Sarvottamastotra*, in praise of *Kṛishṇa*, by *Vallabhācārya*.

It begins:

नत्वा पितृपदांभोजमैहिकामुष्मिकार्थदं ।
तत्प्रोक्तार्थेनामानि विवरिष्ये यथामति ॥ १ ॥

यद्यप्ययोग्य एवाहं तत्रामविवृतौ सतः ।
स्वीयत्वेनैव कृपया योग्यतां मयि दास्यति ॥ २ ॥

इति विश्वासतो नूनं प्रवृत्तो ऽहं न चान्यथा ।
अतस्त एव शरणं मम सर्वार्थसिद्धये ॥ ३ ॥

श्रीमत्पितृचरणाः श्रीमदाचार्याणामलौकिकनामानि प्रकट-यितुमाचार्याणां स्वरूपं तत्प्राकट्यहेतुं च वक्तुमाचार्यैकप्रकटितभक्तिमार्गप्रतिपाद्यं सर्वश्रुतिश्रीभागवतगीताद्यनेकालौकिकप्रमाणसिद्धं पूर्वोक्तप्रमेयमूलभूतं साक्षात्पुरुषोत्तमरूपं सर्वमूलत्वेन मंगलार्थं स्तुवंति । प्राकृतधर्मानाश्रयमिति ।

The *stotra* here consists of 36 stanzas (whilst Hall, Index, p. 151, makes it 25).

The commentary ends:

एवमाचार्यनामानि विवृतानि यथामति ।
पितृपादाब्जकृपया नान्यसाधनतो मया ॥ १ ॥
यदत्र बुद्धिदोषेण विवृतावन्यथा कृतं ।
क्षमंत्वाचार्यचरणा मद्गत्यो ऽयमिति स्वतः ॥ २ ॥
आचार्यनामनि शताष्टकमौक्तिकानि
श्रीविट्ठलोक्तिरससागरनिर्गतानि ।
श्रीवल्लभोक्तिविवृतेर्गुणगुंफितानि
निकुर्वंतु(!) कंठभुवि भक्तजना जपार्थं ॥

इति श्रीमत्प्रभुचरणैकतानश्रीवल्लभविरचिता सर्वोत्तमस्तोत्रविवृतिः ॥ [GAIKAWAR.]

## 2517.

**2611b.** Foll. 22; size 10¼ in. by 4¾ in.; good Devanāgarī writing of about 1750 A.D.; eleven lines in a page.

Tracts connected with the sects of *Vallabhācārya* and *Rāmānuja*.

I. *Vivekadhairyāśrayanirūpaṇa*, by *Vallabhācārya*; 17 *ślokas*, beg.:

विवेकधैर्ये सततं रक्षणीये तथाश्रयः ।
विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यति ॥

This is followed by a commentary (*ṭīkā*) thereon, beg.:

स्वगोकुलपरित्राणसंभ्रमेणोद्धृताचलं ।
क्रीडल्लोपाङ्गनापाङ्गसक्तिगोपालमाश्रये ॥ १ ॥

II. [*Ananya-*]*Bhaktiviveka* (?by *Lakṣmaṇācārya*). It begins, fol. 4a:

रामानुजश्रीशपदावलंबी रामानुजश्रीशमतानुसारात् ।
श्रुत्यादिसंवादयुतं प्रवक्तुमनन्यभक्तेस्तु विवेकमीहे ॥ १ ॥
तत्रास्तु मे मूढतमस्य गूढः
श्रीवैष्णवाचार्यकृपासहाय(:) ।
यद्युष्मदालंबनतो हि यायाद्
अंधो जनो दुर्गममार्गपारं ॥ २ ॥

इह खलु देहात्मभ्रमेण बंभ्रम्यमाणेन पार्थेन शिष्यस्तेऽहं साधि मां त्वां प्रपन्नमिति प्रार्थितपार्थसारथिः °

It ends:

श्रीरामानुजकारुण्यात्तदीयानां मुदावहः ।
विवेको ऽनन्यभक्तेस्तु व्यक्तमुक्तो मयाधुना ॥

श्रीरामानुजारत(? नत)श्रीलक्ष्मणाचार्यभक्तिविवेकः समाप्तः ॥

III. *Siddhāntavivṛiti*, or rather a gloss thereon; by *Vallabha*. It begins, fol. 7b:

यद्वाक्यैव मोक्षाता(:) पुमर्था स्वपरीकृताः ।
स को ऽपि पितृपादाब्जवे(r. रे)णुमेऽस्तु प्रसीदतु ॥

अग्रे वक्ष्यमाणैरिति । °

It ends:

इति श्रीपितृपादाब्जपरागारक्तचेतसा ।
श्रीवल्लभेन सिद्धांतविवृतेर्विवृतिः कृता ॥

IV. *Yamunāshṭapadīvivaraṇa*, by *Raghunātha* (?pupil, or son, of *Viṭṭhala*). It begins, fol. 10a:

यो गिरींद्रमवष्टभ्य स्थितो भक्तरिरक्षया ।
समाह्मवमर्येद्रं तं वंदे वल्लभात्मजं ॥ १ ॥
या कलिंदाचले चारु पतंती संगता भुवि ।
स्वभर्तृभक्तमोदाय कालिंदीं प्रणमामि तां ॥ २ ॥

अष्टपदीगीतेन यमुनां प्रार्थयितुं स्तोतुं वादौ नमस्यंति । नमो देवि यमुन इति ° ॥

Colophon: इति श्रीमद्वल्लभनंदनचरणैकशरणरघुनाथकृतौ यमुनाष्टपदीविवरणं संपूर्णं ॥

V. A commentary on the *Siddhāntamuktāvalī* (see p. 827a, no. 4). It begins, fol. 14a:

प्रणम्य पितृपादाब्जपरागमनुरागतः ।
कृपया विशदीकुर्मस्तद्वाङ्मुक्ताफलावलीं ॥ १ ॥

स्वसिद्धांतेति अग्रे वक्ष्यमाणैर्बहुभिर्मिथो विरुद्धैः °

VI. *Yamunāshṭakavivṛiti*, by *Viṭṭhala*. It begins, fol. 19a:

विश्वोद्धारार्थमेवाविर्भूतवृंदावनप्रिया(:) ।
कृपयंतु सदा तातचरणा मयि विट्ठले ॥ ° ॥

नमामीति ° ।

Colophon: इति श्रीगोपीजनवल्लभचरणैकतानश्रीविट्ठलविरचिता यमुनाष्टकविवृतिस्संपूर्णा ॥

[GAIKAWAR.]

## 2518.

**2611c.** Foll. 20 (and a *śuddhapattra* to 10); size 8¼ in. by 3¾ in.; indifferent, modern Devanāgarī writing; eight lines in a page.

*Vallabhāshṭakavivṛitiprakāśa*, a gloss on a commentary on *Viṭṭhaleśvara's Vallabhāshṭaka*, by *Purushottama*, son of *Pītāmbara*.

It begins:

श्रीवल्लभाचार्यचरणाब्जरजोस्पृहं ।
तदष्टकीयविवृतेर्भावं वच्मि कृपाबलात् ॥ १ ॥

तत्र पूर्वमुपोद्घाततयेदमुच्यते। सर्वश्रुतिशिरस्सु परब्रह्म इव परमतत्वं सच्चिदानंदरूपेण वेदव्यासदर्शने सिद्धे । °

It ends:

इति श्रीवल्लभाचार्यदासेन कृपया मया ।
तद्दर्शितेन मार्गेण विवृतिः संप्रकाशिता ॥

इति श्रीवल्लभाचार्यदासानुदासेन पीताम्बरतनुजपुरुषोत्तमेन विरचितो ऽयं श्रीवल्लभाष्टकविवृतिप्रकाशः ॥

[GAIKAWAR.]

## 2519.

**2611d.** Foll. 5; size 8½ in. by 4 in.; fairly written, in Devanāgarī, about 1700 A.D.; 10 or 11 lines in a page.

*Bhaktivardhinīvivaraṇa*, a versified exposition of *Vallabhācārya's Bhaktivardhinī*; by *Haridāsa*.

It begins:

श्रीवल्लभाचार्यपदानुकंपाबलेन किंचिद्विरचितय चित्ते ।
निरूप्यते भक्तिविवृद्ध्युपायनिरूपणग्रंथनिरूपितो ऽर्थः॥१॥

प्रकृतिप्रत्ययार्थाभ्यां भक्तिसप्रेमसेवनं ।
चेतस्तत्प्रवणं तत्र ननु चित्तप्रसाधितं ॥ २ ॥

तत्र मूलं हरेरंगीकारो ऽस्य शरणागतिः ।
ततः समर्पणाज्जीवदेहसंबंधिन्युक्तता(?) ॥ ३ ॥

It ends:

इति श्रीवल्लभाचार्यकरुणालब्धशक्तिनः ।
स्वसंतोषाय भावस्य पोषयति प्रयत्नतः ॥ ८६ ॥

श्लोकरूपेण सर्वापि विवृता भक्तिवर्धिनी ।
यथामति निजाचार्यचरणाश्रयणादपि ॥ ८७ ॥

एतेनास्मत्कुलपतिः प्रभुः श्रीविट्ठलेश्वरः ।
प्रसीदतु सदा दासे हरिदासे स्ववंशगे ॥ ८८ ॥

टीका भक्तिवर्द्धिननी(!) श्रीहरिदासजीकृतस्ते ॥

[GAIKAWAR.]

## 2520.

**2663b.** Foll. 3; size 9 in. by 4 in.; fair, modern Devanāgarī writing; nine lines in a page.

A fragment, consisting of thirteen verses in praise of *Vishṇu*. Rather incorrect.

It begins (somewhat corrected):

यया जीयते सत्सभापंडिताभा
यया पूज्यते राजभिर्मंडनापि(?) ।
यया प्राप्यते ब्रह्मलोको दुरापः
करोत्वेव सा गीः सहायं द्रुतं मे ॥ १ ॥

स्मरंते पठंते हरे त्वां मनुष्या
लभंते पदं ते विभो शांतियुक्तं ।
अतो ऽहं भजे सच्चिदानंदरूपं
यशोदाकिशोरं हरिं रुक्मणीशं(*r.* रुक्मिणीशं) ॥ २ ॥

भवाशीविषाक्रीतमानंदरूप
सदा रक्ष विश्वेश गोपीप्रिय त्वं ।
त्वदन्यः स्मृतः किं विभो त्राति मां
यथा वारिदात्वेव बीजांकुरं हि ॥ ३ ॥

The first leaf is marked शंकरो° in one margin, and राम: in the other. [GAIKAWAR.]

## 2521.

**1635e.** Foll. 10; size 8¾ in. by 4 in.; legibly written, in Devanāgarī, about 1700 A.D.; ten lines in a page.

*Bhaktiśata*, consisting of 101 verses in praise of *Krishṇa*, by *Anantadeva*.

It begins:

भगवद्भजनारंभे संभावय मतिं मम ।
अपाराघारसंसारनिस्ताराय तदेव नः ॥ १ ॥

It ends:

वनिता मुलता सुयोजिता
कृपती सत्पतरी च ताम्यति ।
अथ कल्पतरी हरी स्थिता
कविताकल्पलते विभासि भूरि ॥ १०१ ॥

[H. T. Colebrooke.]

## 2522.

**823b.** Foll. 24; size 12¾ in. by 4½ in.; good, modern Bengalī handwriting; eight lines in a page.

*Susiddhāntapushpāvalī*, a eulogium of *bhakti* as the highest form of *Vishṇu* worship, by *Bhāgavatānanda Gosvāmin.*

It begins:

यानन्देकसरूपा हरिसुयशकरी सिद्धचूडामणिर्या
सा कृष्णप्रेमभक्तिः प्रभवति पतितानां च येषां प्रसादात् ।
येषां पादाब्जरेणुः शिरसि विनिहिता याति चिन्तामणित्वं
नत्वा भक्तानतस्तान्हरिचरणवरा(न्) कोऽपि वक्तीशकीर्तिं [॥ १ ॥
ईशकीर्तिकथनप्रयोजनमाह ।

संसारदुःखजलधिं तरणिस्तितीर्षोः
संकीर्तनं भवतो गुणकर्मनाम्नां ।
श्रुत्वेत्यमच्युतकृपालवमाकलय्य
नीचो ऽपि वच्मि चरितं मधुसूदनस्य ॥ २ ॥

ननु ब्रह्मादिदुःसाध्ये कथं नीचस्य वृत्तिरित्याह । °

It ends:

सुसिद्धान्तपुष्पावलीयं मुरारेः
पदाब्जार्चने सज्जनप्रीतये ऽस्तु ।
मयोपाहृता सात्वतोक्षानतो या
विना वैष्णवानां प्रसादान्न लभ्या ॥

इति भागवतानन्दगोस्वामिविरचिता सुसिद्धान्तपुष्पावली समाप्ता ॥

[H. T. Colebrooke.]

## 2523.

**2599.** Foll. 11; size 12 in. by 5 in.; clear, modern Devanāgarī writing; nine lines in a page.

*Kāśīmṛitimokshavinirṇaya*, or *Kāśīmokshanirṇaya*, a treatise on the efficacy of dying at Kāśī as insuring final emancipation to a devout Hindu; by *Sureśvarācārya.*

It begins: श्रीविश्वनाथाय नमः (see Aufr., Cat. Cat., काशीमोक्षनिर्णयः) ॥

नमस्कृत्य जगन्नाथं मायया चंद्रशेखरं ।
गंगाधरं गरच्छायानीलकंठमुपास्महे ॥ १ ॥

वाराणसीं पुरीं पुण्यां ये ऽधितिष्ठंति जंतवः ।
व्याचष्टे तारकं ब्रह्म रुद्रस्तेषां दयानिधिः ॥ २ ॥

प्राणप्रयाणसमये प्राप्य ज्ञानं महेश्वरात् ।
मुच्यंते जंतवः सर्वे ब्रह्माज्ञानाद्यविद्यया ॥ ३ ॥

मोक्षश्च तेषां तादात्म्यं घटे तरत्वयोरिव(?) ।
पुनर्देहांतरारंभे कारणं नास्ति किंचन ॥ ४ ॥

सालोक्यादेर्न विद्भिः साक्षान्मोक्षत्वमिष्यते ।
उपास्तेः पर(फल marg.)रूपत्वात्तारतम्यपदस्थितेः ॥५॥

ज्ञानाग्निना विनष्टत्वाद्विद्विषा पूर्वकर्मणां ।
उत्तरेषां न विश्लेषो भवेन्मुक्तस्य जीवतः ॥ ६ ॥

प्रारब्धं कर्मभोगेन क्षीयते ज्ञानकारणं ।
ततो विदेहकैवल्यं भवतीति सुनिश्चितं ॥ ७ ॥

काश्यां विदेहकैवल्यप्राप्तेरुत्तरकर्मणां ।
असंभवान्न विश्लेषो वेदितव्यो विचक्षणैः ॥ ८ ॥

किमत्र प्रमाणं । श्रूयते हि । तद्यथा ईषिकातूलमग्नौ प्रोतं प्रदूयते एवमिहास्य सर्वे पाप्मानः प्रदूयंत इति । ° तर्हि पापकर्मणामेव विलयः श्रूयते न पुण्यकर्मणामिति चेत्तत्राह । ब्रह्मादीनां शरीराणि श्वसूकरशरीरवत् । यतो जिहासितव्यानि तस्माद्धर्मे ऽपि पाप्मगोरिति वचनात् । पुण्यकर्मारब्धानां ब्रह्मेंद्रादिशरीराणां पापकर्मारब्धश्वसूकरादिशरीरवज्जिहासितव्यत्वविशेषात्पुण्यस्यापि कर्मणः पाप्मत्वेन कीर्तनं युक्तं ॥ तथा च भगवद्गीतासु श्रूयते । ° further on the opening paragraphs of the *Jābālopanishad* are cited.

It ends: किं बहूक्तेन ॥

येन केनापि यः कश्चिन्निमित्तेन परित्यजेत् ।
काश्यां प्राणान्सर्वजंतुर्मुक्त इत्यवगम्यतां ॥

मोक्षस्य निर्णयः काश्यामित्यमेकेन जन्मना ।
सर्वेषामेव जंतूनां प्रमाणैः प्रतिपादितः ॥

विश्वेश्वरो जयति विश्वविमुक्तिहेतोः
काशीनिवासरसिकः करुणासमुद्रः ।
यत्पादपद्मयुगसौरभवासितस्य
जंतोर्भवत्यकृतके शिवसागरस्य ॥

इति श्रीसुरेश्वराचार्यविरचितः सकलश्रुतिस्मृतिपुराणवाक्यनिर्धारितः काशीमृतिमोक्षविनिर्णयः समाप्तः ॥

On fol. 1*a* the treatise is called *Kāśīmukti-prakāśikā*, cf. Wilson, Mack. Coll. (second ed.), p. 125.

This work, as well as the succeeding one, should perhaps rather have been given under Sacred Law than under *Bhakti*.

[Mack. Coll.]

## 2524.

**1991.** Foll. 55; size 8½ in. by 4 in.; clear, correct, modern Devanāgarī writing (European paper); nine lines in a page.

*Prapañcasāraviveka*, or *Bhavasāraviveka*, a course of moral and religious instruction for pious *Vaishṇavas*, in eight chapters; by *Gaṅgādhara*, son of *Sadāśiva-sūri Mahāḍakara*, and pupil of *Advaitānanda*.

It begins:

नमस्कृत्य शिवानाथं लक्ष्मीकांतं जगद्गुरुं ।
भवानीं दुंढिराजं च दंडपाणिं च भैरवं ॥ १ ॥

गंगां सरस्वतीं रामं वायुपुत्रं जितेंद्रियं ।
देवदैत्यगुरू सूर्यं वाल्मीकिं व्यासनारदौ ॥ २ ॥

अद्वैतानंदपादाब्जं पितरं मातरं गुरुं ।
देवानृषीन् पितॄन् धर्मं काशीं च हृदि भक्तितः ॥ ३ ॥

सदाशिवतनूजन्मा वात्सर्षिकुलसंभवः ।
गंगाधरो ऽतिविख्यातो भगवद्भक्तिकिंकरः ॥ ४ ॥

नानाशास्त्राणि चालोक्य बालानां हितकाम्यया ।
भवसारविवेकं च कुर्वे मोहविनाशकं ॥ ५ ॥

यस्य प्रज्ञानमात्रेण मातेव हितकारिणी ।
बुद्धिर्विवर्धते पुंसां तस्मादाद्रियतां बुधैः ॥ ६ ॥

सुभाषितं विचित्रं च यो नो जानाति मानवः ।
बलीवर्दसमो लोके शोभते शृंगवर्जितः ॥ ७ ॥

रूपयौवनसंपन्ना विशालकुलसूनवः ।
विद्याहीना न शोभंते निर्गंधाः किंशुका इव ॥ ८ ॥

विद्यां प्राप्य प्रयत्नेन धर्ममोक्षं न विंदति ।
अर्थकामपरो नित्यं स वै मूढ इति श्रुतः ॥ ९ ॥

यस्य विद्यापवर्गाय परोपकृतिजीवितं ।
स साधुर्वीर इत्याहुः पंडिताः कवयो महान्(!) ॥ १० ॥

शीलविद्याविहीनेन किं कुलेन च देहिनां ।
अकुलीनो ऽपि विद्वांस्तः पूज्यते दैवतैः सह ॥ ११ ॥

विद्या यशस्करी पुंसां श्रेयःसंतोषदायिनी ।
सम्यगाराधिता विद्या मोक्षदा इति मे मतिः ॥ १२ ॥

शूरश्च कृतविद्यश्च यश्च जानाति सेवितुं ।
रूपयौवनसंपन्ना या नारी धनिकः कविः ॥ १३ ॥

दाता दोग्ध्री सुधेनुश्च मंजुभाषी जितेंद्रियः ।
एते यत्र च तिष्ठंति तत्र लोकाः कृतादराः ॥ १४ ॥

किं तपः किं सुखं दानं को धर्मः कस्य संपदः ।
कः शूरः कश्च विद्वांश्च को लाभः संसृतौ महान् ॥ १५ ॥

को देवः कश्च पूज्यश्च धीरः को बंधुरेव च ।
शत्रुः कः किं च मित्रं च किं फलं जीवितस्य तु ॥ १६ ॥

भूषणं किं पवित्रं च ग्राह्यं किं त्याज्यमेव च ।
तीर्थं किं कश्च सुहृच्च मूर्खः को ब्रूत तत्त्वतः ॥ १७ ॥

I. (*śl.* 17) *upodghāta*; II. (*śl.* 60) *gūḍhārtha-praśnottaranirūpaṇa*; III. (*śl.* 146) *nītimārga-nirūpaṇa*; IV. (*śl.* 55) *karmavipākanirūpaṇa*, on sins and punishments; V. (*śl.* 73) *deva-svarūpanirūpaṇa*, on God (*Vishṇu*); VI. (*śl.* 115) *vāsudevapūjānirūpaṇa*, on the modes of worshipping *Vishṇu*; VII. (*śl.* 105) *bhāgavata-dharmanirūpaṇa*, on the duties of a *Vaishṇava*, and the reward accruing therefrom; VIII. (*śl.* 267) *ahorātrakrityanirūpaṇa*, on religious rites generally.

The verses seem to be partly the author's own, and partly culled from various sources.

The *bhakti*-element, though not too obtrusive, is by no means absent. While a devout adherent of *Vishṇu*, the author is not bigoted, and allows to *Śiva* a certain share

of roligious sontiment. We extract a few passages :

> एको देवो ऽद्वयः कृष्णो वासुदेवो निरंजनः ।
> सर्वाधारः सर्वसाक्षी वेत्ता सर्वावभासकः ॥
>
> सर्वव्यापी नियंता च भूतानां सर्वदेहिनां ।
> मायावी निर्गुणः शुद्धः कर्ता पातांतको गुरुः ॥
>
> यस्यांतःस्थानि भूतानि येन सर्वमिदं ततं ।
> सर्वज्ञो ऽनंतशक्तिश्च विश्वरूपी सुखात्मकः ॥
>
> सत्यो भूतहितो ऽनंतो देवदेवो महेश्वरः ।
> भोक्ता च यज्ञतपसां पवित्रो मंगलं परं ॥
>
> क्रूराणां पापिनां शास्ता भक्तानामभयंकरः ।
> यस्याधीनाश्च देवाश्च गंधर्वाः पितरो नराः ॥ fol. 20*b*.
>
> दुर्लभं भारते वर्षे जन्म तस्मान्मनुष्यता ।
> मनुष्याद्ब्राह्मणत्वं च दुर्लभं सुतरां मतं ॥
>
> लब्ध्वा भक्तिं न कुर्वंति वासुदेवे महात्मनि ।
> जीवन्मृतास्तु ते ज्ञेया न संभाष्याः कदाचन ॥
>
> तच्चित्तस्तद्गतः प्राणः प्रेमभावेन तत्परः ।
> भक्त इत्युच्यते सद्भिर्भीष्मप्रह्लादनारदैः ॥
>
> अद्य श्वो वा मरिष्यंति गमिष्यंति यमालयं ।
> हरिं यदि स्मरिष्यंति तरिष्यंति भवार्णवं ॥
>
> अनित्यमसुखं लोकं जन्ममृत्युजराकुलं ।
> मत्वा तु सततं धीरो नारायणपरो भवेत् ॥
>
> विविक्तदेश आसीनो विरागो विजितेंद्रियः ।
> प्रसन्नचित्तः सततं ध्यायेद्धृदि हरिं परं ॥ ० fol. 22*b*.
>
> शालग्रामशिलाबिंबं कोटिहत्याविनाशनं ।
> संस्मृतं पूजितं ध्यातं कीर्तितं च नमस्कृतं ॥
>
> शालग्रामशिलारूपी यत्र तिष्ठति शंकरः ।
> तत्र देवासुरयक्षभुवनानि चतुर्दश ॥
>
> यवमात्रं तु गर्तः स्याद्यवार्धं लिंगमुच्यते ।
> शिवनाभ इति प्रोक्तस्त्रिषु लोकेषु दुर्लभः ॥
>
> वासुदेवमयं क्षेत्रं लिंगं शिवमयं स्मृतं ।
> तस्माद्धरिहरक्षेत्रे पूजयेच्छंकराच्युतौ ॥ ०
>
> शालग्रामशिला रम्या द्वारकाचक्रसंयुता ।
> तुलसीशंखघंटाद्यैः पूजिता मुक्तिदायिनी ॥
>
> तस्मात्तु ब्राह्मणो नित्यं त्रिकाले भक्तितः शुचिः ।
> शालग्रामशिलायां हि पूजयेद्धरिमव्ययं ॥ fol. 26b.
>
> शालग्रामशिलायाश्च गंगाया गुणवर्णने ।
> तुलस्याश्च विशेषेण न समर्थः प्रजापतिः ॥
>
> तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया ।
> केशवार्थं विचिन्वामि(? न्वामि) वरदा शोभने भव ॥
>
> एवं संप्रार्थ्य तुलसीं गृह्णीयात्तां हरिप्रियां ।
> पूजयित्वा रमाकांतं कृतकृत्यो भवेन्नरः ॥ fol. 29*b*.
>
> ध्यानं परं कृतयुगे त्रेतायां याजनं तथा ।
> द्वापरे विष्णुपूजा च कलौ केशवकीर्तनं ॥
>
> ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरे ऽर्चयन् ।
> यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवं ॥ fol. 34*a*.

It ends :

> य इदं स्मृतिसारार्थं महर्षीणां च संमतं ।
> भक्त्या पठेत्पाठयेद्वा स विद्वान्मुक्तिमाप्नुयात् ॥ २६५ ॥
>
> शास्त्राब्धिमथनाज्जातो ग्रंथो ऽयं पारिजातकः ।
> बुधानां कामदो भूयान्मूढानां भक्ततामपि ॥ २६६ ॥
>
> बहवो यद्यपि ग्रंथाः पादपाः संति भूतले ।
> तथाप्ययं विजयते हरिनामफलैः शुभैः ॥ २६७ ॥

इति श्रीमन्महाडकरोपनामकसदाशिवसूरिसूनुभगवद्भक्तकिं-करगंगाधरविरचिते प्रपंचसारविवेके अहोरात्रकृत्यनिरूपणं नाम अष्टमोल्लासः समाप्तः ॥

For another MS. of this work, see Rāj. Mitra, Notices of Sanskrit MSS., x., p. 162.

[Dr. John Taylor.]

---

## G. Kaśmir Śaivism.

### (*Spanda and Pratyabhijñā.*)

## 2525.

**66a.** Foll. 48; size 11 in. by 6 in.; good, thick (*Kaśmīr*) Devanāgarī writing of about 1750 A.D.; thirteen lines in a page.

*Spandavivṛiti* (or *Spandakārikāvivaraṇa*), a commentary, by *Rājānaka Rāma*, on *Bhaṭṭa Kallaṭa's Spandakārikā* (or *Spandārthasūtrāvalī*), or metrical paraphrase of *Vasugupta's Spandasūtra* (or *Śivasūtra*).

The commentary also includes the text of the *kārikās* as well as that of *Kallaṭa's* own brief explanation (*vṛitti*) of his verses, and is thus an exposition of the whole of the *Spanda-sarvasva*, as *Kallaṭa's Kārikās* and *Vṛitti* are also called.

It begins:

दशादिक्कालाद्यैरकलितचिदालोकवपुषः
सदा तादृक्स्वात्मानुभवितृतया विस्फुरति यः ।
निजो धर्मः शंभोरनुपमचमत्कारसरसः
परं शाक्तं तत्त्वं जयति जगति स्पंद इति तत् ॥

तज्ज्ञैरदर्शितदिशः स्वयमाविशंतः
केचिन्निसर्गगहनं विषमं भ्रमंतु ।
तेनैव यत्पुनरमी हतवर्त्मनान्या
नाकारयंति गमनाय महाभ्रमो ऽयम् ॥

नानावादानिलौघाननचसरकृतान्योन्यसंघट्टघोरो-
द्धातानापातयद्भिः श्रवणविदलनोद्दामशब्दप्रबंधान् ।
शास्त्राब्धिः क्षोभितो यैर्विवरणरभसादुद्यदावर्तभीम-
भ्रांतिभ्रष्टागमार्थप्लवविधुरमतिस्तारितीर्षी जनस्तैः ॥

कश्चिद्भिन्नरुचिर्विदन्नपि परं तत्त्वं विपर्यस्यति
द्वेषध्वांतविरुद्धबुद्धिरितरो भ्रात्यैव चान्यो जडः ।
इत्थं दुर्लभ एव मर्महृदयग्राही गिरां संग्रहः
किं त्वेते ऽद्य विवेकिनः कतिपये संत्यत्र पात्रं सताम् ॥

केनापि ग्रथितां प्रमारणधिया कश्चिद्धि सूत्रे कृताम्
एकीकृत्य यथागमं विरचितां स्पंदार्थसूत्रावलीम् ।
ईशानुग्रहशक्तिवज्रशिलया विद्धेष्वविद्धात्मनो-
माणिक्येषु निवेशयाम्यहमिमां कर्तुं कृतार्थं (r. र्थो)
[द्यमीम् ॥

ओं नमः शिवाय सशिवाय ॥ ओं

[*Kārikā*] यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ ।
तं शक्तिचक्रविभवप्रभवं शंकरं स्तुमः ॥ १ ॥

[*Vṛitti*] अनेन स्वस्वभावस्यैव शिवात्मकस्य संकल्पमात्रेण जगदुत्पत्तिसंहारयोः कारणत्वं विज्ञानदेहात्मकस्य शक्तिचक्रैश्वर्यस्योत्पत्तिहेतुत्वं नमस्कारद्वारेण प्रतिपाद्यते ॥

[*Vivṛiti*] तं शंकरं श्रेयसः कर्तारं स्तुमः प्रशंसामः । तं कं । यस्योन्मेषनिमेषाभ्यां शक्तिप्रसरप्रलयाभ्यां जगतो विश्वस्य प्रलयोदयौ विनाशप्रादुर्भावौ । अत्र यथासंख्यं न विवक्षितमिति वक्ष्यामः । तं कीदृशं । शक्तिचक्रविभवप्रभवं । शक्तीनां वक्ष्यमाणस्वरूपाणां चक्रं समूहः । स एव विभव ऐश्वर्यं तस्य प्रभवः ।° (fol. 4*b*) अभिधानमस्य शास्त्रस्य स्पन्द इति यतः स्पंदतत्त्वविविक्तय इत्यादावित्रैव व्यवहारः । स्पंदशब्दश्चायं स्वस्वभावपरामर्शमात्रस्य नित्यस्य शून्यताव्यतिरेचनकारणभूतस्य तावन्मात्रसंरंभात्मनः शक्त्यपराभिधानस्य पारमेश्वरस्य धर्मस्य किंचिच्चलनात्स्पंद इत्यर्थानुगमाद्वाचकत्वेन व्यपदिष्टः । तत्प्रतिपादनहेतुत्वाच्छास्त्रमपीदं स्पंदशब्देनाभिधीयते । विषयश्चास्य विशुद्धश्रद्धाभक्तिप्रकर्षैरिशुनित(!)परमेश्वरपरशक्तिपातप्रोन्मील्यमानस्वभावालोकतिरस्कृतसकलसंदेहांधकारत्वात्प्रबुद्धः सम्यगुपनतदीक्षादिसंस्कारो गुरुवचनचोदनामात्रावशेषस्वात्मैश्वर्योपलब्धिस्तादृशस्यैवेहोपदेश्यत्वेन पुरस्तात्परिगृहीतत्वादित्यभिधानविषयावप्यवगंतव्यौ ॥ व्याख्यातश्चायमादिश्लोकः । समस्तकरणार्थोपक्षेपगर्भः ॥ १ ॥

We subjoin the text of the remaining *kārikās*, slightly emended with the help of the commentaries and a careful collation kindly supplied by Professor Bhandarkar (B):

यत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम् ।
तस्यानावृतरूपत्वान्न निरोधो ऽस्ति कुत्रचित् ॥ २ ॥ 5*a*.

जाग्रदादिविभेदे ऽपि तदभिन्ने प्रसर्पति ।
निवर्तते निजान्नैव स्वभावादुपलब्धृतः ॥ ३ ॥ fol. 6*a*.

अहं सुखी च दुःखी च रक्तश्चेत्यादिसंविदः ।
सुखाद्यवस्थानुस्यूते वर्तन्ते ऽन्यत्र ताः स्फुटम् ॥ ४ ॥ 8*a*.

न दुःखं न सुखं यत्र न ग्राह्यं ग्राहको न च ।
न चास्ति मूढभावो ऽपि तदस्ति परमार्थतः ॥ ५ ॥ 8*b*.

यतः करणवर्गो ऽयं विमूढो ऽमूढवत्स्वयम् ।
सहान्तरेण चक्रेण प्रवृत्तिस्थितिसंहृतीः ॥ ६ ॥ 9*a*.

लभते तत्प्रयत्नेन परीक्ष्यं तत्त्वमादरात् ।
यतः स्वतन्त्रता तस्य सर्वत्रेयमकृत्रिमा ॥ ७ ॥ fol. 9*b*.

न हीच्छा नोदनस्यायं प्रेरकत्वेन वर्तते ।
अपि त्वात्मबलस्पर्शात्पुरुषस्तत्समो भवेत् ॥ ८ ॥ fol. 10*b*.

निजाशुद्ध्यासमर्थस्य कर्तव्येष्वभिलाषिणः ।
यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम् ॥ ९ ॥ 11*b*.

तदा स्यादकृत्रिमो धर्मो ज्ञत्वकर्तृत्वलक्षणः ।
यतस्तदीप्सितं सर्वं जानाति च करोति च ॥ १० ॥ 12*a*.

तमधिष्ठातृभावेन स्वभावमवलोकयन् ।
स्मयमान इवास्ते यस्तस्येयं कुसृतिः कुतः ॥ ११ ॥ 12*b*.

नाभावो भावि(*r.* भाव्य)तामेति न च तत्रास्त्यमूढता ।
यतो ऽभियोगसंस्पर्शात्तदासीदिति निश्चयः ॥ १२ ॥ 13*a*.

अतस्तत्कृत्रिमं ज्ञेयं सौषुप्तपदवत्सदा ।
न त्वेवं स्मर्यमाणत्वं तत्तत्त्वं प्रतिपद्यते ॥ १३ ॥ fol. 13*b*.

अवस्थायुगलं चात्र कार्यकर्तृत्वशब्दितम् ।
कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम् ॥ १४ ॥ 14*b*.

कार्योन्मुखः प्रयत्नो यः केवलं सो ऽत्र लुप्यते ।
तस्मिंल्लुप्ते विलुप्तो ऽस्मीत्यबुधः प्रतिपद्यते ॥ १५ ॥ 15*a*.

न तु यो ऽन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदं ।
तस्य लोपः कदाचित्स्यादन्यस्यानुपलम्भनात् ॥ १६ ॥ 15*b*.

इति० व्यतिरेकोपपत्तिनिर्देशः प्रथमो निष्यन्दः ॥ fol. 16*a*.

तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।
नित्यं स्यात्सुप्रबुद्धस्य तदाद्यन्ते परस्य तु ॥ १७ ॥ 16*a*.

ज्ञानज्ञेयस्वरूपिण्या शक्त्या परमया युतः ।
पदद्वये विभुर्भाति तदन्यत्र तु चिन्मयः ॥ १८ ॥ fol. 17*b*.

गुणादिस्पन्दनिष्यन्दाः सामान्यस्पन्दसंश्रयात् ।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः ॥ १९ ॥

अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः ।
पातयन्ति दुरुत्तारे घोरे संसारवर्त्मनि ॥ २० ॥

अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये ।
जाग्रदेव निजं भावमचिरेणाधिगच्छति ॥ २१ ॥ fol. 18*b*.

अतिक्रुद्धः प्रहृष्टो वाक्ये(*r.* वा किं) करोमीति वा मृशन् ।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः ॥ २२ ॥ 20*b*.

यामवस्थां समालम्ब्य यदयं मम वक्ष्यति ।
तदवश्यं करिष्ये ऽहमिति संकल्प्य तिष्ठति ॥ २३ ॥

तामाश्रित्योर्ध्वमार्गेण सोमसूर्यावुभावपि ।
सौषुम्णे ऽध्वन्यस्तमितो हित्वा ब्रह्माण्डगोचरम् ॥ २४ ॥ 22*a*.

तदा तस्मिन्महाव्योम्नि प्रलीनशशिभास्करे ।
सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः ॥ २५ ॥ fol. 23*a*.

तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः ।
प्रवर्तन्ते ऽधिकाराय करणानीव देहिनाम् ॥ २६ ॥

तत्रैव संप्रलीयन्ते शान्तरूपा निरञ्जनाः ।
सहाराधकचित्तेन तेन ते शिवधर्मिणः ॥ २७ ॥ fol. 23*b*.

इति० व्यतिरिक्तस्वभावोपलब्धिर्द्वितीयो निष्यन्दः ॥ fol. 25*a*.

यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवात् ।
तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः ॥ २८ ॥ fol. 25*b*.

तेन शब्दार्थचिन्तासु न सावस्था न या शिवः ।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ॥ २९ ॥

इति वा यस्य संपत्तिः(*r.* संवित्तिः) क्रीडात्वेनाखिलं जगत् ।
स पश्यन्सततं युक्तो जीवन्मुक्तो न संशयः* ॥ ३० ॥ 25*b*.

इति० विश्वस्य स्वस्वभावशक्तिमत्त्वोपपत्तिः तृतीयो निष्यन्दः ॥ fol. 27*b*.

अयमेवोदयस्तस्य ध्ये[यस्य ध्यायिचेतसि B.] ।
तदात्मतासमापत्तिरिच्छतः साधकस्य या ॥ ३१ ॥ 27*b*.

इयमेवामृतप्राप्तिरयमेवात्मनो ग्रहः ।
इयं निर्वाणदीक्षा च शिवसद्भावदायिनी ॥ ३२ ॥ 28*a*.

यथेच्छाभ्यर्थितो धाता जाग्रतो ऽर्थान्हृदि स्थितान् ।
सोमसूर्योदयं कृत्वा संपादयति देहिनः ॥ ३३ ॥

तथा स्वप्ने ऽप्यभीष्टार्थान्प्रणयस्यानतिक्रमात् ।
नित्यं स्फुटतरं मध्ये स्थितो ऽवश्यं प्रकल्पयेत् ॥ ३४ ॥ 29*a*.

अन्यथा तु स्वतन्त्रा स्यात्सृष्टिस्तद्धर्मकत्वतः ।
सततं लौकिकस्येव जाग्रत्स्वप्नपदद्वये ॥ ३५ ॥ fol. 30*b*.

यथा ह्यर्थो ऽस्फुटो दृष्टः सावधाने ऽपि चेतसि ।
भूयः स्फुटतरो भाति स्वबलोद्योगभावितः ॥ ३६ ॥

एवं(*r.l.* तथा B.) यत्परमार्थेन यत्र(*r.* येन) यत्र यथा [स्थितम् ।
तत्तथा बलमाक्रम्य नचिरात्संप्रवर्तते ॥ ३७ ॥ fol. 31*a*.

दुर्बलो ऽपि तदाक्रम्य यतः कार्ये प्रवर्तते ।
आच्छादयेद्बुभुक्षां च तथा यो ऽतिबुभुक्षितः ॥ ३८ ॥ 32*a*.

अनेनाधिष्ठिते देहे यथा सर्वज्ञतादयः ।
तथा स्वात्मन्यधिष्ठानात्सर्वत्रैवं भविष्यति ॥ ३९ ॥ 33*a*.

ग्लानिर्विलुंठिता(*r.* ०का†) देहे तस्याश्चाज्ञानतः सृतिः ।
तदुन्मेषविलुप्तं चेत्कुतः सम्याद(*r.* सा स्याद)हेतुका ॥ ४० ॥ [fol. 33*b*.

एकचिन्ताप्रसक्तस्य यतः स्यादपरोदयः ।
उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥ ४१ ॥ 34*a*.

---

* Here, as in other instances where several *ślokas* are taken together for comment, the *vritti* for the whole is given after the *kārikās*, but at the end of the commentary the commentator remarks that the *vrittikrit* has taken them separately, as in the case of these three verses: व्याख्यातमेतद्वृत्तौ पृथक् सर्वात्मक एवायमात्मेत्यादिना तेन तथाविधेनेत्यादिना एवं स्वभावस्येत्यादिना ग्रंथेन ॥

† शरीर विलुंठिका धातुवर्णतेजःशक्त्यादीनां हठेन हर्त्री ।

अतो बिन्दुरतो नादो रूपमस्मादतो रसः ।
प्रवर्तन्ते ऽचिरेणैव क्षोभकत्वेन देहिनः ॥ ४२ ॥ 34*b*.

दिदृक्षयेव सर्वार्थान्यदा व्याप्यावतिष्ठते ।
तदा किं बहुनोक्तेन स्वयमेवावभोत्स्यते (°गम्यते *v.l.* B.)
[॥ ४३ ॥ fol. 35*b*.

प्रबुद्धः सर्वदा तिष्ठेज्ज्ञानेनालोक्य गोचरम् ।
एकत्रारोपयेत्सर्वं ततो ऽन्येन न पीड्यते ॥ ४४ ॥ 36*a*.

शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यताम् ।
कलाविलुप्तविभवो गतः सन्स पशुः स्मितः (*r.* स्मृतः) ॥
[४५ ॥ fol. 36*b*.

[परामृतरसापायस्तस्य यः प्रत्ययोद्भवः ।
तेनास्वतन्त्रतामेति स च तन्मात्रगोचरः ॥ ४६ ॥ B.*]

स्वरूपावरणे चास्य शक्तयः सततोत्थिताः ।
यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः ॥ ४७ ॥ 40*a*.

सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका ॥ ४८ ॥ 41*a*.

तन्मात्रोदयरूपेण मनो ऽहंबुद्धिवृत्तिना (*r.* वर्तिना) ।
पुर्यष्टकेन संरुद्धस्तदुत्थं प्रत्ययोद्भवम् ॥ ४९ ॥

भुङ्क्ते परवशो भोगं तद्भावात्संसरेदपा (*r.* °दतः) ।
संसृतिप्रलयस्यास्य कारणं संप्रचक्ष्महे ॥ ५० ॥ fol. 44*a*.

यदा त्वेकत्र संरूढस्तदा तस्य लयोद्भवौ (°दयौ *v.l.* B.) ।
नियच्छन्भोक्तृतामेति ततश्चक्रेश्वरो भवेत् ॥ ५१ ॥ 45*b*.

इति ° शक्त्यात्मकविद्याव्यतिरेकोपलब्धिः प्रकीर्णश्चतुर्थो निष्यन्दः ॥ fol. 47*a*.

अगाधसंशयाम्भोधिसमुत्तरणतारिणीम् ।
वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम् ॥ ५२ ॥

[*Vṛitti* :] अगाधो ऽप्रतिष्ठो ऽनंतः ॥

समाप्तं स्पंदसर्वस्वं प्रवृत्तं भट्टकल्लटात् ।
स्वप्रकाशैकचित्तत्वपरिरंभरसोत्सुकात् ॥

[*Vivṛiti* :]

दृब्धं महादेवगिरौ महेश-स्वप्नोपदिष्टाच्छिवसूत्रसिंधोः ।
स्पंदामृतं यद्वसुगुप्तपादैः श्रीकल्लटस्तत्प्रकटीचकार ॥

तामशक्यस्वरूपप्रतिपादनां हृदि स्फुरंतीं गुरुभारतीं वंदे । गुरोर्वसुगुप्ताभिधानस्य साक्षात्सिद्धमुखसंक्रांतसमस्तरहस्योपनिषद्भूतस्पंदतत्त्वामृतनिष्यंदस्य भारतीं वाचं स्तौमि ॥ कीदृशीं । अगाधेत्याद्यर्थेन विशेषणम् । ° ending with four benedictory stanzas, the last of which runs thus:

शशिज्योतिर्दीपप्रभृतिभिरशक्यं शमयितुं
यदासीन्निष्पंदीकृतसकललोकं किल तमः ।
गते तस्मिन्नेदानीं क्षयममलसूर्यागमहते
कृतार्थाः संकोचं विजहतु विनिद्रा जनदृशः ॥

संपूर्णेयं वृत्त्यनुसारिणी स्पंदविवृतिः ॥ कृतिस्तत्रभवतो महामाहेश्वराचार्यशिरोमणिराजानकश्रीमदुत्पलदेवानुजीविनो राजानकश्रीरामस्येति शिवम् ॥ °

Quotations are met with in the commentary from *Jñānagarbhastotra*, fol. 41*b*; *Tattvagarbha(stotra)*, foll. 37*a*, 38*a* (यदा त्वेवंविधादत्र निजा भोगकृता पशो । तदा माया स्वरूपेति ज्ञायसे वैभवाश्रयः ॥); the *Pārameśvara*, fol. 3*b* (शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते । शक्तयो ऽस्य जगत्कृत्स्नं शक्तिमांश्च महेश्वर इति ।); *Pratyabhijñā*, foll. 38*a*, 40*b* (*an. ślokas*); *Bhartṛihari*, fol. 30*b* (प्रविभज्यात्मनात्मानं सृष्ट्वा भावान्पृथग्विधान् । सर्वेश्वरः सर्वशक्तिः स्वप्ने भोक्ता प्रपद्यते ॥); *Mālinīvijaya*, fol. 42*b* (तथा च श्रीमालिनीविजये ॥ या सा शक्तिर्जगद्धातुः कथिता समवायिनी । इच्छा त्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते ॥); whilst other schools of Yoga philosophy are referred to at fol. 13*a*: यथान्यैर्योगिभिरुपदिश्यते ।

On the tenets and principal works of the *Kaśmīr Śaivas*, see esp. Hall, Index, pp. 196 seq.; Bühler, Detailed Report, pp. 77 seq.; Bhandarkar, Report 1883-4, pp. 76 seq.

*Bhaṭṭa Kallaṭa*, the disciple of *Vasugupta*, lived under king *Avantivarman*, who reigned about 854 A.D.; whilst *Rājānaka Rāma* calls himself a dependent (or pupil) of *Rājānaka Utpaladeva*, who, if identical with the author of the *Pratyabhijñā*, is assigned by Prof. Bühler to the first half of the tenth century. At the end of his commentary on the *Bhagavadgītā*, *Rājānaka Rāma* (also called *Rāmakaṇṭha*)

* Prof. Bhandarkar's MS. of the *Vivaraṇa* likewise omits the text of this verse, supplied by him from a copy of the *Spandakārikā* in the *Śāradā* character (Rep. of 1875-76, no. 508).

speaks of himself as a younger brother of *Muktākaṇa* (? the same as the poet of that name in the time of *Avantivarman*), and a descendant of *Nārāyaṇa* of Kānyakubja*; whilst in the colophon of a MS. of his *Nareśvaraparīkshāprakāśa* (Rāj. Mitra, Notices, iii., no. 1140) the author is called *Nārāyaṇakaṇṭha-sūnu-Rāmakaṇṭha*.

*Rāmakaṇṭha* is referred to in the *Sarvadarśanasaṃgraha* (Cowell and Gough, transl., p. 125) in the chapter on the *Śaivadarśana*, in connection with the interpretation of the term *puryashṭaka* in the 49th *kārikā* (or rather the corresponding *spandasūtra*), where the present commentary gives the following interpretation (fol. 44*b*): पुर्यां सूक्ष्मशरीरे तन्मात्रपंचकं गुणत्रयमिति स्थूलशरीरकारणभूतमष्टकं यत्तत्त्विचिरं तन्मुख्यं पुर्यष्टकं तत्कार्यत्वात्स्थूलमपि शरीरं तच्छब्देन पुर्यष्टकमित्युच्यते ॥ *Nārāyaṇakaṇṭha* is likewise referred to in the same work (ib. p. 129), apparently as the author of the *Mṛigendravṛitti*.

Fol. 1*a* contains the following note, in Colebrooke's hand, '*Syanda*: a demonstration of the Identity of *Śiva* and his active power or *Śakti*.'
[H. T. COLEBROOKE.]

## 2526.

**1573a.** Foll. 78; size 10 in. by 4½ in.; fair Devanāgarī writing of about 1750 A.D.; nine lines in a page.

*Triṃśikātattvavivaraṇa* (or *Parātriṃśikātattvavivaraṇa*), an exposition, by *Rājānaka Abhinavagupta* (son of *Cukhala*, and disciple of *Utpala*), of the *Triṃśikā* (or *Parātriṃśikā*), a versified treatise of *Kaśmīr Śaiva* philosophy. Very correct.

* यो नारायण इत्यभूच्छ्रुतनिधिः श्रीकन्यकुब्जे द्विजस्
तद्वंशे स्वगुणप्रकर्षसचिते मुक्ताकणाख्यो ऽभवत् ।
तस्यैषा सदृशानुजेन रचिता रामेण विद्वज्जन-
श्लाघ्यत्वात्सफलश्रमेण भगवद्गीतापदार्थप्रथा ॥

It begins:

विमलकलाश्रयाभिनवसृष्टिमहाजननी
भरिततनुश्च पंचमुखगुप्तरुचिर्जनकः ।
तदुभययामलस्फुरितभावविसर्गमयं
हृदयमनुत्तरामृतकुलं मम [सं]स्फुरतात् ॥ १ ॥
यस्यामंतर्विश्वमेतत् स्फुरंत्यां
बाह्याभासंभासमानं विसृष्टौ ।
क्षोभे क्षीणे ऽनुत्तरायां स्थितौ
तां वंदे देवीं स्वात्मसंवित्तिमेकां ॥ २ ॥

नरशक्तिशिवात्मकं त्रिकं हृदये या विनिधाय भासयेत् ।
प्रणमामि परामनुत्तरां निजभासां प्रतिभाचमत्कृतिं ॥ ३ ॥

जयत्यनर्घमहिमा विपाशितपशुव्रजः ।
श्रीमानाद्यगुरुः शंभुः श्रीकंठः परमेश्वरः ॥ ४ ॥
निजशिष्यविबोधाय प्रबुद्धस्मरणाय च ।
मयाभिनवगुप्तेन श्रमो ऽयं क्रियते मनाक् ॥ ५ ॥
श्री[दे]व्यु[वा]च ॥
अनुत्तरं कथं देव सद्यः कौलिकसिद्धिदं ।
येन विज्ञातमात्रेण खेचरी समतां व्रजेत् ॥

परमेश्वरः पंचविधकृत्यमयः सततमनुग्रहमय्या पररूपया शक्त्या स्वाक्रांतो वस्तुतो ऽनुग्रहात्मैव । न हि शक्तिः शिवाद्भेदं मर्शयेत् । सा च शक्तिर्लोकानुग्रहविमर्शमयी प्रथमतः परामर्शमयपश्यंत्या सूत्रयिष्यमाणानंतशक्तिशताविभिन्ना प्रथमतरं परमहामंत्रमय्यामदेशकालकलितायां संविदि निरूढा तावत्पश्यंत्युत्तविष्यदुक्तिप्रत्युक्तिविभागेनैव वर्तते सैव च सकलप्रमातृसंविदद्वयमयी सततमेव वर्तमानरूपा ततस्तु पश्यंती यद्दीप्सितं तदेव समुचितकारणनियमप्रबोधितं बोधसूत्रणमात्रेण विमृशति ॥ °

The succeeding verses are as follows:

एतद्गुह्यं महागुह्यं कथयस्व मम प्रभो† ॥ fol. 14*a*.

हृदयस्था तु या शक्तिः कौलिकी कुलनायिका ।
तां मे कथय देवेश येन तृप्तिं लभाम्यहं ॥ fol. 16*a*.

Comm.: ° तन्मे कथयेत्यपि पठंति । श्रीसोमानंदपादा व्याचक्षते च तत्तस्मादिति यद्वा तत्कथय येन तृप्तिं परमानंदमयीं लभे परमाद्वयनिर्वृतिस्वातंत्र्यरसा भवामीति समन्वयः ॥ व्रजामीत्यपि पाठः ॥ °

शृणु देवि महाभागे उत्तरस्याप्यनुत्तरं ।

† At fol. 25*b* this half-*śloka* and the first *śloka* are referred to as अनुत्तरमित्यादिसार्धश्लोकयुगलं.

कौलिको ऽयं विधिर्देवि मम हृद्योक्म्यवस्थितः ।
कथयामि सुरेशानि सद्यः कौलिकसिद्धिदं ॥ fol. 17*a*.

Comm. fol. 23*b*: तदाहुर्निजवृत्तौ श्रीसोमानंदपादाः । कथयामीत्युच्चारयाम्युत्कलिकात इति । °

अथाद्यास्तिथयः सर्वे स्वरा बिंदुवसानगाः ।
तदंतःकालयोगेन सोमसूर्यौ प्रकीर्तितौ ॥

पृथिव्यादीनि तत्त्वानि पुरुषांतानि पंचसु ।
क्रमात्कादिषु वर्गेषु मकारांतेषु सुव्रते ॥

वाय्वग्निसलिलेंद्राणां धारणानां चतुष्टयं ।
तदूर्ध्वं शादि विख्यातं पुरस्ताद् ब्रह्मपंचकं ॥

अमूला तत्क्रमा ज्ञेया क्षांतिः सृष्टिरुदाहृता ।
सर्वेषामेव मंत्राणां विद्यानां च यशस्विनि ॥

इयं योनिः समाख्याता सर्वतंत्रेषु सर्वदा ॥ fol. 26*a*.

After a general discussion, the explanation of these 4½ *ślokas* begins fol. 44*b*:

सर्वत्र स्वस्वभावात्मकप्रभावप्रख्याप्रसरानिरोधो यस्या इत्यामंत्रणे यस्येति शोभने व्रतेन तदयमत्र संक्षेपार्थः ॥ स्वातंत्र्यैकरसावेशचमत्कारैकलक्षणा । परा भगवती नित्यं भासते भैरवी स्वयं ॥ तस्याः स्वभासा योगो यः सो निरुद्धः सदोदितः । सदाशिवधरा तिर्यङ्नीलपीतसुखादिभिः ॥ भासमानैः स्वस्वभावैः स्वयं प्रथनशालिभिः । प्रथते संविदाकारः स्वसंवेदनसारकः ॥ स्वस्वसंवेदनं नाम प्रमाणमिति वर्ण्यते । बालतिर्यक्सर्वविदो यत्साम्येनैव भासते ॥ इंद्रियाणि त्रिरूपं च लिंगं परवचःक्रमः । सारूप्यमन्यथा योगः प्रतीत्यनुदयो यतः ॥ इत्यादिको यस्य सर्वं द्वारमात्रे निरूप्यते । तत्स्वसंवेदनं प्रोक्तमविच्छेदप्रथामयं ॥ येषां नाक्षत्रिरूपादिनामभावे ऽप्यभिज्ञता । तेषामपि तिरश्चां हि सा सा संवित्प्रकाशते ॥ एवंभासा स्वभावेन स्वरूपामर्शनात्मिका । स्वरूपामर्शनं यच्च तदेव परवाग्वपुः ॥ तद्विचित्रस्वभावत्वाद्विचित्रप्रथनामयं । प्रथने पारतंत्र्यं हि न जातु भजते क्वचित् ॥ अपारतंत्र्यात्संकेतप्रत्यूहादेः कथं स्थितिः । अतः संकेतरहितं स्वस्वरूपविमर्शनं ॥ देशकालकलामायास्थानघातक्रियोत्तरं । परिपूर्णं स्वतः सर्वं सर्वाकारविलक्षणं ॥ स्वाभाविकमहासंवित्सत्संस्कारैकलक्षणं । शुद्धविद्यात्मकं रूपमहमित्युभयात्मकं ॥ तदेव मातृकारूपं धरादीनां निजं वपुः । तत्पारमार्थिकाकारं द्रुत्याशयानस्वरूपतः ॥ बीजयोन्यात्मकं प्रोक्तं शिवशक्तिस्वरूपकं । शिवशक्त्योस्तु संघट्टादन्योन्योच्छलितत्वतः ॥ परस्परसमापत्तिजं जगदानंददायिनी । अंतःस्थविश्वपार्यंतपारमार्थिकसद्वपुः ॥ यद्वीर्यमिति निर्णीतं तद्विश्लेषणयोजना । विसर्ग इति पक्षोक्तं भुमधाम(?) तदुच्यते ॥ अनुत्तरपदावाप्तौ स एव सुघटो विधिः । अस्मादेव त्वमायीयाद्वर्णपुंजाद्विरूपिता ॥ मायामालंब्य भिन्नैव श्रीपूर्वे सृष्टिराक्षसी । पंचाशद्भेदसंभिन्नप्रत्ययप्रसवात्मिका ॥ बंधरूपा स्वभावेन स्वरूपा वरणात्मिका । अत्रैवांतर्गतास्तास्ताः खेचर्यो विषयात्मिकाः ॥ तन्वते संसृतिं चित्रां कर्ममायाणुतामयीं । अस्यां साम्यं स्वभावेन शुद्धभैरवतामयं ॥ प्रोक्तं प्रागेव जीवत्वं मुक्तत्वं पारमार्थिकं । भिन्नाया वर्णसृष्टेश्च तदभिन्नं वपुः परं ॥ वीर्यमित्युक्तमत्रैव यद्रूप्या मंत्रगुप्तता । तदेतदहमित्येव विसर्गानुत्तरात्मकं ॥ स्वं स्वभावं परं ज्ञानज्जीवन्मुक्तः सकृद्बुधः । सिद्धादिप्रेप्सवस्तेन क्रमसंकोचसूत्रितं ॥ नाभिकुंडलहृद्ब्रह्मस्थयोगिनोऽहमुपासते(?) । तदेतत्किल निर्णीतं यथागुर्वागमं मनाक् ॥ एतां संविदमालंब्य यत्स्यात्प्रवृक्ष्यतां स्वयित् । नैतावतैव तुलितं मार्गीशस्तु प्रदर्शितः ॥ इयतीति व्यवच्छिंद्याद्भैरवीं संविदं हि कः । एतायाश्शक्तिपातो ऽयमस्मासु प्रविजृंभितः ॥ येनाधिकारितैरेतदस्माभिः प्रकटीकृतं । अस्माकमन्यमातॄणामद्य कालांतरे ऽपि वा ॥ भवत्यभूत्वाभयिता तत्कः सूक्ष्मतमो ऽप्यतः । यः सर्वयोगावयवप्रकाशेषु गभस्तिमान् ॥ श्रीपूर्वशास्त्रे निर्णीतो येन मुक्तश्च मोचकः । एतत्तु सर्वथा ग्राह्यं विमृश्य च परेप्सुभिः ॥ क्षणं मर्त्यत्वसुलभां हित्वासूयां विचक्षणैः । आलोचलक्षणादूर्ध्वं यद्भवेदात्मनि स्थितिः ॥ चिदर्कोज्ज्वलवास्तेन संशाम्यंते स्वतांरतात् ॥ Then follows a *prākrit* passage: परसंवेयण भासमजइण चिर अरमुहसो आइसजइणसइ भासइस ° fol. 56*b*.

ततश्च विस्तरतो ऽनुत्तरस्वरूपनिरूपणाय ग्रंथावतारस्तन्निरूपयति ॥ चतुर्दशयुतं भद्रे तिथीशांतसमन्वितं । तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः ॥ एतन्नायोगिनीजातो नारुद्रो लभते स्फुटं । हृदयं देवदेवस्य सद्यो योगविमोक्षदं ॥ अस्योच्चारे कृते सम्यङ्मंत्रमुद्रागणो महान् । सद्यस्तन्मुखतामेति स्वं देहावेशलक्षणं ॥ मुहूर्तं स्मरते यस्तु चुंबकेनाभिमुद्रितः । स बध्नाति तदा सर्वं मंत्रमुद्रागणं नरः ॥ अतीतानागतानर्थान्पृष्टो ऽसौ कथयत्यपि । प्रहराद्यदभिप्रेतं देवतारूपमुच्चरन् ॥ साक्षात्पश्यत्यसंदिग्धमाकृष्टं रुद्रशक्तिभिः । प्रहरद्वयमात्रेण व्योमस्थो जायते स्मरन् ॥ त्रयेण मातरः सर्वा योगेश्वर्यो महाबलाः । वीरा वीरेश्वराः सिद्धा बलवाञ्शाकिनीगणः ॥ आगत्य समयं दत्त्वा भैरवेण प्रचोदिताः । यच्छंति परमां सिद्धिं फलं यद्वा समीहितं ॥ अनेन सिद्धाः सेत्स्यंति साधयंति च मंत्रिणः । यत्किंचिद्भैरवे तंत्रे सर्वमस्मात्प्रसिध्यति ॥ अदृष्टमंडलो ऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः । प्रसिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः ॥ fol. 59*a*.

°यदुक्तं कुलात्परतरं त्रिकमिति सर्वोत्तरमनुत्तरत्वं तन्निरूपयति ।

अदृष्टमंडलो ऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः ।
स सिद्धिभाग् भवेन्नित्यं स योगी स च दीक्षितः ॥
[fol. 68*b*.

अनेन ज्ञातमात्रेण ज्ञायते सर्वशक्तिभिः । fol. 69*a*.

शाकिनीकुलसामान्यो भवेद्योगं विनापि हि ।
अविधिज्ञो विधानज्ञो जायते यजनं प्रति ॥

कालाग्निमादितः कृत्वा मायांतं ब्रह्मदेहगं ।
शिवो विश्वाद्यनंतश्च परशक्तित्रयं मतं ॥ fol. 69*b*.

तदंतर्वर्ति यत्किंचिच्छुद्धमार्गे व्यवस्थितं ।
अणुविशुद्धमचिरादैश्वरं ज्ञानमश्नुते ॥
तत्रोदकः शिवो ज्ञेयः सर्वज्ञः परमेश्वरः ।
सर्वगो निर्मलः स्वच्छस्तृप्तः स्वायतनः शुचिः ॥
यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं जगदेतच्चराचरं ॥
एवं यो वेत्ति तत्त्वेन तस्य निर्वाणगामिनी ।
दीक्षा भवत्यसंदिग्धा तिलाज्याहुतिवर्जिता ॥ fol. 70*a*.

मूर्ध्नि वक्त्रे च हृदये गुह्ये मूर्तौ तथैव च ।
न्यासं कृत्वा शिखां बद्ध्वा सप्तविंशतिमंत्रितां ॥
एकैकं तु दिशां बंधं दशानामपि योजयेत् ।
तालत्रयं पुरा दत्त्वा सशब्दं विघ्नशांतये ॥
शिखासंख्याभिजप्तेन तोयो नाभ्युक्षयेत्ततः ।
पुष्पादिकं क्रमात्सर्वं लिंगे वा स्थंडिले च वा ॥
चतुर्दशाभिजप्तेन पुष्पेणासनकल्पना ।
ततः सृष्टिं यजेद्वीरः पुनरेवासनं ततः ॥
सृष्टिं तु संपुटीकृत्य पश्चाद्यजनमारभेत् ।
सर्वतत्त्वसुसंपूर्णां सर्वाभरणभूषितां ॥
यजेद्देवीं महेशानीं सप्तविंशतिमंत्रितां ।
ततः सुगंधिपुष्पैस्तु यथाशक्त्या समर्चयेत् ॥
पूजयेत्परया शक्त्या आत्मानं च निवेदयेत् ।
एवं यजनमाख्यातमग्निकार्ये ऽप्ययं विधिः ॥ fol. 71*b*.

कृतपूजाविधिः सम्यक् स्मरन्बीजं प्रसिध्यति ॥ 73*b*.

आद्यंतरहितं बीजं विकसत्तिथिमध्यगं ।
हृत्पद्मांतर्गतं ध्यायेत्सोमांशं नित्यमभ्यसेत् ॥ fol. 75*a*.

यान्यान्कामयते कामांस्तांस्ताञ्शीघ्रमवाप्नुयात् ।
तस्मात्प्रत्ययमाप्नोति सर्वज्ञत्वं न संशयः ॥

एवं मंत्रफलप्राप्तिरित्येतद्रुद्रयामलं ।
एतदभ्यासतः सिद्धिः सर्वज्ञत्वमवाप्यते ॥

Whether any other verses occurring in the MS. belong to the original treatise, it is difficult to make out.

*Abhinavagupta's* exposition concludes with the following genealogical account:

इत्थं प्रपन्नजनतोद्धरणप्रवृत्त-
श्रीमन्महेश्वरपदांबुजचंचरीकः ।
वृत्तिं व्यधात् त्रिकरहस्यविमर्शगर्भां
काश्मीरकाबुलकादधिगम्य* जन्म ॥ १ ॥

एतावदेतदिति कस्तुलयेत्प्रसह्य
श्रीशांभवं मतमनर्गलिताश्च वाचः ।
एतत्तु तावदखिलात्मनि भाति यन्मे
भातं ततो ऽत्र सुधियो न पराङ्मुखाः स्युः ॥ २ ॥

अज्ञस्य संशयविपर्ययभागिनो वा
ज्ञानं प्रकंपरहितं प्रकरोति सम्यक् ।
रूढस्य निश्चयपतो हृदयप्रतिष्ठां
संवादिनीं प्रकुरुते कृतिरीदृशीयं ॥ ३ ॥

एतावदर्थरससंकलनाधिरूढ-
धारानिरूढहृदयो विमृशेदतो ऽपि ।
यद्युत्तरं तदपि नैव सहेत नेदं
सोपानमेतदमलं पदमारुरुक्षोः ॥ ४ ॥

काश्मीरेषु यशस्करस्य नृपतेरासीदमात्याग्रणीः
श्रीमान्वल्लभ इत्युदाहृततनुर्यः प्राग्यजन्मा द्विजः ।
तस्य स्वांगभवः प्रसिद्धपदवीपात्रं समग्रैर्गुणैः
श्रीशौरिः शिशुचंद्रचूडचरणध्यानैकरत्नाकरः ॥ ५ ॥

शीलस्यायतनं परस्य यशसो जृंभास्पदं नर्मभूर्
वात्सल्यस्य समग्रलोककरुणाधर्मस्य जन्मस्थितिः ।
श्रीमद्वत्सलिकाभिधा च सहजा(सहचरी B.) तस्यैव
[भक्त्युल्लसत्
प्रोद्भ्रांतवृत्तिशंकरनुतौ यस्या मनो जृंभते ॥ ६ ॥

तस्यैवात्मभवो विभावितजगत्सर्गस्थितिः शंकर-
ध्यानार्चापरिचिंतनैकरसिकः कर्णाभिधानो द्विजः ।
यो बाल्ये ऽप्यथ यौवने ऽपि विषयासक्तिं विहाय
[स्थिराम्
एतामाश्रयते विमर्शपदवीं संसारनिर्मूलिनीं ॥ ७ ॥

---

* Prof. Bühler's Report has काश्मीरिकाद्बिबुलकादधिगम्य.

भ्राता ममैव शिवशासनरूढचेताः
प्रेप्सुः परात्मनि मनोरथगुप्तनामा ।
यः शास्त्रतंत्रमखिलं प्रविवेक्तुकामः
प्राप्तुं परं शिवपदं भवभेदनाय ॥ ८ ॥

शिवशास्त्रैकरसिकः पदवाक्यप्रमाणवित् ।
रामदेवाभिधानश्च भूषितोत्तमजन्मकः ॥ ९ ॥

एतत्प्रियहितकरणप्ररूढहृदयेन मन्मया रचितं ।
मार्गप्रदर्शनं तासयैस्य शिवाप्तये भूयात् ॥ १० ॥

अंतर्वेद्यामत्रिगुप्ताभिधानः*
प्राप्योत्पत्तिं प्राविशत्प्राग्र्यजन्मा ।
श्रीकाश्मीरांश्चंद्रचूडावतारैर्निः-
संख्याकैः पावितोपांतभागान् ॥ ११ ॥

तस्यान्ववाये महति प्रसूताद्वराहगुप्तात्प्रतिलब्धजन्मा ।
संसारवृत्तांतपराङ्मुखो यः शिवैकचित्तश्चुखलाभिधानः [॥ १२ ॥

तस्माद्विवेचितसमस्तपदार्थशास्त्राल्
लब्ध्वापि देहपदवीं परमेशपूतां ।
प्राप्ताभयो ऽभिनवगुप्तपदाभिधानः
प्रावेशयत् त्रिकसतत्त्वमिदं निगूढं ॥ १३ ॥

ये तावत्प्रविवेकवंध्यहृदयास्तेभ्यः प्रणामो वरः
के ऽप्यन्ये प्रविविंचते न च गताः पारं धिगेताञ्जडान् ।
यस्त्वंतः प्रविमर्शसारपदवीसंभावनासु स्थितो
लक्षैको ऽपि स कश्चिदेव सफलीकुर्वीत यत्नं मम [॥ १४† ॥

स्वात्मानं प्रविवेक्तुमप्यलसतां ये बिभ्रति प्रार्थना[त्]
तान्प्रत्यात्मकदर्थनाच्च परतः किंचित्फलं शोध्यते ।
विष्वग्व्याप्य विविक्तये स्थिरधियो ये संरभंते पुनस्
तानभ्यर्थयितुं मयैव विहितो मूर्ध्ना प्रणामादरः ॥ १५ ॥

भ्राम्यंतो भ्रमयंति मंदधिषणास्ते जंतुचक्रं जडं
स्वामी कृत्यगुणाभिधानवशतो बद्ध्वा दृढं बंधनैः ।
दृष्ट्वेत्थं गुरुभारवाहविधये यातानुयातान्प्रभूं-
स्तत्पाशप्रविकर्तनाय घटितं ज्ञानत्रिशूलं मया ॥ १६ ॥

बह्वीभिरपि सो ऽहमेव भ्रमितस्तत्त्वोपदेशक्रमैः ।
तत्त्वमिति वर्णद्वय(r. युग)मपि रसना येषां न पस्पर्श ॥ १७ ॥

परमेश्वरः प्रपन्नोद्धरणकृपाप्रयुक्तगुरुहृदयः ।
श्रीमान्देवः शंभुर्मामियति नियुक्तवांस्तत्त्वे ॥ १८ ॥

तत्तत्त्वनिर्मलस्थितिविभागिहृदये स्वयं प्रविष्टमिव ।
श्रीसोमानंदमतं प्रविमृश्य मया निबद्धमिदं ॥ १९ ॥

हंहो हृच्चक्रचारप्रविरचनलसन्निर्भरानंदपूर्णा-
देव्याः सत्पाशकोटिप्रविघटनपटुज्ञानशूलोर्ध्वधाराः ।
चेतोवाक्कायमेतद्विगतभवभयोत्पत्ति युष्मासु सम्यक्
प्रोतं यत्नेन मह्यं व्रजत किल हृदि द्राक्प्रसादं प्रसह्य [॥ २० ॥

व्याख्यादिकर्मपरिपाटिपदे नियुक्तो
युष्माभिरस्मि गुरुभावमनुप्रविश्य ।
वाक्चित्तचापलमिदं मम तेन देव्यास्
तच्चक्रचारुचतुरस्थितयः क्षमध्वं ॥ २१ ॥

समाप्तमिदं त्रिंशिकातत्त्वविवरणं ॥ कृतिस्त्रिनयनचरणचिं-
तनलब्धप्रसिद्धेः श्रीमद्राजानकाभिनवगुप्तस्य ॥

शतैरेकोनविंशत्या त्रिंशिकेयं विवेचिता ।
सर्वेषु त्रिकशास्त्रेषु ग्रंथीन्निर्दलयिष्यति ॥

शुभमस्तु सर्वजगतां परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु शांतिं सर्वत्र सुखी भवतु लोकः ॥

From the way in which *Somānanda* is referred to in the above extracts, it seems clear that he must have been the author of the *Triṃśikā* (see Hall, Index, p. 198, where the author is called *Someśvara*), and that he also wrote a commentary on his own verses, referred to as *nijavṛitti* (once *nijavivṛiti*, fol. 55*a*). His *Śivadṛishṭi* is likewise quoted at foll. 29*b*, 33*a* (where *Somānanda* is expressly mentioned as the author), 75*a*; whilst a *śloka* by him is quoted at fol. 17*b* [यदुक्तं सोमानंदपादैरपरस्थितौ । मा बुद्धियेत्पुनः सूक्ष्मं सर्वदिक्कमवस्थितं । ज्ञानं बोधमयं तस्य शिवस्य सहजं सदेति]. And further, fol. 25*a*: तथा हि केषुचिद्वृद्धपुस्तकेष्वीदृक् श्लोकांतरं दृश्यते। श्रुतं देव महाज्ञानं त्रिकाख्यं परमेश्वर । उत्तरं च तथा ज्ञानं त्वत्प्रसादावधारितमिति ॥ तदस्मच्छ्रीसोमानंदपादनिरूपितव्याख्यानुसारेणैव यद्गुरवः समादिक्षंस्तदेव सर्वस्य करोति शिवं । ०

* Prof. Bühler's MS. reads अन्तर्वेद्यां मंत्रिगुप्ताभिधानः

† The MS. again makes this verse 13; the succeeding verses then being likewise numbered wrongly. See Prof. Bühler's Report, where a similar mistake is made by the two *Śālinī* verses 11 and 12 being numbered as a single stanza.

*Abhinavagupta* quotes his own *Śivadṛishṭyālocana* at fol. 30*b*; his commentary *Kramakeli* on (? his own) *Kramastotra*, fol. 64*b*; and four verses from a *stotra* (or *stotras*) of his (मयैव स्तोत्रे । ? the *Kramastotra*), each in a different metre, foll. 15*b*, 44*b*, 53*a*, 60*a*. We also read, fol. 7*a*: तदेतच्छ्री-*Pūrvapañcikāyām* मयैव विस्तरतो निर्णीतमिहानुपयोगाद्‌ग्रन्थगौरवाच्च न वितत्योक्तं ।; fol. 44*a*: वितत्य च विचारितं मयैतत् *Padārthapraveśanirṇayaṭīkāyām* इति किमिह वृथा वाग्जालेन: and further fol. 4*b* (an *āryā*) without any introduction: गोप्यमुपदेशसारं सद्यो भैरवपदावहं सततं । अभिनवगुप्तेन मया व्याख्यातं प्रश्नसर्वस्वे ॥ and fol. 16*b*: तदत्र प्रश्नसर्वस्वे ॥ श्रीभैरव उवाच ॥ व्याख्यातं प्रागेवैतत् किं पुनरुक्तता पादनेन भैरवो भरणात्मको महामंत्ररवात्मकश्च ॥

Other authorities referred to are: (*śrīmad-*) *Ucchushmaśāstra*; *Utpaladeva*, fol. 7*b* [ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतं ॥]; fol. 9*a* [स क्रमश्च लौकिक्याः क्रियायाः कालशक्तितः । घटनेन तु शाश्वत्याः प्राभव्याः स्यात्प्रभोरपि ॥]; fol. 52*b* (*Īśvarapratyabhijñāṭīkāyām*); *Kallaṭa*, fol. 27*b* [यदाहुः श्रीकल्लटपादाः । त्रुटिपाते सर्वज्ञत्वसर्वकर्तृत्वलाभ इति ॥]; *Kālottara*, fol. 42*a*; *Kiraṇa* (one *śloka*), fol. 69*b*; *Kubjikā(tantra)*, fol. 49*b* [तथा श्रीकुब्जिकामते चक्रविचारे मुनेवार्थं प्रधानतयाधिकृत्यादिष्टं । मायोपरि महामाया त्रिकोणानंदरूपिणीत्यादि ॥]; *Guhyayoginītantra*, fol. 51*a* (two *ślokas*); *Tantrasamuccaya*, fol. 21*a* (one *śloka*: नरशक्तिशिवावेशि °); *Tantrasāra*, fol. 5*b* [चिंशिकार्थस्त्वया प्रोक्तः सार्धकोटिप्रविस्तरः], fol. 30*b* (*śl.*), fol. 46*b* [निजोत्तमोगच्छायातश्च्युम् ।]; *Tilakaśāstra* (? *Śāradātilaka*), fol. 64*a*; *Trikatantrasāra*, fol. 49*b* [शिवशक्तिसमापत्त्या शिवशक्तिघनात्मकः । °], fol. 60*b* [आनंदप्रसरः पूजा तां त्रिकोणे प्रकल्पयेत् । °]; *Trikahṛidaya*, fol. 4*a* [नित्यं विसर्गपरमः स्वशक्तौ भैरवो विभुः ।°], fol. 41*b*; *Triratnakula*, fol. 51*b* [अष्टाष्टकविभेदेन मातृकाया निरूपितं । तदेव कुलचक्रं तु तेन व्याप्तमिदं जगदिति ॥ मातृकाज्ञानभेदे विस्तरतो निरूपितमेतत् ॥]; *Nārāyaṇa Bhaṭṭa* or *Bh. N.*, fol. 18*a* [त्रैलोक्ये ऽप्यत्र यो यावानानंदः कश्चिदीक्ष्यते । स बिंदुर्यस्य तं वंदे देवमानंदसागरं ॥], fol. 54*b* [प्रणवोर्ध्वार्धमात्रार्थो ऽप्यणव इति ।]; *Niśācara*, fol. 24*a* [वाममार्गाभिषिक्तो ऽपि दैशिकः परतत्त्ववित् । संस्कार्यो भैरवे सो ऽपि कुले कौले त्रिके ऽपि सः ॥]; *Pañcasrotaḥ-prabhṛitīni śāstrāṇi*, fol. 4*b*; (*bhagavat*) *Pushpadanta*, fol. 47*a* [स्तुतिसामान्यात्त्वासिद्धमिति शून्ये हि निश्चले रूपे ऽनुप्रविविक्षायां भास्वररूपसंवित्तिसोपानक्रमेण ° इति ।]; *Pūrvaśāstra*, fol. 40*a* [यथेष्टफलसंसिद्धौ मंत्रतंत्रानुवर्तिना ।°], fol. 58*a* (cp. p. 839*b*, l. 34), fol. 65*b* [सार्धेन त्रितयं व्याप्तं त्रिशूलेन चतुर्थकं । °]; *Bhargaśikhā*, fol. 64*a* [वीरव्रतं चाभिनंदेद्यथायोगं तथाभ्यसेत् ।]; *Bhartṛihari* (*śl.*) fol. 33*b*, (*vākyavicāre*) fol. 65*b*; *Mālinītantra*, fol. 21*a* [एवं सर्वानुसंधानं ° *śl.*], fol. 31*b* (*mālinī-vijayottara-siddhātantrasvacchandādiśāstreshu*); *Mukuṭasaṃhitā*, fol. 64*b* [जातीनां च ब्राह्मणादीनां नास्ति स्थितिः कल्पितत्वादुपदेशव्यंगमेति तु दुर्बुद्धीन्मण्डूनप्रत्याययेदिति च भगवता मुकुटसंहितायां विस्तरतो निर्णीतं ॥]; *Vadyatantra*, fol. 9*b* [संरुध्य रश्मिचक्रं स्वं पीत्वामृतमनुत्तमं । कालोभयपरिच्छिन्नं वर्तमाने सुखी भवेत् ॥]; *Vāmana*, fol. 53*a* (after quoting a verse from his own *stotra*, he adds इत्येष एव श्रीवामनविरचिते द्वयसंपत्तिवार्त्तिके उपदेशनयो बोद्धव्यः); *Vājasanīyatantra* (!), fol. 41*b* [तथा श्रीवाजसनीयतंत्रे वर्णान्यथोचितं निवेश्योक्तं । इत्येतन्मातृकाचक्रं दिव्यं विष्णुपदास्पदं ज्ञातं गुरुमुखात्सम्यक्पशोः पाशान्निकृंततीति ॥]; *Vīrāvalīśāstra*, fol. 64*a*; *Vaishṇavavāmaśāstrāṇi*, fol. 42*a*; *Śarvācāra* (!), fol. 24*a* [दैशिकः परतत्त्ववित् °]; *Sarvācāra*, fol. 64*a* [अज्ञानाच्छंकते मूढस्ततः सृष्टिश्च संहृतिः ।° 4 *śl.*]; *Śaivavāmaśāstrāṇi*, fol. 42*a*; (*bhaṭṭāraka-*) *Śrīkaṇṭha* (*-pāda*), fol. 52*b* [पश्यत्यन्यच्छृणोत्यन्यत्करोत्यन्यच्च जल्पति । चिंतयत्यन्यदाभुंक्ते तथासांकेतिकी स्थितिः ॥]; *Siddhisantāna*, fol. 24*a* [प्रकाशमाना भासैव यत्प्रतिस्तत्सदैव हि ।]; *Spandaśāstra*, fol. 5*b* [इति वा यस्य संवित्तिः क्रीडा त्वेनाखिलं जगत् । °], fol. 24*a* [तदस्ति परमार्थतः ।]; *Svacchandatantra*, fol. 4*a* [गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः । पूर्वोत्तरपदैर्वाक्यैस्तंत्रं समवतारयत् ॥].

Prose *Prākrit* passages occur on foll. 5*a*, 5*b*, 17*a*, 24*b*, 29*a*, 58*a*, 74*b*, without any indication as to their source.

The etymology of '*triṃśikā*' is discussed at fol. 5*a*: अभिनयानां त्रीशिकेति । तिसृणां शक्तीनामिच्छा-

ज्ञानक्रियाणां सूक्ष्मासुयोगादिनामांतरनिर्देश्यानामीशिका ईश्वरी ईशना चेशितव्या व्यतिरेकेणैव भाविनीत्येतच्छक्तिभेदत्रयोत्तीर्णा तच्छक्त्यविभागमयी संविद्भगवतीभट्टारिकापराभिधेयं। तद्योगादेव चेदमभिधानं त्रिंशिकेत्यपि गुरवः पठंति । अक्षरवर्णसाम्याच्च निरुक्तमाहुः । तिस्रः शक्तीः कायतीति त्रिंशिका। न तु त्रिंशच्छ्लोकयोगात्त्रिंशिका । एतावतो ऽपि त्रिंशिकार्थत्वात् ॥ तथा हि श्रीतंत्रसार° (p. 840*a*, l. 28).

The leaves are marked श्री° परा° (fol. 1 पराविं°).

Regarding the author (c. 1000 A.D.), see Bühler, Detailed Rep. on Kaśmīr MSS., p. 80.

[H. T. COLEBROOKE.]

## 2527.

**2235.** Foll. 61; size 7 in. by 5½ in.; in European manner; fairly good, modern Devanāgarī writing; twenty-two lines in a page.

*Paramārthasārasaṃgraha*, a summary of the *Śaiva* doctrine, by *Abhinavagupta*; with a commentary (*vivṛiti*) by *Rājānaka Yogarāja*, of Vitastāpurī.

The commentary begins:

चिद्घनो ऽपि जगन्मूर्त्या श्यानो यः स जयत्यजः ।
स्वात्मप्रच्छादने क्रीडाविदग्धः परमेश्वरः ॥

यो ऽयं व्यधायि गुरुणा युक्त्या परमार्थसारसंक्षेपः ।
विवृतिं करोमि लघ्वीमस्मिन्विद्वज्जनार्थितो योगः ॥

इह शिवाद्वयशासने देहादिप्रमातृप्राधान्यसकल्यसमुत्कशंकातंकालस्यसंशयादिरूपविघ्नौघप्रसरप्रध्वंसपूर्विकां शास्त्रनिष्पत्तिं मन्यमानः परिमितप्रमातृताधस्पदीकारेण चिदानंदैकघनस्वात्मदेवतासमावेशशालिनीं समस्तशास्त्रार्थसंक्षेपगर्भां प्रथमतस्तावत्परमेश्वरप्रवणतां परामृशति ।

परं परस्थं गहनादनादिमेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं त्वामेव शंभुं शरणं प्रपद्ये ॥ १ ॥

The last *śloka* of the text runs thus:

आर्याशतेन तदिदं संक्षिप्तं शास्त्रसारमतिगूढम् ।
अभिनवगुप्तेन मया शिवचरणस्मरणदीप्तेन ॥ १०३ ॥

The commentary ends:

श्रीमतः क्षेमराजस्य(योगराजस्य Oxf.) सद्गुर्वाम्नायशासाक्षात्कृतमहेशस्य तस्यांतेवासिना मया ॥ [लिनः ।
श्रीवितस्या(*r.* वितस्ता)पुरीधाम्ना विरक्तेन तपस्विना ।
विवृतिर्योगनाम्नेयं पूर्णाद्वयमयी कृता ॥

इति श्रीपरममहेश्वरश्रीराजानकयोगराजस्य कृतिः परमार्थसारसंग्रहविवृतिरियं संपूर्णा ॥

The author would seem to have been a pupil of *Abhinavagupta*, as well as of the latter's pupil *Kshemarāja*. For the same works, see Aufrecht, Cat. Bodl., no. 575, where a list of the works quoted by the commentator is given.

[R. JOHNSON.]

## 2528.

**1256c.** Foll. 23; size 8¾ in. by 4 in.; fairly written, in Devanāgarī, towards the end of last century; nine lines in a page.

*Īśvarapratyabhijñāhṛidaya*, a string of twenty aphorisms, embodying the essence of the doctrine of 'recognition'; with a commentary, by (*Rājānaka*) *Kshemarāja* (pupil of *Abhinavagupta*).

It begins:

नमः शिवाय सततं पंचकृत्यविधायिने ।
चिदानंदघनस्वात्मपरमार्थावभासिने ॥

शांकरोपनिषत्सारप्रत्यभिज्ञामहोदधेः ।
उद्धरामि परं सारं संसारविषशांतिदम् ॥

इह ये सुकुमारमतयो ऽकृततीक्ष्णतर्कशास्त्रपरिश्रमाः शक्तिपातवशोन्मिषितपरमेश्वरसमावेशाभिलाषिणः कतिचिद्भक्तिभाजस्तेषामीश्वरप्रत्यभिज्ञोपदेशतत्त्वं मनागुन्मील्यते । तत्र स्वात्मदेवताया एव कारणत्वं सुखोपायप्राप्यत्वं च महाफलमभिव्यंक्तुमाह ।

चितिः स्वतंत्रा विश्वसिद्धिहेतुः ॥ [१] ॥ विश्वस्य सदाशिवादेः भूम्यंतस्य सिद्धौ निष्पत्तौ प्रकाशने स्वेतात्मनि परप्रमातृविश्रांत्यात्मनि संहारे । परा शक्तिरूपा चितिरेव । भगवती स्वतंत्रविमर्शमयी शिवभट्टारकाभिन्ना हेतुः कारणं ॥ अस्यां हि प्रसर्पंत्यां जगदुन्मिषति व्यवतिष्ठते च निवृत्तप्रसरायां च निमिषतीति स्वानुभवात्र साक्षी ॥ अन्यस्य तु मायाप्रकृत्यादेश्चित्प्रकाशभिन्नस्याप्रकाशत्वेनासत्त्वादपि न क्वचिद्धेतुत्वं । प्रकाशमानत्वे तु प्रकाशैकात्म्यात् प्रकाशरूपा चिदेव हेतुः । न त्वसौ कश्चित् । अत एव देशकालाकारा एतत्सृष्टा एतदनुप्राणिताश्च नैतत्स्वरूपं

भेत्तुमलमिति व्यापकनित्योदिता परिपूर्णरूपेयमित्यलभ्यमेवैतत् ॥ ननु जगदपि चितो भिन्नं नैव किंचित् । अभेदे च कथं हेतुहेतुमद्भाव उच्यते । चिदेव भगवती स्वच्छस्वरूपा तत्तदनंतजगदात्मना विश्वरूपेण स्फुरतीत्येतावत्परमार्थो ऽयं कार्यकारणभाव: । यत्त्वेयमेव प्रमातृप्रमाणप्रमेयमयस्य विश्वस्य सिद्धौ प्रकाशने हेतुस्ततो ऽस्या: । स्वतंत्रावच्छिन्नस्वप्रकाशरूपाया: सिद्धौ प्रकाशने । अभिनवार्थप्रकाशरूपं न प्रमाणं वराकमुपयुक्तमुपपन्नं वा ।°

ननु यदि विश्वस्य चितिर्हेतुस्तदास्या उपादिनाद्यपेक्षायां भेदवादापरित्याग: स्यादित्याशंक्याह ।

स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति ॥ [२] ॥ स्वेच्छया न तु ब्रह्मादिवदन्येच्छया तथैव चारुरूपादानाद्यपेक्षाया एवं हि प्रागुक्तस्वातंत्र्यहान्याचित्त्वमेव न घटेत स्वभित्तौ न त्वन्यत्र । क्वापि प्राक् निर्णीतं विश्वं दर्पणनगरवदभिन्नमपि भिन्नमिवोन्मीलयति । उन्मीलनं चावस्थितस्यैव प्रकटीकरणमित्यनेन जगत: प्रकाशैकात्म्येनावस्थानमुक्तं । अथ विश्वस्य स्वरूपं विभागेन प्रतिपादयितुमाह ।

तन्नानानुरूपग्राह्यग्राहकभेदात् ॥ [३] ॥ तद्विश्वं नानानेकप्रकारं°

The last two aphorisms run thus:

समाधिसंस्कारवति व्युत्थाने भूयो भूयश्चिदैक्यामर्शान्नित्योदितसमाधिलाभ: ॥ १९ ॥ [इदानीमस्य समाधिलाभस्य फलमाह ।] तदा प्रकाशानंदसारमहामंत्रवीर्यात्मकपूर्णाहंतात्मदा सर्वसर्गसंहारकारिनिजसंविद्देवताचक्रेश्वरताप्राप्तिर्भवतीति शिवं ॥ [२०]॥

The following authorities are quoted: *Utpaladeva*, fol. 14*b*; *Kakshyastotram*, fol. 17*b*; *Bhaṭṭa Kallaṭa*, fol. 17*b*; *Jñānagarbha*, fol. 18*a*; *Trikasāra*, fol. 2*b*; *Pratyabhijñā*, foll. 13*b*, 17*a*; *Pratyabhijñāṭīkā*, fol. 8*b*; *Vijñānabhaṭṭārakam*, foll. 2*b*, 18*a*; *Vijñānabhairavam*, fol. 18*b*; *Sarvavīrabhaṭṭārakam*, fol. 11*b*; *Spandaśāstram*, fol. 5*a*. It ends:

देहप्राणसुखादिभि: प्रतिकलं संरुध्यमानो जन:
पूर्णानंदघनामिमां न चिनुते माहेश्वरीं स्वां चितिं ।
मध्ये बोधसुधाब्धिविश्वमखिलं तत्फेन पिंडोपमं
य: पश्यत्युपदेशतस्तु कथितात्साक्षात्स एक: शिव: ॥
येषां वृत्त: शांकर: शक्तिपातो
येनाभ्यासात्तीक्ष्णयुक्तिष्वयोग्या: ।
शक्त्या ज्ञातुं नेश्वरप्रत्यभिज्ञाम्
उक्तस्तेषामेष तत्त्वोपदेश: ॥

समाप्तमिदमीश्वरप्रत्यभिज्ञाहृदयम् ॥ कृति: श्रीमत्क्षेमराजस्येति शिवम् ॥

Cf. Rāj. Mitra, Notices, viii., p. 43.

[H. T. COLEBROOKE.]

## 2529.

**196.** Foll. 367 (numbered 1–366, two leaves marked 27); size 10¾ in. by 5 in.; legibly written, in Devanāgarī, about the middle of last century; thirteen lines in a page.

*Svacchandoddyota*, a commentary, by *Kshemarāja*, on the *Svacchandanaya*, a treatise on *Śaiva* faith and conduct, by the commentator's teacher *Abhinavabodhāditya* (? i.e. *Abhinavaguptācārya*).

The treatise, the text of which is likewise given, is divided into fifteen chapters.

It begins (with the numbers supplied):

विश्वैकरूपविश्वात्मविश्वसर्गादिकारणम् ।
परप्रकाशवपुषं स्तुम: स्वच्छंदभैरवम् ॥ १ ॥
प्रसरच्छक्तिकल्लोल – – हरिकेलये ।
सर्वसंपन्निधानाय भैरवाम्भोधये नम: ॥ २ ॥
एकैव बोधजलधे: शक्तिमुक्तिर्जयत्यसौ ।
यदन्तर्निखिलं भाति मुक्तामयमिदं जगत् ॥ ३ ॥
स्मृतिमात्रविनिर्वृत्तनि:शेषाज्ञानकिल्बिष: ।
गुरुमूर्तौ वरस्फारा(?) विजयते जगत्त्रये ॥ ४ ॥
तत्स्येयाविमलव्यक्तमहामाहेशदर्शन: ।
क्षेमराजो विवृणुते श्रीस्वच्छंदनयं मनाक् ॥ ५ ॥
अभिनवबोधादित्यद्युतिविकसितहृत्सरोजगर्भे(?) ।
रमयत सरसा: परिमलमसारसंसारवासनाशान्त्यै ॥ ६ ॥°९॥

इहानुजिघृक्षारससरसहृदयपरमसंवित्संमुखीकृतयुक्तमवतारयितुं कश्चिद्देवीशिशु(!) आह ।

कैलासशिखरासीनं भैरवं विगतामयम् ।
चंडनंदिमहाकालगणेशवृषभृङ्गिभि: ॥ १* ॥
कुमारेंद्रयमादित्यब्रह्मविष्णुपुर:सरै: ।
स्तूयमानं महेशानं गणमातृनिषेवितम् ॥ २ ॥

* The MS. only gives the numbers from I. v. 10 to II. v. 53.

सृष्टिसंहारकर्तारं विलयस्थितिकारकम् ।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम् ॥ ३ ॥
मुदितं (? r. मु°) भैरवं दृष्ट्वा देवी वचनमब्रवीत् ।

इह परमेश्वरस्य चिदानं[द]घनस्य ब्रह्मदर्शनोक्तस्वातिशायनीस्वच्छंदभैरवस्फुरत्तात्मपरमार्थे इति भगवतः शास्त्रस्य तदेवाभिधानं सा च स्वात्मैकरूपपंचकृत्यकारित्वमित्याशयेन सृष्ट्यादिपंचकृत्यकरं देवं भैरवं मुदिदं (!) दृष्ट्वा देवी वचनमब्रवीदित्युक्तं । तत्र देवः शिवादिक्षित्यंताशेषसृष्ट्यादिक्रीडापरस्तावदशेषोत्कर्षतया विजिगीषुस्तदभिन्नत्वाद्विश्वस्य जगत्संहाररूपतयापि द्योतमानः शिवमंत्रमहेश्वरादिभिः स्तूयमानः सर्वेषामगतीनां गतिः प्राप्यो भिन्नबोधसारश्च यथोक्तं दिवुक्रीडाविति (!) भैरवो विश्वभरणरवणवमनरूपो भीरूणामभयमिति व्युत्पत्त्या संसारिणामभयदः । भयं भीः संसारत्रासः । तया जनितो रवः मुक्रंदः भीरवः । ततो जातः° ॥ तत्कैलासशिखरं तत्रासीनं तदुत्तीर्णं प्रकाशैकघनं तदशेषव्याप्त्या च विश्वरूपं तत एव विगतामयं प्रणतानां साधकानां यथाभिलषितसंपादनेनार्तिविनाशनं । एवंभूतं देवं भैरवं मुदितं (r. मु°) यथोक्तदेवरूपेव देवी स्वातंत्र्यशक्तिर्दृष्ट्वा साक्षात्कृत्य वचनमब्रवीत् । °

श्रीदेव्युवाच ॥

यत्त्वया कथितं मह्यं स्वच्छंदं परमेश्वर ॥ ४ ॥

शतकोटिप्रविस्तीर्णं भेदानंत्यविसर्पितम् ।
चतुष्पीठं महातंत्रं चतुष्टयफलोदयम् ॥ ५ ॥

न शक्तिवर्तिमनुजाः स्वल्पवीर्यपराक्रमाः ।
स्वल्पायुषो ऽल्पविज्ञाश्च अल्पसत्त्वाश्च शंकर ॥ ६ ॥

तदर्थं संग्रहं तस्य स्वल्पशास्त्रार्थविस्तरम् ।
भुक्तिमुक्तिप्रदातारं कथयस्व प्रसादतः ॥ ७ ॥

हे शंकर अनुग्रहपरतया श्रेयस्कर आत्मरूपपरमेश्वर यत्त्वया मह्यं स्व एव छंद इच्छा यस्य तादृगनर्गलभैरवरूपाभिधायित्वात्स्वच्छंदं ° ॥

कीदृशं च गुरुं विद्यात्साधकं च महेश्वर ।
भयाभयप्रदातारं शिष्यं भूमिं (!) च कीदृशम् ॥ ८ ॥

सत्रांश्चैव समासेन कालं चैव समासतः ।
यजनं हवनं चैव अधिवासं रजांसि च ॥ ९ ॥

पंचगव्यं च दं (?) चैव दन्तकाष्ठं च मंडलम् ।
दीक्षां चाध्वाभिषेकौ च समया मां धनानि च ॥ १० ॥

कलिमासाद्य सिध्यंति तथा ब्रूहि महेश्वर ।
गुर्वादिभूम्यंतं कीदृशं विद्यात् °

I. (*śl.* 86) इति श्रीमहामाहेश्वरक्षेमराजविरचिते स्वच्छंदोद्योते *mantroddhāraḥ* प्रथमः पटलः ॥ fol. 18*a*; II. *arcanādhikāra*, fol. 46*b*; III. *adhivāsapaṭala*, fol. 65*a*; IV. *dīkshābhishekaprakāśanam*, fol. 125*b*; V. *tattvādidīkshāprakāśanam*, fol. 147*a*; VI. *praṇavādhikāra*, fol. 160*a*; VII. *Kālādhikāra*, fol. 197*a*; VIII. fol. 202*b*; IX. fol. 213*b*; X. *bhuvanādhvadīkshāvidhi*, fol. 306*b*; XI. fol. 329*b*; XII. fol. 355*a*; XIII. fol. 357*a*; XIV. fol. 362*b*.

XV. The text ends:

एवं संक्षेपतः प्रोक्तं सकलं तु वरानने ।
यस्य संप्राशनाद्देवि वीरेशसदृशो भवेत् ॥
तस्माज्ज्ञानार्चनो (? °ने) होमं जपं च वरवर्णिनि ।
कुर्वंति भावितात्मानस्तत्सिध्यंति समंत्रिणः ॥
संपूर्णसिद्धीर्विदधत्स्वच्छंदो जयति प्रभुः ॥
सर्वत्रैव स्फुरति सततं सर्वसर्वात्ममूर्तिर्
योऽसौ स्वच्छच्छलितचलितोर्धोर्धसिद्धः समंतात् ।
स्वच्छंदोऽयं जयति भगवान्सर्वसंपन्निधान (:)
स्फीतस्फूर्जन्निहरूसंबंधास्फारसारस्वशक्ति (?) ॥
इति श्रीस्वच्छंदोद्योते (!) पंचदशः पटलः ॥ १५ ॥

Then follow some more explanatory remarks, after which the commentary ends:

श्रीमतेति (? r. श्रीमतो ऽभि)नवाच्छास्त्रमागमय्य गुरोरि-
[दम् ।
व्याकृणोत्क्षेमराजस्तत्पादधूलिपवित्रित (? ° पु वर्तितः) ॥
यस्तो [ऽ]यं सकलो भवो हि गलितः कर्माणुमायामलः
प्राप्तानन्दघना स्थितिः किमपरं लब्धः प्रकाशः परः ।
श्रीमच्चेतनभैरवस्तुतिरसोत्पादेन लब्धोदयैर् (?)
अस्माभिर्विमलो हृदम्बरतले (!) निर्यंत्रणं स्थीयते ॥
स्वतंत्रस्वच्छात्मा स्फुरति सततं चेतनशिवः
परा शक्तिश्चेयं करणसरणिप्रांतमुदिता ।
तदाभोगैकात्मप्रसर . . . . यच्चोपजीवि . . . . यच्चोपजीविकृतः क्षेमराजकृतः श्रीमत्स्वच्छंदोद्योतः संपूर्णः । ° संवत् २१ फाल्गुनितृतीयस्यां बुधवासरायां संपूर्णं समाप्तं ॥

[H. T. Colebrooke.]

## VIII. Mysticism (Tantra).

### 2530.

**147.** Foll. 741 (numbered 753; nos. 389–398, 439, 534 and 733 having been passed over, and 731 being double); size 13½ in. by 4½ in.; fair Devanāgarī writing of 1740 A.D.; seven lines in a page.

*Paramāgamacūḍāmaṇi*, of the *Nāradapañcarātra*; in 95 *paṭalas*.

It begins: ओं नमो महनीयगुणांभोधये विघ्नवल्लीविध्वंसनकुठाराय गणानां पतये श्रीवरदाय ॥

चातुर्विध्यहिरण्यगर्भरसनासिंहासनाध्यासिनी
सेयं वागधिदेवता वितरतु श्रेयांसि भूयांसि नः ।
यत्पादामलकोमलांगुलिनखज्योत्स्नाभिरुद्भासितः
शब्दब्रह्मसुधांबुधिर्बुधमनस्युच्चैःसलं खेलति ॥ १ ॥

श्रीप्रह्लादपुरातनादिगणनापुण्यप्रभावोद्भव-
स्पृष्टेनाद्भुतहेतुना समजनि स्तंभाद्रियस्त्वर्कितः ।
दाक्षोत्तीर्णसुवर्णवर्णतनुवान् संपूर्णसौभाग्यवान्
विस्तीर्णां श्रियमाददातु स विभुर्लक्ष्मीनृसिंहो मम ॥ २ ॥

ब्रह्माद्वैतरमाश्रयस्य जगतो बीजस्य संसाधने
सर्वांगस्त(? स्व)विधिर्विशिष्टवदनात् सुस्पष्टवेदाक्षरः ।
क्षीरोदाद्भुतसुप्रसंगसरणिश्रामत्तरंगावली-
विस्फूर्तीकृतसत्प्रबोधमुदिरः श्रीविट्ठलः पातु नः ॥ ३ ॥

अद्वैतामृत[वा]हिनीपरिलसत्कल्लोलपूरोर्मिषु
स्फारं स्फारविलासधर्मकुशलः श्रीराजहंसोपमः ।
यो ऽसौ विट्ठलभक्तिरस्य कमला विष्वक्प्रवृत्तो मुदा
स्वादं स्वादमनंतयुक्तिगुणवद् भुंक्ते रसं नारदः ॥ ४ ॥

वेदाख्यस्य विधेर्विधेयविधिमानंगोद्भवः केवलं
विष्णोर्भक्तिरतः प्रशस्तपुरुषः प्रेम्णः प्रसंगोत्सवे ।
पृष्टो वेदतरुर्विभागरचनाकर्त्रैभ्रतास्तेन स
श्रीमत्कृष्णरतिप्रसंगजननं प्रोवाच शास्त्रं मुनिः ॥ ५ ॥

पंचानां प्रचुरप्रमेयगुणिनां गौणप्रसंगेन वा
ब्रह्मैकध्यतया निवृत्तिवचनै रात्रिर्निरुक्ता यतः ।
आनंदानुभवेन वास्तवविधौ विध्यानिकान्वेषणात्
ज्ञानानंदशशांकराजसदनात् श्रीपांचरात्रं ततः ॥ ६ ॥

नारं जीवसमूह एष विविधो नारं च तत्त्वग्रहो
नारं नित्यमनातनानुभविनां स्थैर्यादिवृद्धिक्रमः ।
श्रीनेतान् प्रददाति सत्यकरुणापूरेण शिष्याय यः
सो ऽव्यात् श्रीगुरुमूर्तिरात्मयशसा श्रीनारदो नारदः
[॥ ७ ॥

ह्रस्वाद् ह्रस्वतरं महच्च महतस्तिग्मं च स्निग्धं च यत्
सर्वत्रास्ति समं गजे च मशके रंकेषु भूपेष्वपि ।
तादात्म्येन तदेतदेव तदिदं तेजोमयं तन्मयं
सर्वव्यापि हृदंतरंगनिलयं नित्यं वयं धीमहि ॥ ८ ॥

सारात्सारतरं विचार्य विशदं कर्तव्यमालोक्य च
कृत्वा भारतभावनाभिरभितः सिद्धांतसारावलीः ।
सृष्ट्वा वैदिकवृत्तिभागभजनाविद्याधिकारान् क्रमात्
व्यासे ऽतुष्टमना मनागनुदिनं दध्यौ विधातुं सुखं ॥ ९ ॥

प्राचीनप्रचुरप्रवाहविशदामानंदकंदोज्ज्वलां
संप्राप्याथ सरस्वतीं सुसरितं तत्रावगाह्यापि च ।
तीरे संतमनेकसन्मुनियुतं श्रीनारदं नारदं
नारानंदमये परोपकृतये संपृष्टवान् वस्तुतः ॥ १० ॥

स्वामिन् विश्वविदां वरेण्यगुरवे तुभ्यं नमः सांप्रतं
संतुष्टिर्मनसो ममास्ति न किल प्रोह्यामनृषिं विना ।
तत्त्वं विष्णुगुणानुवादनिवहादुत्साहसंपर्किणा
संपर्कविधुरस्य तद्वद विभो विश्वैकनाथ प्रिय ॥ ११ ॥

श्रुत्वा शुद्धविरक्तिभक्तिरुचिमत्प्रेमप्रभाभासुरं
वाक्यं व्यासनिवेदितं मुनिवरः श्रीनारदो ऽचिंतयत् ।
स्नेहार्द्रीकृतचेतनो निरवधिप्रेमानुसंगेन तं
प्रोवाचानुजगर्ज्जनश्रवणतो मेघातिगंभीरवाक् ॥ १२ ॥

पाराशर्य तथाभिमानरहितं श्रुत्वा वचः संप्रति
प्रेमक्षीरपयः पयोदनिवहैः सिक्तं ममांगं मुहुः ।
संतुष्टिर्मनसो ममापि समभूद् वाक्सौधमास्वाद्य मे
चक्षुर्वाक्पुलका भवंति भगवन् चोक्षा अमी साक्षिणः
[॥ १३ ॥

नैसर्ग्यं भवतो भवत्यभिनवा सेवा मुहुः कुर्वतः
कृष्णे कृष्णकथानुवादरसिकतृप्तिं विनानुश्रवणं ।
लक्ष्मीकांतगुणामृतं प्रपिबतो ऽप्यानंदकंदादिव
तृष्णायान् परिवर्तसे विमलधीर्वैश्यानुवादान् विटः ॥
[१४ ॥

एवं रत्यभिमानवर्जिततनुर्विश्वोपकारक्षमः
पुंसामुद्धरणाय नौरिव भवान् संसारसिंधोर्मुहुः ।
भूभारं क्षपयिष्णुविष्णुयशसामुद्गीरणे सत्वर
साधो साधु जनातु वर्तिरतये(!) मामेष संपृच्छसि ॥ १५ ॥

विद्वान् विश्वविदः पुराणपुरुषस्यानंदसंदर्भिणः
श्रीकांतस्य कलावतारतनुवान् संग्रामसम्मा यथा ।
शार्ङ्गायुद्धरणाय[शार्ङ्गो उ०] पापहृतये नारायणैकांतिनः
श्रीमान् यत्सममूर्तिरस्ति नितरां जानंति सभ्या क्षमी ॥१६॥
उद्यद्दिनकररूपिमान् श्रीमान् विश्वाभिरामतां धत्ते ।
हरिपदतिग्मगभस्तिश्रुतशब्दगुणागणो विचरः ॥ १७ ॥ ०
[from v. 37 in *anushṭubh śloka.*

Some idea of the contents of the work will be obtained from the following list of chapters:

1–10. Philosophical.—1. (*śl.* 126) *paramabrahmaprasaṅgavarṇanam;* 2. (125 *śārdūlav.*) *srishṭyādivicitravarṇanam;* 3. (133 ditto) *srishṭinirūpaṇe 'ntaḥkaraṇacatushṭayayantranirūpaṇe svātmāvabodha;* 4. (119 *anushṭ. śl.*) *yantranirūpaṇe vyaktivarṇane subuddhivarṇanam;* 5. (*śl.* 127) *advaitaprasaṅge gatimahimāvarṇanam;* 6. (*śl.* 125) *buddhivibhavavarṇane śrutyarthasāranirṇaya;* 7. (*śl.* 147) *rasavarṇanam;* 8. (*śl.* 147) *buddhivibhavavivekavarṇane pravrittinivrittinirūpaṇam;* 9. (*śl.* 125) *sevyasevakabhedapraśaṃsāyām bhaktyudbhāsa;* 10. (*śl.* 140) *sevyasevakabhāvavarṇane bhagavadbhaktivarṇanam;*—

11. (*śl.* 126) *nijāyuḥsārthakākaraṇe brāhmamuhūrtaprātaḥsamayāvadhivaishṇavapravritti-nirṇaya;* 12. (*śl.* 125) *bhaktivarṇane ṛiṇatrayāpakaraṇaprasaṅge pañcayajñanirūpaṇādivicitravarṇane bhaktiyuktitādātmyanirūpaṇam;* 13. (*śl.* 192) *pañcāyatananirūpaṇe brahmajñānāvāptinirṇaya;* 14. (*śl.* 131) °*mahālayasrishṭikartritvaprasaṅga-;* 15. (*śl.* 158) *karmākarmavikarmaprastāve* °*nijādhikārasthitivarṇanam;* 16. (*śl.* 125) *yogāntarayanirākaraṇanirūpaṇe karaṇapurushavarṇane nāmamahimā;* 17. (*śl.* 125) *pañcāyatanaprakaraṇe hetupurushasahajapurushasvarūpavarṇanam;* 18. (*śl.* 115) *svādhikāramayabhaktivaicitrībhedābhedavibhavasadāśivarūpasaṃgīta;* 19. (*śl.* 136) °*brahmarudrādinā bhagavadaṃśasāmyavarṇanam;* 20. (*śl.* 131) *gotradevatāpūjanādhikāra-;* 21. (*śl.* 138) *dvādaśaparvanirūpaṇam;* 22. (*śl.* 137) *purvacitipraśaṃsā;* 23. (*śl.* 124); 24. (*śl.* 135) *tulanāpraśaṃsā;* 25. (*śl.* 152) *grihasthapraśaṃsāyām anvahavratabrahmacaryanirūpaṇam;* 26. (*śl.* 135) *grihasthāśramavarṇane mantradīkshāpraśaṃsā;* 27. (*śl.* 142); 28. (*śl.* 136) *dīkshāmantragrahaṇamahotsava;* 29. (*śl.* 120) *dīkshāgrahaṇam;* 30. (*śl.* 153) *puraścaraṇavidhiśūdravarṇādhikāravarṇanam;* 31. (*śl.* 141) *bhagavadbhaktivilāsamahotsava;* 32. (*śl.* 127) *damanakamahotsava-kelimahotsavanirūpaṇam;* 33. (*śl.* 189) *śayanyutsava;* 34. (*śl.* 131) *pavitrāropaṇamahotsava;* 35. (*śl.* 146) *kaṭidānamahotsava-vijayotsava;* 36. (*śl.* 202) *rathamahotsava-dhvajāropaṇamahotsava;* 37. (*śl.* 167) *dīpālikāmahotsava-kārttikīmahotsava-tripurotsava;* 38 (*śl.* 133) *vibhutipradamahotsava;* 39. (*śl.* 158) *dadhyodanādisītāśanamahotsava;* 40. (*śl.* 147) *hutālikamahotsava;* 41. (*śl.* 239) *purushottamamahotsava;* 42. (*śl.* 127) *ekādaśīvidhi;* 43. (*śl.* 135); 44. (*śl.* 125); 45. (*śl.* 147); 46. (*śl.* 126); 47. (*śl.* 133); 48. (*śl.* 125) *mahārāsaravarṇanam;* 49. (*śl.* 143) *rāmanavamīmahotsavavratavidhi;* 50 and 51 (some omission, *śl.* 1-119, then 99-131) *krishṇajanmāshṭamīvratamahotsavavidhi;* 52. (*śl.* 106) *śivarātrivratanirṇaya;* 53. (*śl.* 111) *śivaliṅgaśuddhāśuddhapūjananirṇaya;* 54. (*śl.* 153) *śāligrāmagallakīmaṇicakravarṇanam;*—

55–95. Astrological observations, and mystic prayers and performances. 55. *śl.* 159; 56. *śl.* 152; 57. *śl.* 147; 58. *śl.* 163; 59. *śl.* 121; 60. *śl.* 123; 61. *śl.* 132; 62. *śl.* 145; 63. *śl.* 214; 64. *śl.* 99; 65. *śl.* 105; 66. *śl.* 101; 67. *śl.* 103; 68. *śl.* 102; 69. *śl.* 65; 70. *śl.* 62; 71. *śl.* 62; 72. *śl.* 51; 73. *śl.* 39; 74. *śl.* 65; 75. *śl.* 50; 76. *śl.* 46; 77. *śl.* 36; 78. *śl.* 62; 79. *śl.* 60; 80. *śl.* 48; 81. *śl.* 54; 82. *śl.* 67; 83. *śl.* 83; 84. *śl.* 63; 85. *śl.* 63; 86. *śl.* 55; 87. *śl.* 54; 88. *śl.* 66; 89. *śl.* 55; 90. *śl.* 72; 91. *śl.* 63; 92. *śl.* 62; 93. *śl.* 72; 94. *śl.* 102; 95. *śl.* 52.

Foll. 693–703 have been inserted in inverse order between foll. 704 and 705.

It ends:

अविद्यापरिहारेण विद्यया अनुरोपणात्(!) ।
अज्ञानतमसां नाशो ब्रह्मविज्ञानभानुना ॥ ५१ ॥

प्रतीतसर्वशब्दार्थतत्त्वसत्त्वविवेचनात् ।
आत्मैव परमं ब्रह्म ध्यासविश्वोपकारकृत् ॥ ५२ ॥

इति श्रीपरमागमचूडामणौ श्रीनारदपंचरात्रे सर्वशास्त्रैकवाक्यनिरूपणं नाम पंचनवतितमः पटलः समाप्तः ॥ नारदपंचरात्रग्रंथ समाप्तं ॥° संवत् १७९७ शके १६६२ प्रमोदनामसंवत्सरे फाल्गुनवद्यपंचमी रविवासरे हस्तनक्षत्रे अमृतसिद्धियोगवेलायां॥° ग्रंथ १३१२५ ॥

According to Prof. Bhandarkar, Rep. 1883-84, p. 8, the *Nāradapañcarātra* includes the following six works: 1. *Lakshmīsaṃhitā*; 2. *Jñānāmṛitasārasaṃhitā* (ed. by K. M. Banerjea, in Bibl. Ind.); 3. *Paramāgamacūḍāmaṇisaṃhitā*; 4. *Paushkarasaṃhitā*; 5. *Pādmasaṃhitā*; 6. *Vṛiddha-Brahmasaṃhitā*; whilst quotations are also met with (ib. p. 72) from 7. *Sātvatasaṃhitā*, and 8. *Paramasaṃhitā* (perhaps identical with 3). [H. T. COLEBROOKE.]

## 2531.

**1193a.** Foll. 200; size 12½ in. by 6 in.; careless, modern Devanāgarī writing; thirteen lines in a page.

*Paushkarasaṃhitā*, of the *Nāradapañcarātra*, consisting of 43 *adhyāyas* in which *Paushkara* is instructed by *Bhagavat* in matters chiefly connected with sacrificial rites.

Rather incorrect; with lacunæ in places.

It begins:

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्याये सर्वविघ्नोपशांतये ॥ १ ॥

अथ पौष्करसंहिताप्रारंभः ॥

यदा तीर्थीकृतस्तिष्ठेद् गुरोरग्रे हितैषिणः ।
कदा चाज्ञापयेच्छिष्यं संप्राप्तं कमलोद्भवः ॥ १ ॥

तनु(? ननु) प्रदापयेत् काले पात्रे गुणगणान्विते ।
यस्तदाज्ञापयेत्तं वै गच्छ पुत्र धनं यतः ॥ २ ॥

यागोपकरणार्थं तु येन शांतिमवाप्स्यति ।
यथालब्धं तु तत्पश्चाद् गुरवे विनिवेद्य च ॥ ३ ॥

त्वत्प्रसादेन भगवन्निदं प्राप्तं गृहाण मे ।
दयां कुरु त्वनाथस्य निमग्नस्य भवार्णवे ॥ ४ ॥

एवमादितया(!) ब्रूयात् करुणं वाक्यसंचयं ।
प्रवर्तेत तदर्थं तु गुरुमंडलपूजने ॥ ५ ॥

सूत्रयित्वा विधानेन पूरयित्वा शनैः शुभैः ।
लिखित्वा च क्रमाद्वैधा त्वालिख्य घटिकादिकैः ॥ ६ ॥

भूमौ हैमशलाकाद्यैर्विनाभावात् प्रयत्नतः । ६ (!) ।
पूजयेत्फलपुष्पाद्यैरारण्यैर्नित्यसंभवैः ।
पूजितं दर्शयेत्तस्य तं तु विद्धि चतुर्विधं ॥ ७ ॥

आद्यं पद्मोदराख्यं तु तत्त्वसंख्योपलक्षितं ।
अग्नेः कञ्जगर्भं(!) तु द्वितीयं परिकीर्तितं ॥ ८ ॥

तदनेकप्रकारं च चक्राब्जं स्यात्तृतीयकं ।
यस्य भेदो ऽप्यनेकश्च स सत्त्वाद्याब्जसंभवः ॥ ९ ॥

मिश्रं चक्राभिधानं तु मंडलं बहुभेदयुक् ।
तच्चतुर्थं समाख्यातं यत्र रुद्रो विमुच्यते ॥ १० ॥

महाख्यं नवनाभं तु बिंबभेदेन यत्स्थितं ।
दृष्टेन पूजितेनाथ तथाग्नौ कल्पितेन च ॥ ११ ॥

मोक्षो येन भवत्याशु भक्तानां केवलेन च ।
भेदयुक्तेन कालेन दृष्टेनेष्टेन वै क्रमात् ॥ १२ ॥

द्वादश्यां प्रतिपन्नं तु वत्सरांते ततो द्विज ।
सभर्यांसंभवेद्भक्तं पुत्रकं चापरेण तु ॥ १३ ॥

दृष्टेन पूजितेनापि ह्यनुध्यातेन वै हृदि ।
तथाविधेन कालेन योग्यता तस्य जायते ॥ १४ ॥°

1. (*śl.* 53) इति श्रीनारदपंचरात्रसारे पौष्करसंहितायां *śishyaparīkshālakshaṇam*; 2. (*śl.* 44) इति श्रीनारदपंचरात्रे (thus always subsequently) पौष्करसंहितायां *bhūmiparīkshā*; 3. (*śl.* 117) *dīksiddhilakshaṇam*; 4. (*śl.* 206) *maṇḍapalakshaṇam*; 5 (?)-6. (*śl.* 404) *padmalakshaṇam*; 7. (*śl.* 171) *vyūhalakshaṇam*; 8. (*śl.* 224, ? wanting 183–200) *cakralakshaṇam*; 9. (*śl.* 164) *miśralakshaṇam*; 10. (? wanting); 11. (*śl.* 104) *vṛittabimbalakshaṇam*; 12. (*śl.* 28) *pañcapadmacakrabimbalakshaṇam*; 13. (*śl.* 13) *sūryabimbalakshaṇam*; 14. (*śl.* 15) *candrabimbalakshaṇam*; 15. (*śl.* 33) *trikoṇabimbalakshaṇam*; 16. (*śl.* 48) *kūrmabimbalakshaṇam*; 17. (*śl.* 47)

*śaṅkhabimbalakshaṇam ;* 18. (*śl.* 58) *navanābhalakshaṇam ;* 19. (*śl.* 140) *natābhyarcanam ;* 20. (*śl.* 123) *vishvaksenārcanam ;* 21. (*śl.* 22) *parivāralakshaṇam ;* 22. (*śl.* 77) *ādhārāsanalakshaṇam ;* 23. (*śl.* 69) *āsanadevatānyāsa ;* 24. (*śl.* 58) *adhārāsanadevatālakshaṇam ;* 25. (*śl.* 40) *vṛitivicāra ;* 26. (*śl.* 59); 27. (*śl.* 728) *śrāddhākhyānam ;* 28. (*śl.* 51) *hutāśanayonivibhāga ;* 29. (*śl.* 161); 30. (*śl.* 224) *pavitrārohaṇam ;* 31. (*śl.* 307) *lokadharma ;* 32. (*śl.* 158) *ārādhanalopavicāra ;* 33. (*śl.* 175) *tattvasamādhi ;* 34. (*śl.* 89.) *dhūpaghaṇṭālakshaṇam ;* 35. (*śl.* 67) *dhūpādhāralakshaṇam ;* 36. (*śl.* 455) *āntaravicāra(!);* 37. (*śl.* 66) *atamuvicāra ;* 38. (*śl.* 318) *adhikāranirupaṇam ;* 39. (*śl.* 38) *āgamanirṇaya ;* 40. (*śl.* 108) *bhadrapīṭhalakshaṇam ;* 41. (*śl.* 224) *nānādharmapratishṭhāpanam ;* 42. (*śl.* 187) *pādapratishṭhā ;* 43. (*śl.* 194) ends :

पित्रामृतां(!) गतामृतानामन्येषां वा करोति यः ।
वैष्णवं च प्रतिष्ठानं स्वशक्त्या विभवेन वा ॥ १९१ ॥

अचिरादेव तं याति शश्वदेवांतकास्पदं ।
वैष्णवं च परं स्थानं ततः कालांतरेण तु ॥ १९२ ॥

क्षितिवंशं शुभमासाद्य कुलशीलादिकैः सह ।
आचरंति शुभं येन प्राप्नुवंति पुनर्भुवं ॥ १९३ ॥

कृपयानुभवे तावत् प्रतिष्ठां यः समाचरेत् ॥ १९४ ॥

इति श्रीनारदपंचरात्रे पौष्करसंहितायां त्रिचत्वारिंशो ऽध्यायः ॥ ४३ ॥

[H. T. COLEBROOKE.]

## 2532.

**736.** Foll. 327 ; size 12½ in. by 6¼ in. ; fair, modern Devanāgarī writing ; thirteen lines in a page.

*Pādmatantra*, or *Pādmasaṃhita*, of the *Nāradapañcarātra*, in four sections. Fairly correct.

1. *Jñānapāda*, in 11 *adhyāyas*, begins :

आसीनमाश्रमे कण्वं तदाश्रमनिवासिनः ।
निःश्रेयसकरं कण्वे प्रष्टुमारेभिरे मुनिं ॥ १ ॥

ऋषय ऊचुः ॥

आधीताः कण्व भगवन् सांगोपांगाः सविस्तराः ।
वेदास्त्वयः सदर्थानि शास्त्राणि च यथातथं ॥ २ ॥

एतेषु यदधीतेषु कैवल्याय न कल्पते ।
कारणं तदपि त्वत्तः श्रोतव्यं नान्यथा गतिः ॥ ३ ॥

कण्व उवाच ॥

श्रूयतां मुनयः सर्वे यथा पूर्वं मया श्रुतं ।
उपसंगम्य संवर्तमृषिमग्निमिवापरं ॥ ४ ॥

प्रदीप्तमेतमेवार्थं पृष्टवानभिवाद्य तं ।
शृण्वतां स महर्षीणां संवर्तः सर्ववित्स्वयं ॥ ५ ॥

मह्यं शुश्रूषमाणाय प्रत्युवाच यथातथं ।

संवर्तक उवाच ॥

अधीताः सकला वेदाः सांगोपांगाः सविस्तराः ॥ ६ ॥

इतिहासपुराणानि वाकोवाक्ययुतानि च ।
श्रुतानि तेषु सर्वेषु दृश्यंते सर्वदेवताः ॥ ७ ॥

स्वतंत्राः फलमप्येषु स्वर्गादन्यश्च दृश्यते ।
विविधानि च शास्त्राणि न तर्काय प्रतिष्ठिताः ॥ ८ ॥

अपवर्गफलोपायं न च पश्यामि कुत्रचित् ।
श्रुतिरेव च तस्यापि प्रमाणमिति शुश्रुम ॥ ९ ॥

निश्चयं नाधिगच्छामि मनसा विमृशन्नपि ।
ततो ऽहं भृशनिर्विण्णः संतप्तहृदयस्तदा ॥ १० ॥

सिद्धाश्रमं समासाद्य द्रुहिणं समपूजयं ।
अत्युग्रं तप आतिष्ठं ततः प्रीतः प्रजापतिः ॥ ११ ॥

ऋषिभिर्देवतैः सार्धं स्वयमागमदंतिकं ।

ब्रह्मोवाच ॥

वरं वृणीष्व भद्रं ते यत्ते मनसि वर्तते ॥ १२ ॥

वरार्थिनं द्विजं श्रेष्ठदर्शनं वरदं मम ।

संवर्तक उवाच ॥

इत्युक्तो ऽहं भगवता प्रत्यवोचं कृतांजलिः ॥ १३ ॥

ज्ञानं भवतु मे शुद्धं निःसंशयमनाकुलं ।
येन सांसारिकं दुःखं तरामि ज्ञानवर्त्मना ॥ १४ ॥

इत्युक्तो देवदेवस्तु प्रहसन्निदमब्रवीत् ।
शृणु विप्र प्रवक्ष्यामि सिद्ध्युपायमनामयं ॥ १५ ॥

श्रुतिरेव द्विजादीनां निःश्रेयसकरी परा ।
यतो वै श्रुतिमंत्रेण नित्यमाराधयं हरिं ॥ १६ ॥

कैवल्यं परमं प्राप्तो न भूयः संसरेदिह ।

संवर्तक उवाच ॥

भगवन्केन शास्त्रेण देव आराध्यते परः ॥ १७ ॥

कीदृशस्तु परो देवो विधिः को वा तदर्चने ।

ब्रह्मोवाच ॥

वैष्णवं शासनं शुभमच्छिद्रं पापनाशनं ॥ १८ ॥

हिताय सर्वभूतानामादिदेवेन चोदितं ।

चतुष्पादसमायुक्तं चतुर्वर्गफलप्रदं ॥ १९ ॥

तेन शास्त्रविधानेन समाराध्य केशवं ।

तच्छास्त्रं श्रुतवान्मत्तः कपिलो मुनिपुंगवः ॥ २० ॥ °

In this way this '*mahat śāstram*' is represented as being successively communicated by *Keśava* to *Brahmā*, by *Brahmā* to *Kapila*, by *Kapila* to *Padmanāga* (or *Padma*, whence its name), and by *Padma* to *Saṃvartaka*, who finally transmitted it to *Kaṇva*.

संवर्तक उवाच ॥

इत्युक्तो ब्रह्मणा देवः शंखचक्रगदाधरः ।

पार्श्वस्थं रुद्रमालोक्य व्याजहार स्वयं हरिः ॥ ४७ ॥

श्रीभगवानुवाच ॥

षट्प्रकाराणि तंत्राणि त्वद्देवत्यानि शंकर ।

परस्परविरुद्धानि कुरुष्व त्वं यथातथं ॥ ४८ ॥

अवतारैश्च बहुभिर्व्यासादिभिरहं मुने ।

त्वत्प्रणीतानि शास्त्राणि स्थापयामि महीतले ॥ ४९ ॥

अल्पायासेन सुलभं भूयिष्ठं फलमद्भुतं ।

षट्प्रकारे च शास्त्रे ऽस्मिन् दर्शय स्वेमकारणं ॥ ५० ॥

योगशास्त्रस्य कर्तृत्वे विरिंचो ऽपि करिष्यते ।

सांख्यस्य चापि निर्माणे कपिलो ऽधिकरिष्यति ॥ ५१ ॥

बुद्धमूर्तिं समास्थाय बुद्धशास्त्रं सृजाम्यहं ।

ज्ञानापह्नवनिष्णातं ज्ञातृज्ञेयफलानि च ॥ ५२ ॥

आर्हतीं मूर्तिमास्थाय शास्त्रं शास्मि तथार्हतं ।

शास्त्राणि मत्प्रणीतानि भवद्भिर्श्चीकृतानि च ॥ ५३ ॥

आभूतः संप्लवाल्लोके स्थास्यंति मम शासनात् ।

वाढमित्येव ते सर्वे प्रणिपत्याब्रुवन् हरिं ॥ ५४ ॥

कृतकृत्यस्तदा ब्रह्मा सार्धं देवैः स्वमालयं ।

जगाम सिद्धगंधर्वचारणादिभिरर्चितः ॥ ५५ ॥

संवर्तक उवाच ॥

पंचरात्रेण तुल्यानि तदाप्रभृति ये मुने ।

शैवादीन्यपि शास्त्राणि प्रथंते शासनाद्धरेः ॥ ५६ ॥

वैष्णव्या मायया लोके प्रचरंति निरंकुशाः ।

शैवादयो ऽपि समयास्तत्र तत्र प्रतिष्ठिताः ॥ ५७ ॥

पंचेतरे पंचरात्रमदूषितमपि स्वयं ।

दूषयंत्येव मूढत्वात्तद्दूषयितुमीश्वरैः ॥ ५८ ॥ °

पंचरात्रसमाख्यासौ कथं कृत्वा प्रवर्तते ।

संवर्तक उवाच ।

पंचेतराणि शास्त्राणि रात्रीयंते महत्यपि ॥ ७१ ॥

यत्संनिधौ समाख्यासौ तेन लोके प्रवर्तते ।

चंद्रतारागणो यद्वच्छोभते नैव वासरे ॥ ७२ ॥

तथेतराणि शोभंते पंचरात्रस्य संनिधौ ।

पंचत्वमथवा यद्वद्दीप्यमाने दिवाकरे ॥ ७३ ॥ °

तंत्राणां चैव सर्वेषां वक्ता नारायणः स्वयं ।

अनुग्रहार्थं भक्तानां श्रावयामास च स्वयं ॥ ८४ ॥ °

कण्व उवाच ॥

कति भेदास्तु तंत्राणां नामधेयानि कानिचित् ।

श्रोतुमिच्छामि विभेदं परं कौतूहलं हि मे ॥ ९२ ॥

संवर्तक उवाच ।

शतमेकमथाष्टौ च पुरा हे कण्व शुश्रुम ।

नामधेयानि चैतेषां श्रूयतां कथ्यते मया ॥ ९३ ॥

पाद्मं पद्मोद्भवं मायावैभवं नलकूवरं ।

त्रैलोक्यमोहनं विष्णु तिलकं परमाह्वयं ॥ ९४ ॥

नारदीयं धनदीयं वासिष्ठं पौष्कराह्वयं ।

सनत्कुमारं सनकं सत्याख्यं कण्वसंहिता ।

सनताख्यं महीप्रश्नः श्रीप्रश्नः पुरुषोत्तमं(!) ॥ ९५ ॥

माहेंद्रसंहिता पंचप्रश्नाख्यं तत्त्वसागरं ।

वागीशं सात्वतं तेजो द्रविणं श्रीकराह्वयं ॥ ९६ ॥

मार्कंडं विष्णुसद्भावं सिद्धांतं विष्णुपूर्वकं ।

विष्णुवैभविकं सौरं सौम्यमीश्वरसंहिता ॥ ९७ ॥

पुष्टितंत्रं शौनकीयं मारीचं दक्षसंहिता ।

औपेंद्रं योगहृदयं हारीतं पारमेश्वरं ॥ ९८ ॥

आत्रेयं मंदरं विष्वक्सेनमौशनसाह्वयं ।

वैहायसं विहंगेंद्रं भार्गवं परपूरुषं ॥ ९९ ॥

याज्ञवल्क्यं गौतमीयं पौलस्त्यं शाकटाह्वयं ।

ज्ञानार्णवं जामदग्न्यं याम्यं नारायणात्मकं ॥ १०० ॥

पाराशर्यं च जाबालं कापिलं वामनाह्वयं ।

जयोत्तरं बार्हस्पत्यं जैमिनं सात्वताह्वयं ॥ १०१ ॥

कात्यायनकं वाल्मीकमौपगायनसंहिता ।

हैरण्यगर्भमागस्त्यं काण्वेयं बोधायनाह्वयं ॥ १०२ ॥

भारद्वाजं नारसिंहं भार्म्यमुत्तरपू[र्वे]कं ।

शातातपमांगिरसं काश्यपं पैंगलाह्वयं ॥ १०३ ॥

त्रैलोक्यविजयं योगं विष्णाख्यं चैव वारुणं ।
कृष्णचामरमाग्नेयं मार्कंडेयस्य संग्रहः ॥ १०४ ॥
महासनत्कुमाराख्यं व्यासाख्यं विष्णुसंहिता ।
संहिता चाहिर्बुध्नस्य ब्रह्मन् राघवसंहिता ॥ १०५ ॥

संवादं शुक्ररुद्राभ्यामुमामाहेश्वराह्वयं ।
दत्तात्रेयं शार्ङ्गाख्यं[च]वाराहमिहराह्वयं(!) ॥ १०६ ॥

संकर्षणाख्यं प्रद्युम्नसंहिता कल्किसंहिता ।
प्राचेतसाख्यमित्येते शतमष्टोत्तरं स्मृतं ॥ १०७ ॥

एतानि तंत्रनामानि मयोक्तानि महामते ।
तंत्रास्त्वनेके बोध्यंते मुक्त्युपायाः पृथक् पृथक् ॥ १०८ ॥

इति तंत्रं समाख्यातं शास्त्रमेव मनीषिभिः ।
तंत्राणां नामधेयानि यो नित्यं पठ्यते(!) नरः ॥ १०९ ॥
सर्वपापविनिर्मुक्तो याति ब्रह्म सनातनं ॥

1. (*śl.* 110) इति श्रीनारदपंचरात्रे महोपनिषदि पाद्मे तंत्रे (thus generally) ज्ञानपादे *śāstrāvatāraḥ* ; 2. (*śl.* 49) °पाद्मतंत्रे° *mūrtyutpattikathanam* ; 3. (*śl.* 27) *brahmādisṛishṭikathanam* ; 4. (*śl.* 44) *purushavivekaḥ* ; 5. (*śl.* 40) *brahmalakshaṇaprāptyupāyakathanam* . 6. (*śl.* 52) *brahmaṇaḥ sarvataḥpāṇipādatvavarṇanam* ; 7. (*śl.* 69) *jñānotpattikāraṇakathanam* ; 8. (*śl.* 47) *muktibhedatattvanirṇayaḥ* ; 9. (*śl.* 65) *bhūgolavarṇanam* ; 10. (*śl.* 25) *bhūlokalakshaṇam* ; 11. (called 12 ; *śl.* 92) *bhuvarlokādivistāraḥ*.

II. *Yogapāda* (concentration of mind) of 5 *adhyāyas* : 1. (*śl.* 22) *āsanabhedavidhiḥ* ; 2. (*śl.* 40) *nāḍīsvarūpakathanam* ; 3. (*śl.* 36) *prāṇayāmalakshaṇam* ; 4. (*śl.* 23) *pañcabhūtasthānabhedanirṇayaḥ* ; 5. (*śl.* 31) *yogalakshaṇam*.

III. *Kriyāpāda* (on the ceremonies connected with the construction of houses, villages, temples, idols, altars, etc.), in 32 *adhyayas* : 1. (*śl.* 55) *bhū, arīkshāpraveśabali* ; 2. (*śl.* 66) *grāmādivinyāsa* ; 3. (*śl.* 48) *karshaṇādividhi* ; 4. (*śl.* 43) *bālāayakalpanam* ; 5. (*śl.* 90) *prathameshṭakāvidhi* ; 6. (*śl.* 51) *prāsādasya garbhanyāsavidhi* ; 7. (*śl.* 72) *upapīṭhādhishṭhānalakshaṇam* ; 8. (*śl.* 93) *prāsādabhedalakshaṇam* ; 9. (*śl.* 77) *mūrdheshṭakāvidhirvimānadevatākalpanam* ; 10. (*śl.* 139) *parivāradevatākalpanam* . 11. (*śl.* 105) *śilānusaṃgraha* ; 12. (*śl.* 54) *dhruvaverapramāṇāṅgulādilakshaṇam* ; 13. (*śl.* 116) *śūlasthāpanavidhi* ; 14. (*śl.* 108) *varṇavidhanam* : 15. (*śl.* 99) *sthityāsanādibheda* ; 16. (*śl.* 77) *caturviṃśaty-ashṭamūrtilakshaṇam* ; 17. (*śl.* 111) *daśāvatāralakshaṇam* ; 18. (*śl.* 67) *mūrtibhedakathanam* ; 19. (*śl.* 64) *shaḍveranirṇaya* ; 20. (*śl.* 129) *pratimāmāna-pratimālakshaṇa-bhūshaṇalakshaṇam* ; 21. (*śl.* 82) *śriyādilakshaṇam* : 22. (*śl.* [illegible]) *parivāradevatālakshaṇam* ; 23. (*śl.* [illegible]) *pūjopakaraṇavidhi* ; 24. (*śl.* 94) ? *ācāryalakshaṇam* ; 25. (*śl.* 111) *pratishṭhopakaraṇam* ; 26. (*śl.* 83) *jalādhivāsanam* ; 27. (*śl.* 210) *adhivāsanādi* ; 28. (*śl.* 124) *pratishṭhāvidhi* ; 29. (*śl.* 54) *mīnādipratishṭhāvidhānam* ; 30. (*śl.* 190) *lakshmyādigrahaṇam* ; 31. (*śl.* 53) *akshamālapratishṭhāvidhi* ; 32. (*śl.* 138) इति° क्रियापादे संवर्तकप्रोक्तायां संहितायां *grahārcāsthāpanavidhiḥ*.

IV. *Caryāpāda* (on practical worship, esp. at the celebration of the *Vaishṇava* festivals), 33 *adhyāyas* : 1. (*śl.* 55) *jātinirṇaya* ; 2. (*śl.* 92) *dīkshāvidhi* ; 3. (*śl.* 185) *nityayāgavidhi* ; 4. (*śl.* 70) *agnikāryavidhi* ; 5. (*śl.* 82) *nityotsavasamārādhanakālavidhānam* ; 6. (*śl.* 79) *nṛisūktopacāranīrājanavidhi* ; 7. (*śl.* 120) *maṇḍalārādhanācāryābhishekavidhi* ; 8. (*śl.* 222) *snapanabhedavidhi* ; 9. (*śl.* 137) *sahasrakalaśābhishekavidhi* ; 10. (*śl.* 155) *dhvajārohaṇavidhānam* ; 11. (*śl.* 290) *mahotsavavidhi* ; 12. (*śl.* 91) *pushpahavirvidhānam* ; 13. (*śl.* 80) *pañcakālavidhi* ; 14. (*śl.* 195) *pavitrādyutsavavidhi* ; 15. (*śl.* 13[illegible]) *vratānushṭhānakathanam* ; 16. (*śl.* 91) *sammārjanādiphaladevadravyavyāpahāradoshakīrtanam* 17. (*śl.* 59) *jīrṇoddhārasaṃprokshaṇavidhi* ; 18. (*śl.* 152) *prāyaścittavidhi* ; 19. (*śl.* 166) *utsavaprāyaścitta-nārāyaṇabali* ; 20. (*śl.* 104) *hiraṇyagarbhādividhi* ; 21. (*śl.* 84) *adhikārivyavasthā* : 22. (*śl.* 71) *mudrāvidhi* ; 23. (*śl.* 183) *mantra-*

*kādyarthavarṇanam*; 24. (*śl.* 192) *dvādaśāksharakalpa*; 25. (*śl.* 272) *śrīmadashṭāksharamantram*; 26. (*śl.* 81) *vishṇugāyatryādimantroddhāra*; 27. (*śl.* 365) *matsyādimūrtimantroddhāra*; 28. (*śl.* 254) *annādhipatimantroddhāra*; 29. (*śl.* 190) *śriyādiparivāramantrakalpanam*; 30. (*śl.* 203) *mantroddhāra*; 31. (*śl.* 436) *gaṇeśotpattikathanamantroddhāra*; 32. (*śl.* 299) *mantroddhāra*; 33. (*śl.* 208) ends:

केन वा कथितं शास्त्रं ऋषयः कल्मषापहाः ।
इमां महोपनिषदं श्रद्दधानः शृणोति यः ॥ २०५ ॥
स याति शाश्वतं ब्रह्म दुष्प्रापमकृतात्मभिः ।
येन मां प्रथयामास यथा पद्मगुरोर्गुरुः ॥ २०६ ॥
तेनेदं श्रियते पुण्यमतनोत्पासंहिता ।
ऋषयस्तं भवंतो ऽपि भजंतु पुरुषोत्तमं ॥ २०७ ॥
प्रदास्यति स युष्मभ्यमपवर्गं तपोधनं ।
इत्यध्यायस्त्रयस्त्रिंशश्चर्यापादः प्रकीर्तितः ॥ २०८ ॥

इति श्रीनारदपंचरात्रे महोपनिषदि पाद्मे तंत्रे चर्यापादे ममाराधनांगमंत्रोद्धारो नाम त्रयस्त्रिंशो ऽध्यायः ३३ ॥

[H. T. COLEBROOKE.]

## 2533.

**1193b.** Foll. 120; size 12¼ in. by 6 in.; fairly good, modern Devanāgarī writing; 13 lines in a page.

*Lakshmītantra*, or *Nāradapañcarātrasāra*, a work in fifty *adhyāyas*, devoted to the praise and worship of *Lakshmī*, as the female *śakti* of *Nārāyaṇa-Vishṇu*, and the ultimate cause of the world; and representing itself as having been revealed by the goddess herself, under the name of *Śrī*, to *Śakra-Indra*.

It begins:

नमो नित्यानवद्याय जगतः सर्वहेतवे ।
ज्ञानाय निस्तरंगाय लक्ष्मीनारायणात्मने ॥ १ ॥
खगासनारुणाधारमीदृशं सोमभूषणं ।
सकलंकेंदुसूर्याग्निलक्ष्मीरूपमुपास्महे ॥ २ ॥
वेदवेदांगतत्त्वज्ञं सर्वशास्त्रविशारदं ।
सर्वसिद्धांततत्त्वज्ञं धर्माणामागमागमं ॥ ३ ॥
जितेंद्रियं जिताधारं रागद्वेषावशीकृतं ।
चतुर्दशांगयोगस्थं प्रसंख्यानपरायणं ॥ ४ ॥
विद्धे स्वर्भानुना भानौ पुरा तपनतां गतं ।
निदानं तपसामाद्यं तेजोराशिमनामयं ॥ ५ ॥
अत्रिमत्रिगुणोन्मेषमत्रिवर्गस्थमव्ययं ।
प्रातःसंध्यामुपासीनमृषिं हुतहुताशनं ॥ ६ ॥
पतिव्रतानां परमधर्मपत्नी यशस्विनी ।
ब्रह्मविष्णुमहेशानां जननी कारणांतरे ॥ ७ ॥
देवैरभीष्टिता(?°प्सिता) शश्वत् शांतिनित्यतपस्विनी ।
विदुषी सर्वधर्मज्ञा नित्यं पतिमनुव्रता ॥ ८ ॥
प्रत्युच्छ्रितवती तास्या(?तस्यौ) विविधधर्मसंहिता ।
प्रणिपातपुरस्कारमनसूया वाचो ऽब्रवीत् ॥ ९ ॥

अनसूया उवाच ।

भगवन्सर्वधर्मज्ञ मम नाथ जगत्पते ।
त्वत्त एव श्रुता धर्मास्ते ते बहुविधात्मकाः ॥ १० ॥
ज्ञानानि च विचित्राणि फलरूपादिभेदतः ।
एतेभ्यो भगवद्धर्मो विशिष्टो विधृतो मया ॥ ११ ॥
त्वया कथयता तास्ता भगवद्धर्मसंहिताः ।
सूचितं तत्र तत्रैव लक्ष्मीमाहात्म्यमुत्तमं ॥ १२ ॥
रहस्यत्वादपृष्टत्वान्न त्वया प्रकटीकृतं ।
तदहं श्रोतुमिच्छामि लक्ष्मीमाहात्म्यमुत्तमं ॥ १३ ॥
यत्स्वभावा हि सा देवी यत्स्वरूपा यदुद्भवा ।
यत्प्रमाणा यदाधारा यदुपाया च यत्फला ॥ १४ ॥
तदहं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां परं ।
भवेयं कृतकृत्याहं यस्य विज्ञानयोगतः ॥ १५ ॥
तन्मे दर्शय पंथानमुपपन्नास्म्यधीहि हो ।
इति तस्या वचः श्रुत्वा भगवानत्रिरब्रवीत् ॥ १६ ॥
साधु संबोधितो ऽस्म्यद्य धर्मज्ञे धर्मचारिणि ।
मया पृष्टो न वक्तव्यमिति नो छादितं(?) पुरा ॥ १७ ॥
अर्हा त्वमसि कल्याणि लक्ष्मीमाहात्म्यमुत्तमं ।
श्रोतुं श्रुतिशिरश्रेणीहृदयस्थं सनातनं ॥ १८ ॥
नारदब्रह्मसंकाशं भगवद्धर्मवेदिनं ।

ऋषय ऊचुः ।

भगवन् तच्छ्रुतो ऽस्माभिः सात्वतः सद्यसंश्रयः ॥ १९ ॥
शुद्धो भागवतो धर्मो मोक्षैकफललक्षणः ।
तत्र तत्त्वार्थकथने लक्ष्मीमाहात्म्यमुत्तमं ॥ २० ॥

कथितं तव तत्रैव नापृष्टत्वात्प्रकाशितं ।
इच्छामस्तदिदं श्रोतुं भवसागरतारकं ॥ २१ ॥
पद्मिनीर्यैभवं सर्वं प्रज्ञा भवतु नो भवन् ।
नताः स्मः शिरसा पादौ तव संसारतारकौ ॥ २२ ॥
अधीहि भो मुने दिव्यं प्रपन्नास्त्वा चिरं वयं ।
श्रीनारद उवाच ।
साधु संबोधितो ऽस्म्यद्य मुनयः संशितव्रताः ॥ २३ ॥
प्रपन्नं कथयाम्यद्य लक्ष्मीतंत्रं सनातनं ।
यथा सा दृश्यते देवी स्वरूपगुणवैभवैः ॥ २४ ॥ ०
पंचरात्रस्य कृत्स्नस्य सैषा निष्ठा सनातनी ।
सैषा नारायणी देवी स्थिता नारायणात्मना ॥ ४१ ॥ ०

The titles of the chapters are as follows:

1. (*śl.* 57) श्रीनारदपंचरात्रे महोपनिषदि लक्ष्मीतंत्रे *lakshmīśakrasaṃvādaḥ*; 2. (*śl.* 58) इति श्रीनारदपंचरात्रसारे लक्ष्मीतंत्रे (thus always subsequently) तृतीयोध्यायः; 3. (*śl.* 38) *lakshmī-indrasaṃvāda*; 4. (*śl.* 68) *śaktivarṇanam*; 5. (*śl.* 80) *tattvavarṇanam*; 6. (*śl.* 46) *shaṭkośaprakāśa*; 7. (*śl.* 45) *indralakshmīsaṃvāda*; 8. (*śl.* 43) *lakshmyavatāraprakāśa*; 9. (*śl.* 58) *devīmahimāvarṇanam*; 10. (*śl.* 44) *paravyūhādiprakāśa*; 11. (*śl.* 54) *vaibhavaprakāśa*; 12. (*śl.* 57) *tirobhāvādiśaktiprakāśa*; 13. (*śl.* 40) *vicchittisvarūpavarṇanam*; 14. (*śl.* 59) *svarūpaprakāśa*; 15. (*śl.* 36) *upāyaprakāraprakāśa*; 16. (*śl.* 44) *upāyaprakāravivaraṇam*; 17. (*śl.* 106) *rahasyopāyaprasaṅga*; 18. (*śl.* 51) *mantraprabhāvavarṇanam*; 19. (*śl.* 41); 20. (*śl.* 52) *mātṛikāprakāśa*; 21. (*śl.* 41) *guruśishyalakshaṇam*; 22. (*śl.* 40) *mantraprabhāvavarṇanam*; 23. (*śl.* 37) *mātṛikāprakāśa*; 24. (*śl.* 77) *tāraprakāśa*; 25. (*śl.* 53) *tārānutāraprakāśa*; 26. (*śl.* 42) *saptavidyāprakāśa*; 27. (*śl.* 50) *solācāraprakāśa*; 28. (*śl.* 58) do.; 29. (*śl.* 75) *agnīshomavibhāgaprakāśa*; 30. (*śl.* 57) *kriyāśaktiprakāśa*; 31. (*śl.* 90) *sudarśanaprakāśa*; 32. (*śl.* 63) *sthūlaprakāśa*; 33. (*śl.* 122) *aṅgopāṅgādimantraprakāśa*; 34. (*śl.* 139) *snānavidhiprakāśa*; 35. (*śl.* 80) *bhūtaśuddhiprakāśa*; 36. (*śl.* 149) *antaryāgaprakāśa*; 37. (*śl.* 76) *bāhyayāgaprakāśa*; 38. (*śl.* 92) *bahiryāgaprakāśa*; 39. (*śl.* 48) *bāhyayāgaprakāśa*; 40. (*śl.* 120) *vidhiprakāśa*; 41. (*śl.* 78) *dīkshāvidhiprakāśa*; 42. (*śl.* 81) *mantropāsanakrama*; 43. (*śl.* 111) *piṇḍasiddhiprakāśa*; 44. (*śl.* 64) *rahasyaprakāśa*; 45. (*śl.* 125) *mūrtiprakāśa*; 46. (*śl.* 41) *siddhiprakāśa*; 47. (*śl.* 35) *kīrtimantrasiddhiprakāśa*; 48. (*śl.* 38) *mūrtinirṇaya*; 49. (*śl.* 146) *māyāsiddhiprakāśapratishṭhāvidhi*; 50. (*śl.* 235) ends:

मंत्राणां परमं मंत्रं मुद्रितं मातमात्ध्यया ।
नाव्रतख्यायिने देयं न कृतघ्नाय वै तथा ॥
न चार्तवयिदे नित्यं नासूयादूषिताय च ।
न वासुदेवाभक्ताय न चाभक्तिमते मयि ॥
देयमेतत्सुशीलाय सुजाताय तपस्विने ।
निर्णीतवेदतंत्राय मद्भक्ताय विशेषतः ॥
भूयसीं वहते भक्तिं वासुदेवे जनार्दने ।
शुचिव्रताय दक्षाय सदानुष्ठानशालिने ॥
एतत्ते कथितं सर्वं यत्पृष्टाहमिह त्वया ।
प्रीताहं त्वयि देवेश भूयः किं श्रोतुमिच्छसि ॥
इति श्रीनारदपंचरात्रसारे श्रीसूक्ते श्रीसूक्तप्रभावप्रकाशो नाम पंचाशोध्यायः ५० ॥ श्रीलक्ष्मीतंत्रं समाप्तं ॥

Whether this work is identical with the *Lakshmīsaṃhitā* referred to at p. 846*a* above is doubtful, though not improbable.

[H. T. Colebrooke.]

## 2534.

**968b.** Foll. 18; size 8¾ in. by 3¾ in.; small, indifferent Devanāgarī writing of about 1750 A.D.; fourteen lines in a page.

*Tantrādhikārinirṇaya*, by *Bhaṭṭojibhaṭṭa*, being a plea in favour of the *Tantric* rites of the *Pāñcarātras* or *Pāñcarātrasiddhāntins*, a *Vaishṇava* sect who profess the *varṇāśramācāra* as their law, derived from the *Veda*.

It begins:

विश्वेशं सच्चिदानंदं वंदे ऽहं यो ऽखिलं जगत् ।
चरीकर्ति वरीभर्ति संजरीहर्ति लीलया ॥ १ ॥

शुद्धवैदिकमार्गेण शिवमाराधयन्सदा ।
द्विजेंद्रोऽसौ विजयते श्रीमान्(r. श्रीमान् रु)क्मांगदः
[सुधीः ॥ २ ॥

तस्य धर्मैकनिष्ठस्य कृतज्ञस्यातभास्वतः ।
प्रीतये पांचरात्रादेरधिकारी निरूप्यते ॥ ३ ॥

पांचरात्रादीनां प्रामाण्ये सत्यधिकारिविशेषचिंता युज्यते । तदेव तु दुर्लभं । तथा हि कौर्मे एकादशाध्याये ।

कापालं पांचरात्रं च यामलं वाममार्हतं ।
एवंविधानि चान्यानि मोहनार्थानि तानि तु ॥
ये कुशास्त्राभियोगेन मोहयंतीह मानवान् ।
मया सृष्टानि शास्त्राणि मोहायैषां भवांतरे ॥

इति पांचरात्रादीनां मोहकत्वमुक्तं । तथा वासिष्ठलैंगेऽध्याये ।

अंकिताश्च भविष्यंति देवतायुधलांछनैः ।
नराणां नामरूपाभ्यां युगांते समुपस्थिते ॥
पांचरात्रं प्रशंसंति केचिद्भागवतं मुने ।
केचित्कापालमिच्छंति केचित्पाशुपतं मुने ॥
केचिद्बौद्धं प्रशंसंति केचिद्दैगंबरं मुने ।
केचिल्लोकायतं श्रयन् केचित्सोमं महामुने ॥°

Especial importance is attached by the followers of this sect to the practice of burning in the mark of *Vishṇu's* disc on the forehead and other parts of the body (*cakrāṅkana*); this being represented as the one ceremony through which a man becomes entirely regenerated; and those who object to it, or substitute the *Liṅga* for the *Cakra*, being styled the lowest of mankind.

Of authorities quoted, besides numerous *Purāṇas*, may be mentioned: *Nāradīya-pāñcarātra*, fol. 12*b*; *Brahmagītā*, fol. 13*a*; *Bhāṭṭa-tantrāṇi*, fol. 15*b*; *Mantrarājānushṭubvidhāna*, fol. 17*a*; *Mādhava*, fol. 4*a* (on whose connection with this sect see Aufrecht, Cat. Bodl., p. 248*a*); *Pāñcarātram bhāgavatam tantram Vaikhānasābhidham*, fol. 9*b*; *Hemādri*.

It ends:

बालगोपालसद्दुष्टविद्वदाभासजल्पितैः ।
प्रतारितानां मूढानामज्ञानविनिवृत्तये ॥ १ ॥
विशुद्धाद्वैतसिद्धांतप्रतिष्ठापनतत्परः ॥
भट्टोजिभट्टः कृतवानिमं ग्रंथं सुधाग्रणीः ॥ २ ॥

इति श्रीमदद्वैतसिद्धांतप्रतिष्ठापकश्रौतस्मार्तसत्संप्रदायप्रवर्तकश्रीमद्भट्टोजीभट्टविरचितस्तंत्राधिकारिनिर्णयः समाप्तः ॥

[H. T. Colebrooke.]

## 2535.

**3245 i.** Foll. 30–39 of vol.; size $15\frac{1}{4}$ in. by $9\frac{1}{2}$ in., folio; European paper; minute, neat Telugu handwriting; 42–44 lines in a page.

*Bharadvājasaṃhitā* (or *Bhāradvājasaṃhitā*), in four *adhyāyas*, and a supplement of other four chapters.

The first leaf (or leaves) of the original MS. from which this MS. was transcribed seems to have been worm-eaten, blanks being left in several places. The same work is described in Rāj. Mitra's Notices, viii., p. 262, from which the lacunæ are supplied in the following extracts.

It begins: भारद्वाजसंहिता ॥

[श्रुत्वा] तु सकलान् धर्मान् सिद्धिमेषां च शाश्वतीं ।
भूय एव मुनिश्रेष्ठमिदमूचुर्महर्षयः ॥
केनोपायेन [भगवन्निह सर्वेऽपि जंतवः ।
प्राप्नुयुः] परमां सिद्धिं न देवा(l. सद्यो)विगतकल्मषाः ॥
तेषां तद्वचनं श्रुत्वा भरद्वाजो महामनाः ।
सस्मार परमं गुह्यं पुनश्चे[दमभाषत] ॥ °

इति प्रपत्त्यधिकारः fol. 2*a*; वृत्त्यधिकारः ib.; इत्यपायप्रशमनाधिकारः fol. 2*b*; दूत्यधिकारः fol. 3*a*; भक्त्यधिकारः ib.; सत्सेवनाधिकारः fol. 3*b*; इष्टाधिकारः fol. 4*a*; दुष्टविरुद्धाधिकारः ib.; भक्तिविरुद्धाधिकारः ib.; लक्ष्मीविरुद्धाधिकारः fol. 4*b*; सत्सेवाविरुद्धाधिकारः ib.; भक्त्यधिकारः fol. 5*a*; इति न्यासोपदेशे चतुर्थोध्यायः ib.

इति भारद्वाजसंहितायां परिशिष्टे प्रथमोध्यायः fol. 6*b*; °द्वितीयोध्यायः fol. 7*b*; °तृतीयोध्यायः fol. 9.

It ends:

इदं किलात्मनो न्यासाज्जातो वृत्त्याख्यपादपः ।
असौ फलमयः सप्यस्तत्र(!) चोत्पद्यते विना ॥

मुमूक्षत्वाद्गुरोपत्वान्महत्त्वाद्गौरवादपि ।
मयायं परमो धर्मः प्रोक्तः स्थित्यै पुनः पुनः ॥
इति भरद्वाजसंहितायां परिशिष्टे चतुर्थोऽध्यायः ॥

[MACK. COLL.]

## 2536.

**2931.** Foll. 40; size 12 in. by 6 in.; large, thick, modern Devanāgarī writing; five lines in a page.

*Gopālasahasranāma*, professing to form part of the *Sammohanatantra*.

It begins:

कैलासशिखरे रम्ये गौरी पृच्छति शंकरं ।
ब्रह्मांडाखिलनाथस्त्वं सृष्टिसंहारकारकः ॥ १ ॥
त्वमेव पूज्यसे लोकैर्ब्रह्मविष्णुसुरादिभिः ।
नित्यं पठसि देवेश कस्य स्तोत्रं महेश्वर ॥ २ ॥
आश्चर्यमिदमाख्यातं जायते मयि शंकर ।
तत्प्राणेश महाप्राज्ञ संशयं छिंधि शंकर ॥ ३ ॥
श्रीमहादेव उवाच ॥
धन्यासि कृतपुण्यासि पार्वति प्राणवल्लभे ।
रहस्यातिरहस्यं च यत्पृच्छसि वरानने ॥ ४ ॥
स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ ५ ॥
दत्ते च सिद्धिहानिः स्यात् तस्माद्यत्नेन गोपयेत् ।
इदं रहस्यं परमं पुरुषार्थप्रदायकं ॥ ६ ॥
धनरत्नौघमाणिक्यतुरंगमगजादिकं ।
ददाति स्मरणादेव महामोक्षप्रदायकं ॥ ७ ॥
तत्ते ऽहं संप्रवक्ष्यामि शृणुष्वावहिता प्रिये ।
यो ऽसौ निरंजनो देवश्चित्स्वरूपो जनार्दनः ॥ ८ ॥
संसारसागरोत्तीर्णकारणाय नृणां सदा ।
श्रीगंगाद्रवरूपेण त्रैलोक्यं व्याप्य तिष्ठति ॥ ९ ॥

It ends:

यद्गृहे पुस्तकं देवि पूजितं यत्र तिष्ठति ।
न मारी न च दुर्भिक्षं नोपसर्गभयं क्वचित् ॥ १६६ ॥
सर्पादिभूतयक्षाद्या नश्यंति नात्र संशयः ।
श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा ।
यस्य गेहे सहस्रं च नाम्नां तिष्ठति पूजितं ॥ १६७ ॥
इति श्रीसंमोहनतंत्रे पार्वतीहरसंवादे गोपालसहस्रनाम संपूर्णं ॥

[ ? ]

## 2537.

**1412a.** Foll. 31; size 12¾ in. by 5 in.; indifferent Devanāgarī writing of 1792 A.D.; 12 or 13 lines in a page.

*Sāṅkhyāyanatantra*, or *Shaḍvidyāgama*, a series of directions, given by *Īśvara* to *Krauñcabhedana* (*Kumāra*), regarding the means of obtaining supernatural power in warfare; in 34 *paṭalas*.

It begins:

मध्ये सुधाब्धिमणिमंडपरत्नवेद्यां
  सिंहासनोपरि गतां परिपीतवर्णां ।
पीतांबराभरणमाल्यविभूषणांगीं
  देवीं नमामि धृतमुद्गरवैरिजिह्वां ॥ १ ॥
कैलासशिखरासीनं गौर्या वामांगसंस्थितं ।
भारतीपतिवाल्मीकिशिवासंनुतमिष्टदं ॥ २ ॥
अष्टदिक्पालसंयुक्तं विघ्नेशाष्टकसेवितं ।
भैरवाष्टवृतं देवं मातृमंडलवेष्टितं ॥ ३ ॥
महापाशुपतास्त्रांतं प्रथमैरावृतं प्रभुं ।
नत्वा स्तुत्वा कुमारश्च इदं वचनमब्रवीत् ॥ ४ ॥
चापचर्यासु निपुणैर्युद्धचर्याभयंकरैः ।
नानामायाविनं चैव जेतुमिच्छामि राक्षसं ॥ ५ ॥
तस्योपायं च तद्विद्यां वद मे करुणाकर ।
पुत्रो ऽहं तव शिष्यो ऽहं कृपापात्रो ऽहमेव च ॥ ६ ॥
ईश्वर उवाच । साधु साधु महाप्राज्ञ क्रौंचभेदन कोविद ।
ब्रह्मास्त्रेण प्रयोगेन स संहारो भवेत्कलौ ।
तद्विद्यां च प्रवक्ष्यामि त्रिषु लोकेषु दुर्लभं ॥ ७ ॥
पुत्रो देयः शिरो देयं न देयं यस्य कस्यचित् ।
ब्रह्मास्त्रस्तंभिता(? °नी) विद्या स्तम्भमायामानु(? °गम)-
[स्तथा ॥ ८ ॥
प्रवृत्तिरोधिनी विद्या बगला(!) च कुमारक ।
मंत्रजीवनविद्या च प्राणिप्रज्ञापहारिका ॥ ९ ॥
षट्कर्माकरविद्या च एते पर्यायवाचकाः ।
षट्प्रयोगा च या विद्या षड्विद्यागमपूजिता ॥ १० ॥
तिरस्कृताखिला विद्या त्रिशक्तिमयमेव च ।
स्तंभनेन विना शांतिर्वश्यं चैव तु तद्विना ॥ ११ ॥
मोहना कर्षणं चापि विद्वेषो घाटनं तथा ।
मारणं भ्रांतिरुद्वेगकारणं च कुमारक ॥ १२ ॥

विद्या च बगला नाम मुनिगुह्या सुपायिनी ।
विद्या वाक्स्तंभिनी विद्या स्वविद्या च न भासते ॥ १३ ॥
तस्मादेतत्परा विद्या कमलासनशोषिनी ।
पञ्चमा नारदी विद्या सांख्यायनमुनिं प्रति ॥ १४ ॥
उपदेशक्रमेणैव चोक्तवान्मेरुमंदिरे ।
तेन देवी कटाक्षेण कृतवानागमं भुवि ॥ १५ ॥
मूलमंत्रोपविद्याश्च संगविद्याश्च विस्तरात् ।
प्रयोगं चोपसंहारं तदाराधनमेव च ॥ १६ ॥
विस्तरेणोक्तवानस्मिन् वक्ष्ये तत्सर्वमादरात् ।
स्वविद्या रक्षिणी विद्या स्वमंत्रफलदायिनी ॥ १७ ॥ °

P. 1. *mantramāhātmya*; 2. *dīkshā*; 3. *abhisheka*; 4. *brahmāstrayantram*; 5. *ekāksharīmahāmantravaibhavam*; 6. *ekāksharīmahamantraprayoga*; 7. *vagalāyāḥ shaṭtriṃśadaksharīvidyā*; 8. *vagalāmantrarājasya prayogaḥ*; 9. *yantrasādhanam*; 10. *yantralepanam*; 11. *yantratarpaṇavidhi*; 12. *mantroddhāra* (*gāyatrī vagalākhyā*); 13. *vagalā(devī)pūjā*; 14. *vagalārcāvidhi*; 15. *pañcāstravidyā*; 16. *vedamukhyālavidyā* (*pañcāstraprayoga*); 17. *bagalāyāḥ śatāksharīmahāmantraḥ*; 18. *bagalāyāḥ prayogaḥ*; 19. ditto; 20. *vagalāyāḥ paravidyābhedanam*; 21. *paraviyābhakshaṇam*; 22. *vagalāstram*; 23. *vagalāstramahāmantraprayoga*; 24. *vagalāmālikālakshaṇam*; 25. *vagalāyāś caturaksharamāhātmyam*; 26. *caturaksharīprayoga*; 27. *bagalāhomaprayoga*; 28. *stambhinīvidyāprayoga*; 29. *bagalāhṛidaya-mantraprayoga*; 30. *bagalāshṭāksharamantravidhi*; 31. *pañcāstraphalam* (*trailokyavijaya*); 32. *vījabheda*; 33. *sarvakarmanāśanam* (*kavacaprayoga*); 34. *rahasyasyātirahasyam*.

It ends:

गोपनीयं प्रयत्नतः रहस्यातिरहस्यं च ।
[?गोपनीयं गोपनीयं] रहस्यातिरहस्यकं ॥ ३४ ॥
इति संक्षेपतः प्रोक्तं तोपयेद्दक्षिणादिना ।
प्रयोगस्योपसंहारः कर्तव्यः सिद्धिमिच्छता ॥ ३५ ॥
इति षड्विद्यागमे सांख्यायनतंत्रे चतुस्त्रिंशः पटलः ॥

The colophons also have the spellings शांख्यायन° and शांख्यायन°.

Cf. Rāj. Mitra, Notices, vii., p. 15; and Aufrecht, Cat. Cat. under the entries *Sāṅkhyāyanatantra*, *Shaḍvidyāgama*, and *Shaḍvidyāgamasāṅkhyāyanatantra*.

[H. T. Colebrooke.]

## 2538.

**2786a.** Foll. 99; size 12 in. by $5\frac{1}{4}$ in.; fairly good Devanāgarī writing, by several hands; 14–16 lines in a page.

*Kādimata(tantra)*, a work treating of the *Shoḍaśanityātantrāṇi*, or mystic doctrines of the sixteen constant (forms of *Śakti*). It is divided into 36 chapters (*paṭala*) of 100 *ślokas* each.

It begins:

अनाद्यंतो ऽपराधीनः स्वाधीनभुवनत्रयः ।
जयत्यविरतो व्याप्तविघ्न[:] कालो विनायकः ॥ १ ॥
पार्वत्युवाच ।
भगवन्सर्वतंत्राणि भवतोक्तानि मे पुरा ।
नित्यानां षोडशानां च नव तंत्राणि कृत्स्नशः ॥ २ ॥
तेषामन्योन्यसापेक्ष्याज्जायते मतिविभ्रमः ।
तस्मात्तु निरपेक्षं मे तंत्रं तासां वद प्रभो ॥ ३ ॥
ईश्वर उवाच ।
शृणु कादिमतं तंत्रं पूर्णमन्यानपेक्षया ।
गोप्यं सर्वप्रयत्नेन गोपनं तंत्रचोदितं ॥ ४ ॥
पार्वत्युवाच ।
कथं कादिमतं नाम्ना तन्मे ब्रूहि महेश्वर ।
ईश्वर उवाच ।
कादिकालीति शक्ती स्तः पुरा तत्सम्मतान्मया ॥ ५ ॥
प्रोक्ते तंत्रे कादिकालीमताख्ये तेन नामतः ।
शृणु तत्सर्वतंत्राणां राजानं सर्वसिद्धिदं ॥ ६ ॥
कादिसंज्ञा भवद्रूपा सा शक्तिः सर्वसिद्धये ।
तंत्रं मदुक्तं भुवने नवनाथैरकल्पयत् ॥ ७ ॥

The subjects treated of in the several chapters, according to the commentary, are as follows (cf. Rāj. Mitra, Notices, iii., p. 71, where, however, some of the names are given wrongly):

1. *tantrāvatāraprakāśanam*; 2. *navanātha-*

*vaibhavapūjā*; 3. *shoḍaśanityāvidyāsvarūpa*; 4. (*prathamā-*) *Lalitānityā-nityasaparyākrama*; 5. *Lalitānityārcanam*; 6. *shoḍaśanityānaimittika-kāmyapūjā*; 7. *Kāmeśvarīnityāyā vidhānam*; 8. *Bhagamālinīnityāvidyāvidhānam*; 9. *Nitya-klinnā*(thus always)*nityāvidyā*; 10. *Bheruṇḍāni-tyāvidyā*; 11. *Vahnivāsinīnityāvidyā*; 12. *Ma-hāvajreśvarīnityāvidyā*; 13. *Śivadūtīnityāvidyā*; 14. *Tvaritānityāvidyā*; 15. *Kulasundarīnityā-vidyā*; 16. *Nityānityāvidyā*; 17. *Nīlapatākānityā-vidyā*; 18. *Vijayānityāvidyā*; 19. *Sarvamaṅ-galānityāvidyā*, 20. *Jvālāmālinīnityāvidyā*; 21. (*shoḍaśī-*) *Citrānityāvidyā*; 22. *sarvāsāṃ nityā-nām balidevatā-Kurukullāvidhānam*; 23. *shoḍa-śanityāṅgabhūtāyāḥ Pañcamyā Vārāhyā vidyā*; 24. *shoḍaśanityādhyānaprapañca*; 25. *shoḍaśa-nityāmātṛikākāravyāpti*; 26. *shoḍaśanityāvyāpti-vaibhavaprakāśakamantrasya vyāptiprakāśanam*; 27. *shoḍaśanityākālātmakaprāṇavyāpti*; 28. *sho-ḍaśanityānāṃ lokakālatādātmyam*; 29. *shoḍaśa-nityānāṃ homārthamaṇḍapakuṇḍādinirmāṇam*; 30. *vāstudevatāpūjā*; 31. *shoḍaśanityābhaktini-shṭha-arimardanavidhānam*; 32. *saumyahoma-vidhānam*; 33. *lalitāvidyāyāḥ svarūpabhedavi-dhānam*; 34. *siddhasārasvatādividyā*; 35. *nityā-nāṃ svātmatvavāsanātattvavidyā*; 36. *paramār-thasvarūpaprakāśanam.*

It ends:

यस्तंत्रमेतत्सकलं नित्याविद्यास्तु षोडश ।
शक्त्या संगृह्य विधिवद्भजते स मदंशकः ॥ १०० ॥
शिवतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।
अस्या निष्कलनाश्चित्रे तत्त्वं स्वात्मसात्कृतं ॥ १०१ ॥

इति षोडशनित्यातंत्रेषु श्रीकादिमते षट्त्रिंशः पटलः ॥ ० संवत् १७१९ वर्षे शाके १५८४ प्रवर्तमाने लिखितं मया कल्याणेन स्वात्मार्थे० मिती माहसुदि २ गुरौ लिखितं ॥

Cf. Burnell, Tanjore MSS., p. 206.

[COLL. OF FORT WILLIAM.]

## 2539.

**93.** Foll. 229 (numbered 1–232; nos. 107, 207, 208 having been omitted); size 10 in. by 5 in.; modern Devanāgarī writing; eight lines in a page.

The same work. This MS. is apparently of Kashmir origin. [H. T. COLEBROOKE.]

## 2540.

**1016.** Foll. 201 + 134; size 11¾ in. by 4 in.; carelessly written, in Devanāgarī, by two different hands; ten lines in a page.

*Manoramā*, a commentary on the *Kādimata-tantra*; composed—in the year 1660 (?1663 A.D.)—by *Subhagānandanātha*, surnamed *Pra-pañcasārasiṃharājaprakāśa* (!). The author's real name seems to have been *Śrīkaṇṭheśa*. having been in the employ of the king of Kashmir, he wrote this commentary in the Deccan, whilst staying with a certain *Nrisimha Rāja*, during a pilgrimage to Rāmasetu (Ceylon). He, however, carried the work only as far as the twenty-second *paṭala* under the name of *Subhagānandanātha*, and left the other 14 *paṭalas* to be completed by his pupil *Prakāśā-nanda Deśika*.

Rather incorrect. It begins (somewhat corrected):

आद्यश्लोकेन प्रबंधवाक्यार्थगर्भविनायकस्तुतिः क्रियते । तत्र अनाद्यंतः कालस्याद्यंतरहितत्वात् । अपराधीनः इतरप्रेरणा-विधुरः । स्वाधीनभुवनत्रयः स्वायत्तज्ञातज्ञानज्ञेयात्मभुवनत्रयः । जयति विश्वोत्कृष्टो भवतीत्यर्थः । अविरतः कालस्य संतन्यमान-त्वात् । व्याप्तविश्वः कालरूपाभ्यामनवच्छिन्नत्वात् । काल इति विशेषणस्य नाम । विनायकः विघ्नेश्वरो विगतनायक इति च । एतदुक्तं भवति । एवमुक्तः कालरूपो विनायकः सर्वोत्कृष्टो भवतीति तथाविधो विगतनायकः कालो विश्वोत्कृष्टो भव-तीति ० ॥ तत्र सर्वतंत्राणि नित्याषोडश(r. शि)कार्णवोकरुद्रया-मलादिचतुःषष्टिमुख्यानि तंत्राणि नव तंत्राणि सुंदरीहृदयनि-त्याषोडशकार्णवचन्द्रज्ञानमातृकातंत्रसंमा(r. मो)हनतंत्रवामकेश्वर-बहुरूपाष्टकप्रस्तारचिन्तामणिमेरुप्रस्ताराख्यानि(!) इति ॥ अन्यो-

न्यसापेक्ष्यात् तंत्रांतरोक्तार्थपूजाङ्गीकारेणाकृत्वात्(!)। विभ्रमः व्यामोहः। तासां षोडशानां नित्यानाम्। अन्यानपेक्षया इतरतंत्रोक्तार्थपूजांगीकारमकृत्वोपदेशात्। गोपनं तंत्रचोदितमिति पंचविंशे प[ट]ले षट्पंचाशत्श्लोकोक्तसंकेतविधानेनेत्यर्थः। नवनाथैः द्वितीयपटलप्रतिपादितस्वरूपैः अकल्पयत् प्रसारयति स्म। तया कादिशक्त्या तैः नवनाथैः। सा तैः सार्धं प्रजेश माम् कल्पान्तसानेषु(!) सा कादिशक्तिं(!) नवनाथैस्तंत्रेण च सार्धमपि त्रिलोनी तिष्ठतीत्यर्थः। चाप इत्यादिभिः संग्रह इत्यंतैर्दशभिः श्लोकैस्तत्पटलास्तदर्थांश्चोपदिशति। °

It ends: यस्तंत्रमित्यादिना श्लोकेन एकेन यथाविधिप्राप्ततंत्रार्थवतो(? ता)फलमुपदिशति। तत्र विधिवत् नित्यनैमित्तिकादिप्रोक्तक्रमात्। सः। भजनपरः। मदंशकः चित्स्वरूप (?चि°) ईश्वर इति यावत्॥ श्रीः॥ इति षोडशनित्यातंत्रेषु श्रीकादिमताख्यस्य परिपूर्णस्य तंत्रस्य प्रपंचसारसिंहराजप्रकाशाभिधानेन सुभगानंदनाथेन विरचितायां मनोरमाख्यायां व्याख्यायां देवतादेशिकशिष्यप्रपंचादीनां परमार्थस्वरूपप्रकाशनपरं षट्त्रिंशपटलं परिपूर्णं परामृष्टम्॥

This colophon occurs, *mutatis mutandis*, at the end of each *paṭala*. After some *ślokas* containing computations of the extent of the commentary, the MS. proceeds:

> काश्मीरराजस्य गु[रु]: श्रीकंठेशो द्विजेश्वरः।
> दक्षिणापथपुण्यौघपरिणामाद्भयोदधिः॥
>
> कदाचिदागतो द्रष्टुं रामसेतुं स्वलीलया।
> तेनैवानुगृहीतो ऽभूमध्ये मार्गे नृसिंहराट्॥
>
> तंत्राण्यधीतवांस्तस्मान्नित्यानां तेषु निर्मिता।
> व्याख्या मनोरमाभिख्या तेन कादिमतस्य तु॥
>
> सुभगानंदनाथेन द्वाविंशपटलावधि।
> तदाज्ञयावशिष्टानां पटलानां विनिर्ममे॥
>
> चतुर्दशानां तच्छिष्यः प्रकाशानंददेशिकः।
> तौ सुंदरवरस्याभूद्याख्यौ प्राक्संप्रदायतः॥

समाप्ता चेयं तंत्रराजटीका मनोरमाख्या श्रीगुरुभ्यो नमः॥

> आकाशरसतर्केन्दुमिते ऽब्दे कार्त्तिके सिते।
> तंत्रराजस्य टीकेयं पूर्णायां पूर्णतामगात्॥

संवत् १७५२ लेखकशाकल्समः १६५६॥

[H. T. COLEBROOKE.]

## 2541.

**3011.** Foll. 84; folio, size 12¼ in. by 7½ in.; European paper; good Devanāgarī writing; 22-24 lines in a page.

*Ānandatantra*, in 20 *paṭalas*, treating, in form of dialogues between *Śrī Devī* and *Kāmeśvara*, of the mysteries of *liṅga* and *śakti* worship in all its details; but extending its observations, in the last five chapters, also on the negation of caste distinctions, on the various systems of philosophy, and on *Tantric* philosophy and sectarianism in particular.

Other titles given to it in the first colophon are *Nityāshoḍaśikārṇavatantra* and *Bhagamālinīsaṃhitā*; the latter title being derived from one of the names under which the goddess is invoked in vii. 160.

The MS. was transcribed from a Telugu copy, and is written in verse form, as if intended for press. In the first few pages the writing has suffered from the sticky condition of the ink.

It begins:

> आनंदकंदभूताय जगदानंदहेतवे।
> नमः सततभोगाय महालिंगाय शंभवे॥ १॥
> मेरुपृष्ठे सुखासीनं मृगांककृतशेखरं।
> कामेश्वरं महादेवं श्रीदेवी परिपृच्छति॥ २॥
> श्रीदेव्युवाच॥ देवदेव महादेव जगदानंददायक।
> करुणामृतवाराशे निष्कलंक निरंजन॥ ३॥
> अस्ततंत्रजगच्चक्रसतताधारमूर्तये।
> स्वतंत्राय नमस्तुभ्यं यत्किंचित्पृच्छ्यते मया॥ ४॥
> मय्यनुग्रहबुद्धिश्चेत् कथयस्व मम प्रभो।
> त्वमेव संशयच्छेत्ता सर्वशास्त्रेषु कीर्तितः॥ ५॥
> सर्वत्र दर्शनेनैव सर्वेषां चापि वर्त्मनि।
> त्वमेव पूज्यसे शंभो नापरः को ऽपि पूरुषः॥ ६॥
> सर्वत्रापि समानेषु तवांगेषु महेश्वर।
> अधिकात्पूजनं केन तव लिंगस्य कीर्त्यते॥ ७॥
> न मूर्धनि न वा पादे नासयोर्नापि वक्षसि।
> अर्चितस्त्वं प्रसन्नो ऽसि मया लिंगमहेश्वर॥ ८॥

एतन्मे संशयं देव छेत्तुमर्हस्यशेषतः ।
कामेश्वर उवाच ॥
शृणुष्व देवि सुश्रोणि तद्धेतुं कथयामि ते ॥ ९ ॥
यः परब्रह्मरूपी सच्चिदकलः परमेश्वरः ।
सर्वदेवशरीरांतर्वर्तिजीवपदात्मकः ॥ १० ॥
सर्वत्र वर्तमानो ऽपि सर्वो स्पष्टनिजाकृतिः ।
आनंदरूपी यः प्रोक्तस्तस्यानं लिंगमुच्यते ॥ ११ ॥
य आनंदरसो ज्ञेयो रसो रेत इति स्मृतं ।
रसो वै स रसत्येव(?) लब्धानंदी भवेदिति ॥ १२ ॥°

*P.* i. 47 *ślokas*, colophon: इति द्वात्रिंशत्कोटिविस्तीर्णे नित्याषोडशिकार्णवे तंत्रे भगमालिनीसंहितायां शतसाहस्रियामानंदतंत्रे प्रथमः पटलः ॥ ii. 60 *śl.*; iii. 60 *śl.*; iv. 49 *śl.*; v. 73 *śl.*; vi. 81 *śl.*; vii. 180 *śl.*; viii. 94 *śl.*; ix. 90 *śl.*; x. 97 *śl.*; xi. 66 *śl.*; xii. 178 *śl.*; xiii. 34 *śl.*; xiv. 64 *śl.*; xv. 93 *śl.*; xvi. 132 *śl.*; xvii. 165 *śl.*; xviii. 112 *śl.*; xix. 125 *śl.*; xx. 110 *śl.* (together 1913 *ślokas*).

It ends:

मल्लिंगप्रतिमां कृत्वा स्वयंभूकल्पनादिभिः ।
स्वयंभुबाणलिंगं च तथा स्फटिकलिंगकं ॥ १०४ ॥
रत्नलिंगं च सिकतालिंगं सौवर्णलिंगकं ।
पार्थिवं लिंगमीशानि तदा राजतलिंगकं ॥ १०५ ॥
एवमेव प्रकारेण मल्लिंगप्रतिमाशतं ।
समस्तैः पूज्यते देवि सर्वसौभाग्यकामुकैः ॥ १०६ ॥
एतत्ते सर्वमाख्यातमेतद्यः पठति प्रिये ।
एतद्यश्च शृणोत्येव एतद्यश्चापि नंदति ॥ १०७ ॥
एतद्यः पूजयत्यंतः पुस्तके लिखिताक्षरं ।
एतच्च वस्तु व्याख्याति विधिनक्रास्य यः क्रमं ॥ १०८ ॥
सर्वसौभाग्यसंपन्नः सिद्धिकांतापतिर्भवेत् ।
मल्लिंगार्चनहेतुर्यस्त्वया पृष्टः कुलेश्वरि ॥ १०९ ॥
स मया विशदः प्रोक्तः किं भूयः श्रोतुमिच्छसि ॥ ११० ॥

इति द्वात्रिंशत्कोटिविस्तीर्णे विद्यास्वरूपं नाम विंशतितमः पटलः ॥ आनंदतंत्रं संपूर्णं ॥

According to a note, in the hand of Mr. C. P. Brown, this work "is exceedingly popular in the South of India"; though it seems to be unknown in Northern India.

[C. P. BROWN.]

## 2542.

**1508a.** Foll. 131 (and an additional leaf, 83); size 11¾ in. by 4¼ in.; indifferent, modern Devanāgarī writing, by three different hands; ten lines in a page.

*Śāradātilaka*, in 25 chapters (*paṭala*); by *Lakshmaṇa Deśikendra*, son of *Śrī-Kṛishṇa*, and grandson of *Vijayācārya Paṇḍita*.

For an analysis of the work (for which the present MS. was collated) see Aufrecht, Cat. Bodl., no. 160. For the author's genealogical account at the end of the work, which is very corrupt in this and the Oxford MSS., see Raj. Mitra, Notices, ii., p. 146.

[H. T. COLEBROOKE.]

## 2543.

**2945.** Foll. 166; size 11¾ in. by 5¼ in.; modern Nepalese writing; nine lines in a page.

*Śāradātilaka*, with marginal glosses, and diagrams illustrating the text.

A more correct MS. than the preceding one. The last leaf, however, is wanting.

[B. H. HODGSON.]

## 2544.

**1617c.** Foll. 6; size 7 in. by 5½ in.; very careless, modern Devanāgarī writing; twelve lines in a page.

*Śāradātilaka*, chapter 24, here called *Dhūmavatīyantrapaṭala*.

[H. T. COLEBROOKE.]

## 2545.

**518.** Foll. 64; size 9¾ in. by 4 in.; indifferent Devanāgarī writing; eight lines in a page.

*Śāradā(tilaka)ṭīkā*, or *Gūḍhārthaprakāśikā*, annotations on the *Śāradātilaka*, by a writer

who signs himself *Kāmarūpapati-paṇḍita*, and *Jagadguru Bhaṭṭācārya Siddhāntavāgīśa*. *Paṭalas* 15–25.

The MS. consists of three different portions, viz.:—

*a*) Foll. 33–63 (written in a sprawling hand with a thick continuous top-line after the fashion of cursive vernacular writing), containing the commentary on *paṭalas* 15–20, but without beginning and end: p. 15 ending fol. 33*b*; 16, fol. 42*a*; 17, fol. 46*a*; 18, fol. 53*a*; 19, fol. 59*a*.

*b*) Foll. 2–32, and 64, written in a fairly good hand, and containing *paṭalas* 21 (without beginning) –25: p. 21 ending fol. 7*b*; 22, fol. 11*b*; 23, fol. 18*b*; 24, fol. 26*a*; 25, fol. 30*b*.

*c*) Fol. 1, supplied by a third hand, does not seem to belong to the work, but to have been inserted merely to supply some sort of beginning to the MS. It begins: अथोशब्द आनन्तर्ये अथवद्व्यथ: तनु रूपा चतुर्विंशति तथात्मकं चतुर्विंशतिघटितत्वात् °

*Paṭ*. 25 ends: कलितेति* अर्धेन वपुषा शम्भोर्वपुषि संघट्टेत्यर्थ:। सदर्थामिति पूर्वान्वपि॥ इति पंचविंशति: पटल:॥

This is followed (on fol. 30*b*) by a short section (occupying about three pages, viz. foll. 31 and 64*a*) beginning: अथागमप्रामाण्यं निरूप्यते °, containing extracts from *Purāṇas*, etc.

It ends:

सर्वशास्त्रकलेवरविद्या(? ° सकलोद्ययारिधि)-
 पारगो गुरुसमो गुरुगद्य(? गुरुतये)।
ग्रन्थमेनमनिशं शिवार्चक:
 कामरूपपतिपण्डितो ऽकरोत् ॥

* The last verse of the *Śāradātilaka* runs thus:

अनाद्यन्ता शम्भोर्वपुषि कलितार्धेन वपुषा
 जगद्रूपं शश्वत्सृजति महनीयामपि गिरं।
सदर्था शब्दार्थस्तनभरनता शङ्करवधूर्
 भवद्भूत्यै भूयाद्भवजनितदु:खौघशमनी ॥

इति श्रीमहामहोपाध्यायजगद्गुरुभट्टाचार्यश्रीसिद्धान्तवागीशकृता शारदाटीका गूढार्थप्रकाशिका समाप्ता ॥ सम्वत् १८४[१] माघकृष्णद्वितीयायां मंगलवारे लिखितमिदं पुस्तकं मौक्तिकरामेण सुधिया ॥

The author frequently quotes two previous commentators, under the designation of *Ṭhakkurāḥ* and *Parivrājakāḥ* resp.; as also several times perhaps a third under that of *Ācāryāḥ*. Of other authorities may be mentioned: *Candrikā*, fol. 13*a* (पाशाङ्कुशेन पुटितां शक्तिमादौ समुद्धरेत्। यकारादिसकारान्तान् बिन्दुमस्तकलाञ्छितान्। तदन्त उद्धरेत्प्राज्ञो व्योमसत्वेन्दुसंयुतं ॥); fol. 14*a*; fol. 14*b* (प्रणवाग्निवधूर्वीजं शक्तिरुक्ता मनीषिभि:। °); *Nāradapañcarātra*, fol. 36*a*; *Pūjāpradīpa*, fol. 52*a* (ऊर्ध्वैवामहस्तं तु प्रियाया दक्षिणस्तनाये निहितो ध्येय इति); 55*a* (prose); *Prapañcasāraṭīkā* (once *Prapañcaṭīkā*), by *Padmapādācārya*, foll. 13*a*, 49*a*, 55*b*; *Śyāmārahasya*, by *Pūrṇānanda*, fol. 31*b*.

[H. T. Colebrooke.]

## 2546.

**528.** Foll. 61 + 107; size 9¾ in. by 4¾ in.; clear Devanāgarī writing of 1804 A.D.; eleven lines in a page.

*Devīrahasya*, or *Parādevīrahasya*, a treatise on *tantric* rites (*kuladharma*), purporting to form part of the *Rudrayāmalatantra*.

It begins: श्रीभैरव उवाच ॥

अधुना देवि वक्ष्यामि रहस्यं परमाद्भुतम्।
यत्र(*r.* यन्न) सर्वेषु तंत्रेषु यामलादिषु भाषितं ॥ १ ॥
परादेवीरहस्याख्यं तंत्रं मंत्रात्म विग्रहम्।
तत्त्वं श्रीषोडशाक्षर्या: सर्वस्वं मम पार्वति ॥ २ ॥
अप्रकाश्यमदातव्यं परं मोक्षफलप्रदम्।
भोगापवर्गदं लोके साधकानां शुभावहम् ॥ ३ ॥
देव्युवाच ॥
भगवन् सर्वतंत्रज्ञ कौलिकेश्वरसंकर।
त्वत्प्रसादान्मया ज्ञातं तत्त्वं देव्या: सुदुर्लभम् ॥ ४ ॥
तंत्रं मंत्रात्मकं गुह्यं सूचितं भवता स्वयम्।
परादेवीरहस्याख्यं दीक्षापूर्वं वदस्व मे ॥ ५ ॥

ईश्वर उवाच ॥

देवीरहस्यमीशानि शृणु त्वं भक्तिपूर्वकम् ।
येन श्रवणमात्रेण कोटिपूजाफलं भवेत् ॥ ६ ॥
अथाहं निर्णयं वक्ष्ये परमं गुरुशिष्ययोः ।
विचार्य विधिवद्धीमान् दीक्षाकर्म समारभेत् ॥ ७ ॥

The work consists of sixty chapters (*paṭala*) in two parts (*pūrvārdha* and *uttarārdha*), the first of which treats of the general practices of *śakti* worship; whilst the second is concerned with the worship of particular deities:

I. 1. (*śl.* 88) इति श्रीरुद्रयामले तंत्रे श्रीदेवीरहस्ये (thus mostly) *dīkshāvidhiḥ*; 2. (*śl.* 75) इति° परादेवीरहस्ये *śāktamantroddhāravidhiḥ*; 3. (*śl.* 34) *śiramantroddhāravidhi*; 4. (*śl.* 13) *vaishṇavamantravidhi*; 5. (*śl.* 45+21) *mantrotkīlanavidhi*; 6. (*śl.* 58) *saṃjīvanavidhi*; 7. (*śl.* 61) *śāpahāriṇīvidyoddhāravidhi*; 8. (*śl.* 31) *japavidhi*; 9. (*śl.* 56) *sampuṭavidhi*; 10. (*śl.* 36) *puraścaryāvidhi*; 11. (*śl.* 42) *puraścaraṇahomavidhi*; 12. (*śl.* 81) *yantroddhāravidhi*; 13. (*śl.* 36) *yantradhāraṇavidhi*; 14. (*śl.* 20) *ṛishicchandonirṇayavidhi*; 15. (*śl.* 14) *śmaśānārcanavidhi*; 16. (*śl.* 75) ditto; 17. (*śl.* 13); 18. (*śl.* 10 and prose) *śonapaddhativarṇanākhyānam*; 19. (*śl.* 35) *surotpattividhi*; 20. (*śl.* 14 and prose) *pātravandanavidhi*; 21. (*śl.* 10 and prose) *śāntistotraniravandanākhyānam*; 22. (*śl.* 156) *surāśodhanavidhi*; 23. (*śl.* 65) *śaktiśodhanavidhi*; 24. (*śl.* 69) *mālāśodhanavidhi*; 25. (*śl.* 43) ends: इति श्रीदेवीरहस्ये परमार्थप्रदीपिकायां यंत्रशोधनविधिर्नाम पंचविंशः पटलः ॥

II. beg.: श्रीभैरव उवाच (*r.* श्रीदेव्युवाच) ॥

भगवन् भवभूतेश कुलधर्मप्रकाशक ।
कुलेश श्रोतुमिच्छामि तंत्रस्यास्योत्तरार्धकं ॥ १ ॥

श्रीभैरव उवाच ॥

अधुना देवि कौलेशि कौलिकानां हितेच्छया ।
तंत्रोत्तरार्धं वक्ष्यामि रहस्यं विजयाभिधं ॥ २ ॥
दुर्गा देवी परा देवी परा शक्तिः परांबिका ।
देवदेवीति या ख्याता गायत्रीति श्रुता स्मृता ॥ ३ ॥

26. (*śl.* 62.) *mahāgaṇapatimantroddhāravidhi*: 27. (rules and *mantras*) *mahāgaṇapativaradagaṇeśanityapūjāpaddhativarṇanam*; 28. (*śl.* 24) *mahāgaṇapatikavacākhyānam*; 29. (*śl.* 137) *mahāgaṇapatimantranāmasahasrakākhyānam*; 30. (*śl.* 21) इति महादेवीरहस्ये तंत्रे *mahāgaṇapatistotrākhyānam* ॥ इति श्रीदेवीरहस्ये तंत्रमयेतस्वनिरूपणे परापररहस्ये महागणपतिवरदगणेशपंचांगं संपूर्णं ॥; 31. (*śl.* 92) *sūryapaṭalākhyānam*; 32. (rules and formulas) *sūryapūjāpaddhativarṇanam*; 33. (*śl.* 50) *vajrapañjarakavacākhyānam*; 34. (*śl.* 190) *sūryanāmasahasrākhyānam*; 35. (*śl.* 23) *paramārthastotrākhyānam śrībhagavatsūryapañcāṅgam*; 36. (*śl.* 85) *lakshmīnārāyaṇapaṭalākhyānam*; 37. (rules and formulas) *lakshmīnārāyaṇanityapūjāpaddhativarṇanam*; 38. (*śl.* 42) *lakshmīnārāyaṇakavacākhyānam*; 39. (*śl.* 171) *lakshmīnārāyaṇasahasranāmakākhyanam*; 40. (*śl.* 25) *lakshmīnārāyaṇastavākhyānam*, *samāptam ca lakshmīnārāyaṇapañcāṅgam*; 41. (*śl.* 65) *śrīmṛityuñjaya*; 42. (rules and formulas) *śrīmṛityuñjayapaddhativarṇanam*; 43. (*śl.* 27) *śrīmṛityuñjayakavaca*; 44. (*śl.* 124) *mahāmṛityuñjayasahasranāmastotrākhyānam*; 45. (*śl.* 28) *mahāmṛityuñjayastotrākhyānam śrīmahāmṛityuñjayapañcāṅgam*; 46. (*śl.* 53) *durgārahasyavidhi*: 47. (rules and formulas) *nityapūjāvidhi*; 48. (*śl.* 43) *durgākavacākhyānam*; 49. (*śl.* 138) *durgānāmasahasravarṇanam*; 50. (*śl.* 21) *durgāstotrākhyānam iti durgāpañcāṅgam*; 51. (*śl.* 44) *mantravidyāprakāśa*; 52. (*śl.* 7); 53. (*śl.* 17): 54. (*śl.* 28); 55. (*śl.* 29); 56. (*śl.* 18); 57. (*śl.* 31); 58. (*śl.* 27); 59. (*śl.* 20); 60. (*śl.* 34), ends: श्रीभैरव उवाच ॥

इदं देवीरहस्याख्यं तंत्रराजं महेश्वरि ।
सर्वसिद्धिप्रदं गोप्यं गोपनीयं महेश्वरि ॥ ३२ ॥
अदातव्यमभक्तेभ्यो दुरात्मभ्यो महेश्वरि ।
स्वपुत्रेभ्यो ऽन्यशिष्येभ्यो न देयं तु मुमुक्षुभिः ॥ ३३ ॥
इदं सारं हि तंत्राणां तत्त्वं सर्वस्वमुत्तमम् ।
रहस्यं देवि दुर्गाया गोपनीयं स्वयोनिवत् ॥ ३४ ॥

इति श्रीरुद्रयामले तंत्रे देवीरहस्ये षष्टितमः पटलः समाप्तः ॥
पूर्णो ऽयं देवीरहस्यतंत्रराजश्चेति शिवम् ॥

With the endings of chapters cp. the entries under *Rudrayāmala*, Aufrecht, Cat. Cat.

[H. T. COLEBROOKE.]

## 2547.

**581c.** Foll. 53 and 96; size 12¼ in. by 4½ in.; fairly good Devanāgarī writing, of 1800 A.D.; nine lines in a page.

The same work.

[H. T. COLEBROOKE.]

## 2548.

**1573b.** Foll. 18; size 10½ in. by 4¼ in.; fairly good, modern Devanāgarī writing; 13 lines in a page.

*Kalpāvalī*(?) of the *Rudrayāmala;* a treatise of *tantric* medicine or pharmacopy, describing, in separate paragraphs (*kalpa*), the preparation of a number of nostrums and elixirs, the principal ingredient of which is water drawn from certain mountain-rivers, in different parts of India, connected by legend with the sweat dropping from *Vishṇu,* when, in the form of a boar, he carried the earth on his back.

It begins:

कैलासशिखरे रम्ये देवदेवं जगद्गुरुं ॥
पप्रच्छ परया भक्त्या पार्वती परमेश्वरं ॥

पार्वत्युवाच ॥

नानाव्याधिसमुद्भूतां पीडां संप्राप्य मानवाः ।
कथं शीघ्रं विनिर्मुक्ता भवेयुश्च कलौ युगे ॥

ईश्वर उवाच ॥

रसायनं परं दिव्यं नानाशैलोदकं तथा ।
शृणु देवि परं तत्त्वं पवित्रं परमं प्रिये ॥

विष्णुना कोलरूपेण भाराक्रान्ता धरा धृतं (!) ।
तदा देहात्समुद्भूतः प्रस्वेदो भूरि पर्वते ॥

प्रस्वेदे पतिते भूमौ नानाभेदो ऽभवत्तदा ।
शिलोदकमिति ख्यातं चंद्रोदक(? कं) विषोदकं ॥

कृष्णोदकं ततो जातं तैलोदकमतः परं ।
घृतोदकं ततो जातं रक्तोदकमतः परं ॥

कोष्णोदकं परं दिव्यं जातं दध्युदकं तथा ।
कांतरीजलमुत्पन्नं जातं दुग्धोदकं तथा ॥

पीतोदकमग्न्युदकं जातमुष्णोदकं बहु ।
एतेषां गुणभेदांश्च प्रवक्ष्यामि शुभानने ॥

शैलदेशे च विख्यातास्त्रिषु लोकेषु मातरः ।
आन्तरैश्चिह्नविज्ञेयं मासिकं तु विचक्षणैः ॥ °

It ends: ईश्वर उवाच ॥

शृणु देवि प्रवक्ष्यामि यथोत्पन्नं सुगंधकम् ।
तदहं संप्रवक्ष्यामि शृणुष्वायतलोचने ॥

क्षीरोदसागरे देवि मथ्यमाने सुरैः पुरा ।
उत्पन्नममृतं देवि दिव्ययोगमहावनम् ॥

तस्य गंधेन सुश्रोणि मोदिताः सर्वदेवताः ।
गंधकं नाम विख्यातं जरादा[रि]द्र्यनाशनम् ॥

तस्य वर्णं तथा ग्राह्यं वक्ष्यमाणं निबोध मे ।
पीतं चैव तथा श्वेतं कपोतं च तृतीयकम् ॥

क्रमात्क्रमतरं देवि भवेत्सर्वेतराणि च ।
वमनं रेचनं कृत्वा शुद्धदेहः समारभेत् ।
सुमुहूर्ते सुनक्षत्रे चर्चयित्वा सदाशिवः ॥

इति श्रीरुद्रयामले कल्पपावली (!) समाप्ता ॥

The colophon seems to have been added by a different hand, the treatise itself being apparently incomplete.

Below the colophon another hand has written the title रुद्रयामले कल्पावली; and the leaves are marked कल्प°.

For a *Kalpavallīstotram* assigned to the *Rudrayāmala,* see Burnell, Tanjore MSS., p. 200*a*.

[H. T. COLEBROOKE.]

## 2549.

**2257.** Foll. 42; size 6½ in. by 4¾ in.; legibly written in Devanāgarī; 13 or 14 lines in a page; modern.

*Śārikābhagavatīpañcāṅga,* and *Jvālāmukhīpañcāṅga*(?), of the *Rudrayāmala Tantra.*

I. begins: अथ श्रीशारिकाभगवतीपंचांगं लिख्यते । तत्रादौ पटलं लिख्यते । श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि पटलं देवदुर्लभम् ।
सर्वसिद्धिप्रदं दिव्यं सर्वैश्वर्यप्रदायकम् ॥

या देवदेवी वरदा शारिका भुवनेश्वरी ।
त्रैलोक्यजननी दुर्गा विद्या सप्ताक्षरा परा ॥

सप्तविश्वेश्वरी सैव सप्तलोकान्तराश्रया ।
सप्तद्वीपमयी पृथ्वी शून्यरूपा कुलेश्वरी ॥

वक्ष्यामि पटलं देवि मंत्रोद्धारप्रकाशकं ।
मंत्रोद्धारं लयांगाढ्यं यथावद्वर्णयामि ते ॥

मंत्रोद्धारं महद्गोप्यं सर्वसिद्धिप्रदं कलौ ।
लोकानां हितमात्रार्थं तत्रादौ शृणु पार्वति ॥

तारं परामातटसिंधुरार्णः
  खं शर्म तन्मध्यगतं च नाम ।
अंते स्मरे पार्थेति शारिकायाम्
  त्रयोदशार्णो मनुरस्य गोप्यः ॥

मंत्रस्यास्य महादेवि न विघ्नो नापि दूषणम् ।
न विपर्ययभीर्लोके सिद्धिसाध्यारिसंयमः ॥

साक्षात्सिद्धिप्रदो मंत्रः सर्वविघ्नप्रहारकः ।
ब्रह्महत्यासुरापानमहापातकजं मलम् ॥

प्रक्षालयति मंत्रो ऽयमभक्ष्यभक्षणं ध्रुतम् ।
मंत्रमुत्कीलयेदादौ मृतं संजीवयेत्पुनः ॥

सिद्धं मंत्रं जपेन्मध्ये दध्यादंते च संपुटम् ।
ततः सिद्धिमनुः सिद्धो नासाध्यो भवति ध्रुवम् ॥

अस्य मंत्रस्य देवेशि प्रभावाद्भैरवो ऽस्म्यहम् ।
विष्णुर्नारायणो देवि ब्रह्मा लोकपितामहः ॥

न देयः परशिष्याय भक्तिहीनाय पार्वति ।
अन्यथा सिद्धिहानिः स्यादुभयोः शिवशापतः ॥

मंत्रस्यास्य ऋषिः प्रोक्तो महादेवो महेश्वरि ।
त्रिष्टुप् छंदः समाख्यातं शारिका देवता स्मृता ॥

शर्म वीजं रमा शक्तिः सिंधुरं कीलकं स्मृतम् ।
धर्मार्थकाममोक्षार्थे विनियोग इतीरितः ॥

तारं परा रमा वीजैः षड्दीर्घाचाररूपिभिः ।
न्यासं कुर्या[:] षडंगादि येन देवीमयो भवेत् ॥

ध्यानमस्याः प्रवक्ष्यामि जगच्चैतन्यकारणम् ।
येन ध्यानेन देवेशि परानंदः प्रजायते ॥

बालार्ककोटिद्युतिमिंदुचूडां
  वरासिचक्राभयबाहुमाद्याम् ।
सिंहादिरूढां शिववामदेह-
  लीनां भजे चेतसि शारिकेशीम् ॥

मंत्रोद्धारं प्रवक्ष्यामि °

इति श्रीरुद्रयामले तंत्रे श्रीशारिकापटलः समाप्तः fol. 4a.

अथ श्रीशारिकाभगवतीपूजापद्धतिर्लिख्यते ओं ।

श्रीशारिकां भवभयोद्धरणैकशीलां
  वंदे यथेष्टफलदां कुलदेवतां स्वाम् ।
या ब्रह्मकीटतनुगापि गिरौ प्रद्युम्ने
  लोकैर्मता भवति या परमार्थसंवित् ॥

ओं ब्राह्मे मुहूर्ते शयनतलादुत्थाय करचरणौ प्रक्षाल्य निजासने समुपविश्य निजशिरसि श्वेतवर्णाधोमुखसहस्रदलकमलकर्णिकांतर्गतचंद्रमंडलसिंहासनोपरिस्थं स्वगुरुं शुक्लवर्णं शुक्लालंकारभूषितं ज्ञानानंदमुदितमानसं सच्चिदानंदविग्रहं त्रिनयनं चतुर्भुजं ज्ञानमुद्रापुस्तकवराभयकरं वामांगे वामहस्तधृतकमलया रक्तवसनाभरणया स्वप्रियया दक्षभुजेनालिंगितं सर्वदेवाधिदेवं परमशिवस्वरूपं शांतं सुप्रसन्नं ध्यात्वा तच्चरणकमलयुगलविगलदमृतधारया स्वात्मानं प्लुतं विभाव्य मानसैरुपचारैः समाराध्य ओं ऐं ह्रीं श्रीं हसक्ष फ्रें हसक्षमलवय ऊं महक्ष फ्रें हसक्षमलवरय ऊं स्हौः स्हौः श्रीमच्छ्रीअमुकानंदनाथश्रीपादुकां पूजयामि तर्पयामि नम इति दशधा विमृश्य मनसा दंडवत्प्रणामं कुर्यात् °

इति श्रीशारिकापद्धतिः ॥ fol. 24b.

श्रीभैरव उवाच । ओं

अधुना देवि वक्ष्यामि शारिकाकवचं शुभम् ।
त्रैलोक्यमोहनं नाम मूलमंत्रमयं शृणु ॥

यस्य श्रवणमात्रेण सर्वयज्ञफलं लभेत् ।
सर्वापत्तारणं दिव्यं सर्वसिद्धिप्रदं कलौ ॥ °

इति श्रीरुद्रयामले तंत्रे श्रीशारिकाभगवतीकवचं संपूर्णम् fol. 27a.

अथ श्रीशारिकासहस्रनाम लिख्यते ॥ ° श्रीभैरव उवाच ।

कथयामि परां विद्यां सहस्राख्याभिधां शिवे ।
शिवायाः शारिकाख्यायाः परां सर्वस्वरूपिणीम् ॥

विना नित्यक्रियां देवि विना न्यासं विनार्चनम् ।
विना पुरस्क्रियां जप्यहोमार्चनादितर्पणम् ॥ °

इति ° श्रीशारिकानामसहस्रं संपूर्णम् ॥ fol. 33b.

श्रीभैरव उवाच ।

अस्य श्रीशारिकास्तवराजस्य श्रीमहादेव ऋषिः । त्रिष्टुप् छंदः । श्रीशारिका भगवती देवता । शां बीजं श्रीं शक्तिः कं कीलकं सर्वसिद्ध्यर्थे जपे पाठे विनियोगः । ओं

अम्ब अम्बे तव मनुशिरोमौलिमाणिक्यभूतं
ध्याये चित्ते शशधरकलाबिंबबिंबावतंसं ।
यो मंत्रेशं जपति मनसा माननीयो महद्भिर्
धन्यैः पुण्यैः स भवति मरुद्वीज्यमाने मरुत्वान् ॥ ०

इति ० दशविद्यारहस्ये श्रीशारिकास्तवराजः संपूर्णः ॥ ० समाप्तमिदं श्रीशारिकाभगवतीपंचांगम् ॥ fol. 35*a*.

II. अथ ज्वालाभगवतीकवचं लिख्यते ॥ श्रीभैरव उवाच ।

देवि देवि जगन्मातर्ज्वालामुख्यं ब्रवीम्यहम् ।
कवचं मंत्रगर्भं च त्रैलोक्यविजयाभिधम् ॥ ०

इति ० ज्वालामुखीकवचं संपूर्णम् ॥ fol. 37*a*.

अथ जपविधिः ॥ आदौ आसनशुद्धिं कृत्वा ततो गायत्रीन्यासं ततः प्राणायामः । ओं अस्य श्रीज्वालामुखीमंत्रस्य श्रीभगवान्भैरव ऋषिः । ० श्रीज्वालामुखीदेवतायै नमः । हृदि ह्रींबीजाय नमो नाभौ श्रींशक्तये नमः ० . . इति ज्वालामुखीजपविधिः fol. 37*b*.

अथ ज्वालामुखीस्तोत्रं लिख्यत । ओं

नानास्तुतिपरास्सर्वे यस्यास्सर्वे दिवौकसः ।
तमो हत्वा शंकरस्य भूत्यै भूयात्सदाशिवः ॥ ०

इति ज्वालामुखीस्तोत्रं संपूर्णम् ॥

इति गणपतिजपविधिः fol. 39*a*; इति सूर्यजपविधिः fol. 39*b*; इति लक्ष्मीनारायणजपविधिः fol. 40*b*; इति महादेवजपविधिः fol. 41*b*; after which some lines of formulas, ending:

पद्माधिरूढां सुसितां त्रिनेत्रां
शूलाक्षमाले कमलं च खड्गं ।
करैश्चतुर्भिः सततं वहंतीं
सरस्वतीं सिद्धिकरीं नमामि ॥

इति ध्यानम् । अथ मंत्रः । ओं ह्रीं ऐं ह्रीं ओं सरस्वत्यै नमः । गुह्यातिप्रसादात्परमेश्वरि ॥ इति सरस्वतीजपविधानं समाप्तं ॥ [R. JOHNSON.]

## 2550.

**452a.** Foll. 76; size 9½ in. by 5 in.; clear Devanāgarī writing; ten lines in a page.

*Dhātukalpa*, lessons of alchymy, in form of a dialogue between *Mahādeva* and *Pārvatī*; professing to form part of the *Rudrayāmala*. Rather incorrect.

It begins: श्रीपार्वत्युवाच ॥

अथानंतरं देवेश ब्रूहि धातोश्च संस्कृतिं ।
येन विज्ञानमात्रेण साधये धातुसंमतिं ॥ १ ॥

श्रीमहादेव उवाच ॥

धातुस्तुर्यविधः प्रोक्तस्तुर्यतुर्यस्तपक्षतः ।
सत्वं रजस्तमश्चैव चतुर्थस्तु निरामयः ॥ २ ॥
राजसे राजसी सिद्धिस्तामसे तामसी तथा ।
सत्वसिद्धिस्तथा सत्वे अतीते सर्वसाधनं ॥ ३ ॥

पार्वत्युवाच ॥

कथ्यतां देव देवेश सत्वराज सतामसं ।
अतीते गुरुता धातोः कार्यलक्षणलक्षिता ॥ ४ ॥
उपधातुक्रमेणैव तेषां लक्षणसाधनं ।
विट्कीटमृतयुक्तानां तेषां कर्मप्रसाधनं ॥ ५ ॥ ० ७ ॥

महादेव उवाच ॥

तिष्ठंति पृथिवीगर्भे धातवो विविधात्मकाः ।
कियत्काले न विगता धातवो ये मयोदिताः ॥ ८ ॥
गुणलक्षणसंयुक्ताः सांप्रतं न स्मरंति ह ।
कथं ते कथयाम्यद्य वद ब्रह्मांडवासिनि ॥ ९ ॥

पार्वत्युवाच ॥

ये केचित्तु स्मरंतीश व्यक्तं कथय सांप्रतं ।
साधूनामर्थसिद्ध्यर्थप्रभावः श्रीमतां स्मृतः ॥ १० ॥

महादेव उवाच ॥

शृणु देवि प्रवक्ष्यामि धातूनां विविधाः स्थितीन् ।
गुणलक्षणसंयुक्ताः क्रि[या]युक्ता निबोध ताः ॥ ११ ॥ ०

इति ताम्रं अथ सीसं fol. 3*b*; अथ लोहनाम fol. 4*a*; इति कांस्यं fol. 4*b*; अथ भस्तुरनाम fol. 6*b*; इति लोहविधानं fol. 28*a*; इति जासत्वं (thus repeatedly; आनयेत् जसतं शुद्धं विंध्याचलसमुद्भवं । ०) fol. 34*a*; इति नागविधिः fol. 36*b*; इति तालं fol. 41*b*; इति ताम्रविधानं fol. 72*a*; इति रजतक्रिया । [अथ हाटकीक्रिया] fol. 74*b*.

There appears little of the mystic element of the *Tantras* in the treatise, but a good deal of experimental knowledge gained by the older pursuits of medicine and cognate arts.

The MS. marks every 100 *ślokas,* counting altogether 1811 couplets; but the numbering in some parts may not be quite accurate.

It ends:

मारणं भस्मकं चैव धातुसंचारणं तथा ।
कथितं पारदे कल्पे* श्रुतं ते कथितं मया ॥

इत्येका उत्तमा धातोः सर्वसामर्थ्यदायकः(!) ।
कार्यसिद्धिकरा सिद्धा श्रेष्ठकर्मविशारदा ॥

संयोगं पारदे दिव्ये स्वेदनं मर्दनं तथा ।
संजीवनं तु तालेषु मारणं भणशलोदितं(!) ॥

भस्मजं नागजे प्रोक्तं ताम्रे रंजकं सदा(!) ।
यथेदं औषधीकल्पे संयोगे कथितं मया ॥

**1248b.** Foll. 43; size 9½ in. by 3¾ in.; good, clear Devanāgarī writing (? of 1678 A.D.); eight lines in a page.

The same work; *paṭalas* i.–ix.

This MS. begins:
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ १ ॥
यत्तु आदौ त्वया नाथ मुनिशिष्यैरनेकधा ।
अनेकशास्त्रमायादौ कथिता परमेश्वर ॥ २ ॥

It ends:
अयं योगः सर्वशास्त्रे विज्ञातव्यो वरानने ।
गुरुप्रसादात् ज्ञातव्यं रहस्यं सकुलागमे ॥ २२९ ॥

इति श्रीअकुलागमे महातंत्रे योगसारसमुच्चये ईश्वरपार्वतीसंवादे चतुराश्रमादिकथनं नाम नवमः पटलः ॥ ° नेपालसंवत् ७९८ समये श्रावणसुदिपंचम्यां शुक्लपक्षे रविदिने लिखितमिति विश्वेश्वरेण समाप्तं ॥

This date perhaps belonged to a previous MS.

The MSS. of the *Akulāgamatantra* mentioned in Bühler's Cat. of Skr. MSS. in Gujarāt etc., iv., p. 252; Peterson, Rep., iii., p. 399

(judging from the extent) probably contain the same work as the present one.

[H. T. COLEBROOKE.]

## 2567.

**1048.** Foll. 70; size 16½ in. by 3½ in.; neat, modern Bengalī handwriting; seven lines in a page.

*Kulārṇava-mahārahasya,* a *Tantra* in seventeen chapters (*ullāsa*).

For a full account of the work see Aufrecht, Bodl. Cat., no. 147.

This MS. differs considerably from the next, which, on the whole, agrees with the Oxford MS. It begins:

कैलासशिखरासीनं देवदेवं जगद्गुरुं ।
पञ्चक्लेशं परानन्दं पार्वती परमेश्वरं ॥ १ ॥

श्रीदेव्युवाच ॥

भगवन्देव देवेश पञ्चकृतुविधानक ।
सर्वज्ञ भक्तिसुलभ शरणागतवत्सल ॥ २ ॥

कुलेश परमेशान करुणामयवारिधे ।
सुघोरे घोरसंसारे सर्वदुःखमलीमसे ॥ ३ ॥०

It ends:

इति ते कथितं किंचिद्गुरुनामादिवासना ।
समासेन कुलेशानि यो जानाति स पूजकः ॥

रहस्यातिरहस्यानां रहस्योहकुलेश्वरि ।
ऊर्ध्वाम्नायः समाख्यातः समासेन न विस्तरात् ।
कुलार्णवमिदं शास्त्रं मुक्तिदमुपवर्णितं ॥

इति श्रीकुलार्णवे महारहस्ये सर्वागमोत्तमोत्तमे सपादलक्ष-ग्रन्थे पञ्चमखण्डे गुरुनामवासनादिकथनं सप्तदशोल्लासः ॥

[H. T. COLEBROOKE.]

## 2568.

**839.** Foll. 62; size 12½ in. by 4½ in.; legibly written in Devanāgarī; 10 or 11 lines in a page; modern.

The same work; chapters i.-xvi.

It begins:

श्रीगुरुं गणपं दुर्गां वटुकं शिवमच्युतं ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वंदे विभूतये ॥

etc., as in the Bodleian MS.

It ends:

इति श्रीकुलार्णवे महारहस्ये काम्यकर्मकथनं नाम षोडशो। १६ ॥० संवत् १८६१ माघमासे शुक्लपक्षे अष्टम्यां गुरुवासरे पोथी समाप्ता ॥ [H. T. COLEBROOKE.]

## 2569.

**1265.** Foll. 72; size 7 in. by 4 in.; fairly written in Devanāgarī; 11 or 12 lines in a page.

*Kulapradīpa,* a treatise, in verse, in commendation and exposition of *Tantric* doctrines, in seven chapters (*prakāśa*), by *Śivānandācārya.*

It begins:

गुरुं प्रणम्य प्रथमं ततो ऽहं
गणाधिपं श्रीपरदेवतां च ।
मुदे महोपासककौलिकानां
निबंधमेकं रचयामि रम्यं ॥ १ ॥

ग्रंथेषु येष्वेषु सदाशिवेन
सविस्तरः श्रीकुलमार्ग उक्तः ।
प्रायः कलौ ते सुलभा न संति
ज्ञानं च तेषां परमं दुरापं ॥ २ ॥

गुरोः कृपा यत्र भवेत्प्रभूता
श्रीदेवतायाश्च महाप्रसादः ।
तस्यैव पुंसः कुलशास्त्रबोधम्
तस्याच भक्तिर्न खलापनोद्या ॥ ३ ॥

येषां दृढा भक्तिरिहास्ति शास्त्रे
विदंति सम्यक्सकलं रहस्यं ।
प्राग्जन्म पुण्याद्विमला मनीषा
ते निंदका नास्य भवंति लोकाः ॥ ४ ॥

भीताः पशुभ्यो निजगोपनार्थं
निंदंति केचित्कुलशास्त्रमेतत् ।
केचित्तु निंदानिरता अबोधा
दौष्ट्येन ये ते निरये न वस्तुं(?) ॥ ५ ॥ ० ८ ॥

तत्रादौ कुलधर्मप्रशंसा । श्रीकुलार्णवे ।०

इति कुलधर्मप्रशंसा। इति॰ प्रथमप्रकाशः॥ fol. 7*a*; इति कौलिकप्रशंसा fol. 12*a*; इति कुलपूजाप्रशंसा fol. 13*b*; इति कुलपूजासमयनिरूपणं। इति॰ द्वितीयः प्रकाशः॥ अथ पूजाद्रव्यनिरूपणं fol. 15*a*; इति॰ तृतीयः प्रकाशः॥ अथ कलशस्थापनप्रयोगः fol. 25*a*; अथ भंगास्तोत्रं fol. 35*b*; इति विजयस्तोत्रं fol. 36*b*; इति भंगाविधानं। इति॰ चतुर्थ-प्रकाशः॥ अथ द्वितीयतृतीयचतुर्थमकारनिरूपणं fol. 37*b*; इति॰ पंचमः प्रकाशः॥ fol. 45; इति दूतीयागविधिः fol. 54*b*; इति कुंडगोलादिद्रव्यग्रहणविधिः। इति॰ षष्ठः प्रकाशः॥ अथ कुलाचारनिरूपणं fol. 56*b*. The last chapter treats chiefly of *cakras*. It concludes with two couplets quoted from the *Kulārṇava*, ending: ॰कौलो धर्मः परमगहनो योगिनामप्यगम्यः॥ इति श्रीशिवानंदाचार्यविरचिते कुलप्रदीपे सप्तमः प्रकाशः संपूर्णः॥ संवत् १७८८ ज्येष्ठसुदी १४ भौमे॥ श्लोकसंख्या १८००.

The authorities quoted are: *Uttaratantra* (fol. 51*a*), *Kulacūḍāmaṇi* (fol. 50*b*), *Kulatantra*, *Kulapañcāmṛita* (fol. 40*b*), *Kulāmṛita*, *Kulārṇava*, *Tantracūḍāmaṇi* (fol. 55*a*), *Devīyāmala*, *Pañcayāmala* (fol. 54*b*), *Brahmayāmala*, *Bhāvacūḍāmaṇi* (fol. 43*b*), *Yāmalatantra*, *Rudrayāmala*, *Lalitāvilāsa*, *Liṅgāgama*, *Śivāgama*, *Samayācāratantra*.

[H. T. COLEBROOKE.]

## 2570.

**1579.** Foll. 345; size 18¾ in. by 4¾ in.; good, clear Devanāgarī writing of the latter part of last century; 8, in the latter part 10 or 11, lines in a page. The peculiar nature of the paper, as well as the character of the writing in the latter part of the MS. (from fol. 284), point to Nepalese origin.

*Merutantra*, so called because it is supposed to overtop all the other *Tantras*, of which *Śiva* says he composed 108 in all (foll. 2*a*, 8*b*).

In the form of conversations between *Śiva* and *Pārvatī* it puts forth its teachings and precepts before an assembly of gods and *munis* who have taken refuge on mount Meru from the persecutions of *Jalandhara*, and who hope to obtain safety by a knowledge of "*Mahākāla*" and "*Mahāmāyā*." It is of the mixed order of *Tantras*, professing to give laws to the *Vāmamārgins* as well as to the *Dakshiṇamārgins*.

It begins (with the numbers added):

यथासत्सदिवाभाति न च भाति कदापि सत्।
यस्मिन् ज्ञानेन सा भाति तस्यै तस्मै नमो नमः॥ १॥

जलंधरेण विजिते सुरासुरनरे ऽखिले।
सूक्ष्मरूपेण ते सर्वे महेशशरणं गताः॥ २॥

दिव्यान्यब्दसहस्राणि समाधिस्थं विलोक्य तं।
प्रार्थिता चार्चिता तैस्तु वामदक्षिणमार्गिभिः॥ ३॥

अज्ञा तदा बोधयुता नत्वा तं संव्यजिज्ञपत्।
ध्यायंति विधिहर्याद्यास्त्वां त्वं ध्यायसि कं पुनः॥ ४॥

मां वदंति परां शक्तिं त्वां वदंति परं शिवं।
आवयोरपि किं ध्येयं तत्त्वं मे कृपया वद॥ ५॥

इति श्रुत्वा वचस्तस्याः स्मित्वा किंचिन्महेश्वरः।
उपवेश्य विधीन्द्रादीन् वाक्यमेतदुवाच ह॥ ६॥

नराणां परमं वृद्धेरायुः सौराः शतं समाः।
तदब्दं देवयोनीनां दिनमायुश्च तच्छतं॥ ७॥

वृध्यते परमं तस्य मानं कलियुगस्य तत्।
धर्माधर्मार्धसंपूर्णं धर्माणां तं प्रमाणतः॥ ८॥

इदं भूशैलनिहतमैंद्रायुर्मानवं परं।
कृतप्रमाणमब्दं तु समयः कायपूरकः॥ ९॥

एवमिंद्रैरिंद्रसंस्थैर्ब्रह्मणो दिनमुच्यते।
या ध्यायते महामाया मया तेज्ञासनिर्गमः (!)॥ १०॥

प्रपंचो ब्रह्मदिवसः कुंभको रात्रिरस्य तु।
एवं तस्या घटिकया वर्षमेकं विधेः स्मृतं॥ ११॥

घटीशतमितं तस्या ब्रह्मा जीवति कीटवत्।
पक्षमेकं सतीरूपा मुक्ते कृष्णं तु पार्वती॥ १२॥

मातुमात्रं हरिर्जीवेद्वर्षमात्रमहं शिवः।
एवं सा शतवर्षा वै महाकालस्य गेहिणी॥ १३॥

सर्वकंचुकवद्देहं त्यक्त्वा त्यक्त्वा पुनर्युवा।
स सदैव युवा तिष्ठत्यनया विषयीकृतः॥ १४॥

एवं श्रुत्वा वचस्तस्य देवी ब्रह्मा हरिः सुराः।
अहंकारस्य विलयं कृत्वा भीता नता पुनः॥ १५॥

देवा ऊचुः ॥

त्राहि त्राहि महादेव शरणागतवत्सल ।
साहंकारा वयं मूढा ईश्वरा इति वादिनः ॥ १६ ॥
निर्जिता अपि निर्लज्जा जलंधरवधैषिणः ।
मशकाश्च वयं देव न च त्वं मशकायसे ॥ १७ ॥
यस्या अग्रे सापि यस्य पदार्धांशेन नो समा(?) ।
महाकालः कथं ज्ञेयः कथं मुक्तिर्भवेज्झिव ॥ १८ ॥
मुक्तयः कतिधा देव श्रेष्ठा का किं च साधनं ।
वदास्माकं यदि कृपा देव्यां विष्णौ सुरेषु च ॥ १९ ॥

ईश्वर उवाच ॥

ज्ञायते तत्प्रभावेन सकलं देववाक्यतः ।
पुनर्मोदयते बुद्धिं तस्य माया दुरत्यया ॥ २० ॥
मया कृतानि तंत्राणि संख्ययाष्टोत्तरं शतं ।
येन येन प्रार्थितो ऽहं देवी संप्रार्थिता मया ॥ २१ ॥
देवीभिः प्रमथैर्देवैस्तत्तन्मोक्षश्चतुर्विधः ।
येन मार्गेण भवति स स मार्गः प्रकाशितः ॥ २२ ॥
तत्रापि तांत्रिका देवा अहंकारेण मोहिताः ।
अन्यान्देवान्विनिंदंति षट्कर्मनिरताः सदा ॥ २३ ॥
कलिना हतसौभाग्याः स्थाने याने च मैथुने ।
जायंते निरतास्तेन निर्धनाः प्रेतरूपिणः ॥ २४ ॥
दृश्यंते ते कलौ तस्मान्नवभिः सम्यगीरितं ।
वेदसारं धर्मसारं तंत्राणां हृदयं परं ॥ २५ ॥
महाकालेन यत्प्रोक्तं पंचमीमुक्तिसाधनं ।
सर्वेषां मेरुता यातं तत्तंत्रं मेरुसंज्ञितं ॥ २६ ॥
शृण्वंतु तद् दृश्यमानं मनो दत्त्वा पृथक् पृथक् ।
पृच्छया निजसंदेहं दूरीकुर्वंत्वशंकिताः ॥ २७ ॥ °

Some idea of the contents of the work may be formed from the colophons of the different chapters (*prakāśa*): 1. (fol. 5*a*) *vyavasthāprakāśa*; 2. (fol. 13*b*) *saṃskāra*; 3. (fol. 34*a*) *dīkshā*; 4. (fol. 39*a*) *homavidhi*; 5. (fol. 72*a*) *āhnika* (i.e. *āmnāyānāṃ rahasyaṃ*); 6. (fol. 94*a*) *puraścaryā*; 7. (fol. 102*a*) *siddhisthirīkaraṇa*; 8. (fol. 107*b*) *mudrālakshaṇa*; 9. (fol. 114*b*) *pārthivapūjāvidhi*; 10. (fol. 148*a*) *puraścaryākaulikācāra*; 11. (fol. 177*a*) *kalisaṃsthitaṃ savidhimantrakathanaṃ*; 12. (fol. 193*a*) *vedamantra*; 13. (fol. 202*a*) *navagrahakathana*; 14. (fol. 208*b*) *pratyaṅgirāmantrakathana*; 15. (fol. 217*b*) *vaidikayantrakathana*; 16. (fol. 224*a*) *dakshiṇāmnāyagaṇapatimantra*; 17. (fol. 245*a*) *ūrdhvāmnāyagaṇapatimantra*; 18. (fol. 250*b*) *pūrvāmnāyagaṇapatimantra*; 19. (fol. 268*a*) *paścimāmnāyagaṇapatimantra*; 20. (fol. 272*a*) *uttarāmnāyagaṇapatimantra*; 21. (fol. 275*a*) *sūryamantra*; 22. (fol. 279*a*) *navagrahamantra*; 23. (fol. 314*a*) *brāhmyādyashṭaśaktimantra*; 24. (fol. 319*b*) *daśadigīśamantra*; 25. (fol. 321*a*) *dīpavidhi*. The 26th *prakāśa* is left unfinished, breaking off after v. 993.

A MS. described in the Cat. of Skr. MSS. in the N.-W. Prov., pt. vi., p. 56, is stated to consist of 35 chapters.

[H. T. Colebrooke.]

## 2571.

**721d.** Foll. 27 (besides a *śuddhapattram* to fol. 8); size 16 in. by 5 in.; clear, somewhat small, modern Bengali writing; thirteen lines in a page.

I. Foll. 1–8*a*. *Bījavyākaraṇa-mahātantra*, a *Tantric* tract, in six chapters, consisting of speculations on the mystic value of the letters of the alphabet, a mystery the knowledge of which is represented as containing the germ of the whole visible and invisible universe. The revelation is, as usual, made by *Mahādeva* to his inquisitive consort.

It begins:

नत्वा ज्ञानमयीं देवीं कालीं ब्रह्माण्डसूतिकां ।
बीजं बीजार्थकं यत्तु शिव आह यथायथं ॥ १ ॥

श्रीपार्वत्युवाच ॥

हे नाथ जगदाधार शम्भो संसारतारक ।
यत्पृच्छाम्यत्र देवेश तन्मे व ़ त्वमर्हसि ॥ २ ॥
श्रुतं व्याकरणं देव तर्कं यदर्थसूचकं(?तर्कंयद°) ।
पातञ्जलं विशेषं च सांख्यं वेदान्तकं विभो ॥ ३ ॥
सरहस्यं सोपदेशं सर्वमेतद् यथोचितं ।
आगमं निगमं वापि नैगमं वेदमेव वा ॥ ४ ॥

वेदार्थमय तत्त्वं च यन्त्रं तदुपासकं ।
तत्त्वार्थमय तत्त्वं च आभासं विहितं चितेः ॥ ५ ॥
चितेर्महाभासमय चात्मज्ञानं स्वनुष्ठितं ।
तोयबिम्बसमं देहं गेहं चाथ निरर्थकं ॥ ६ ॥ ० ११ ॥

तत्तदन्यच्च मे देव सर्वं कथितवान् पुरा ।
अधुना संप्रवक्ष्यामि दासीत्वात्तव धीमतः ॥ १२ ॥

अतिगुह्यतरं वक्ष्ये तुभ्यं काशीपते वद ।
नो चेत् प्राणान्परित्यज्य यास्यामि तव शंकर॥१३॥०३३॥

*Mahādeva* at first refuses to reveal to her this mystery of mysteries, but is at last obliged to yield.

शृणु देवि महेशानि कथां कामदुघां नृणां ।
देवानामपि देवेशि सेन्द्रादीनां दिवौकसां ॥ ३४ ॥

आदौ वर्णं वदाम्यद्य स्वरं हलविसूचकं ।
ततो युग्मं वदामि त्वां वियुग्मं वा चतुष्टयं ॥ ३५ ॥ ०

*Śiva* constantly uses the form *dihi* (दिहि दुर्गे, प्रिये दिहि etc.) which the commentary (*śl.* 40) explains by जानीहि.

The last page, containing a few *ślokas* and the colophon, was written by a different hand.

It ends:

श्रुत्वा शिवस्य वचनं शिवा दुःखनाशिनी ।
नत्वा शम्भुं गतोन्मादा स्वकीयं गृहमागता ॥ ३६ ॥

इत्युमामहेश्वरसंवादे महागुह्ये सर्वशास्त्रोद्धारे ज्ञानकाण्डशेषरहस्ये सर्वकामदे महागमे त्रिशतघटितमो गद्यः समाप्तः ॥

On the back of the last leaf Colebrooke's *Paṇḍit* calls the work *Śaivavyākaraṇa*, for which see no. 2572.

II. Foll. 8b–27. [*Mahātantra-*]*Bhāvārthadīpikā*, a commentary on the foregoing tract, by *Rāmānanda Devaśarman Vācaspati Bhaṭṭācārya*, a resident of the country of Khiri, then ruled over by *Caitanyasiṃha* (*Mallamahīndra*).

It begins: ओं गणाय चंडाय नमः ॥

नत्वात्र कालीं मुण्डालीं* श्रीरामाश्रयवन्दितां ।
बीजव्याकरणादीनां टीकां वच्मि यथामति ॥

श्रीलरामानन्ददेवशर्मा रामपदाश्रयी ।
अत्ययोग्यो ग्रन्थकृतौ मन एतत् प्रवर्तितः† ॥
यावन्ति ग्रन्थसाराणि सन्तीह जगतीपते ।
तेषां सारं समुद्धृत्य शिवेनैतत् कृतं पुरा ॥ ०

It ends:

इत्युमामहेश्वरसम्वादे इत्यादयो व्यक्तविशेषणकाः ॥ ० ॥

आगमानां समाकृष्य सारं सारं यथामति ।
कृता टीका मया यत्नात् पठध्वं भावुकाः सदा ॥
श्रीमन्मल्लमहीन्द्रसन्ततिवरश्चैतन्यसिंहो नृपो
धीरः सत्यपरायणो हरिरतो निर्लोभको निःस्पृहः ।
तद्देशे खिरिसंज्ञके‡ निवसति श्रीरामनामा कविः
श्रीमद्रुद्रनिदेशतो विरचिता टीका सता गृह्यतां ॥
प्रकाश्या यत्प्रयासेन टीकेयं देवदुर्लभा ।
रुद्र तं पाहि सततं मच्छिष्यं तनुसंज्ञकं ॥
तच्छिष्या वर्धतां नित्यं सदास्तु तन्मतिर्मयि ।
इत्येवं प्रार्थयामि त्वां न चान्यद्विषयं निजं ॥
नाहं द्विजाचाररतो नातिविद्याविनोदधीः ।
न तपस्यायुतो नित्यं न नित्यं गुरुपूजकः ॥
शुद्धाशुद्धौ द्विजौ तुल्यौ तव वेदानुशासनं ।
इति त्वं परिसंभाव्य जायते ते कृपा यदि ॥
श्रीमद्रामपदे भक्तिं देहि रुद्र नमोऽस्तु ते ।
तया मे धर्मकामार्थमोक्षाः संयान्ति सिद्धतां ॥
तथा भार्यापुत्रपौत्रप्रपौत्रेभ्यः प्रदीयतां ।
न धनं प्रार्थये रुद्र न सुखं वनितादिजं ।
तुभ्यं पूजा राम भक्तिर्भरणे जाह्नवीजले ॥

इति श्रीरामानन्दवाचस्पतिभट्टाचार्यविरचिता महातन्त्रभावार्थदीपिका समाप्ता ॥

[H. T. Colebrooke.]

---

* मुण्डानां आलिः पङ्क्तिर्विद्यते यस्यास्तां । comm.

† ?अत्ययोग्योऽपि सन् एतद्विषये अर्थात् टीकाकरणविषये मनः प्रवर्तितमित्यर्थः । इति योजना । ननु अत्ययोग्यपदस्य कोऽर्थ इति चेत् । योग्यो ऽर्हः । न योग्यो ऽयोग्य इति° comm.

‡ तन्नामधेयग्रामे स निवसतीति ननु स ग्रामः कस्य देशो विषय इति चेदाह° श्रीमन्मल्ल° । अत एव मल्लो नाम वंशविषयः । अत एव मल्लेषु मल्लवंशेषु ये महीन्द्रा राजानस्ते मल्लमहीन्द्रा इति विग्रहः । ° तेषां सन्ततीनां मध्ये वरः श्रेष्ठोऽयं चैतन्यसंज्ञ(!) इति चैतन्य इति कृत्वा संज्ञा यस्येति । ते चानिता इति कप्रत्ययनिषेधः । ° comm.

## 2572.

**721e.** Foll. 28; size 16 in. by 5 in.; clear, modern Bengālī writing; foll. 13–21 by the same hand as the preceding MS.; the rest by a different hand; 13–15 lines in a page.

A commentary (*tippanī*), entitled *Bhedikā*, on *Rāmānanda's Bhāvārthadīpikā*, by his pupil *Rāmatanu Śarman*.

It begins:

प्रणम्य विघ्नेशगुरुरमाश्रयं(? r. रमेशं)
श्रीरामचन्द्रं त्रिजगद्वरेण्यं ।
श्रीरामवाचस्पतिपादसारः
श्रीरामतन्वाह्वक एतदिच्छः(?) ॥
मूको भवति वाचाटः खञ्जः सिन्धुतरे क्षमः ।
श्रीगुरोः कृपया भूयात् शिवेनोक्तं कदा मुधा ॥
बीजव्याकरणं यत्तु त्रिषु लोकेषु दुर्लभं ।
अपारसिन्धुं जानीहि पारावारविवर्जितं ॥
तस्यैव पारावारे मे गुरुः शक्तो ऽपि लक्ष्यते ।
दीपिकैषा कृता येन धन्या मान्या सुरैरपि ॥
तस्याधरसुधापानशालिना कायडरूपिणा(?) ।
चिन्त्यते मया किञ्चिद्विभाव्य गुरुपादुकां ॥

अथ विघ्नध्वंसाय ओं गंयाय चंदाय नम इति टीकाकृता आदौ लिखितं । तस्यार्थो यथा गं गणेशे इति कोषे वक्ष्यति संप्रदाने य इति च कारकपादे विधास्यति एवं चं चतुर्वर्गसाधने इति च । अत एव उभयत्र चतुर्थ्येकवचनेन साधनीयं चतुर्वर्गप्रदाय गणेशाय नम इति निष्कृष्टार्थः ॥ °

The title is given in full on fol. 21*b*: इति श्रीरामतनुशर्मणा श्रीगुरुचरणप्रमाणकेन विरचिता शैवव्याकरणीयसंग्रहभावार्थटीकाटिप्पनी भेदिकेति ॥

It ends: संप्रदानसंज्ञासर्वं हित्वा भक्तेराधिक्यतां दर्शयन्नाह पुनर्भक्तिरिति जाह्नवीजले मरणमिति च प्रार्थनाविरामः ॥ इति श्रीरामतनुशर्मणा गुरुपादसारेण विरचिता षष्ठाध्यायटिप्पनी भेदिका समाप्ता ॥ [H. T. COLEBROOKE.]

## 2573.

**364.** Foll. 271; size 9½ in. by 4 in.; careless, modern Devanāgarī writing; eight lines in a page.

*Tantraratna*, or *Tantraratnadīpikā*, a compilation of extracts from the principal *Tantras*, on religious rites and ceremonies, by *Krishṇa Vidyāvāgīśa Bhaṭṭācārya* of Navadvīpa.

It begins:

नित्यानंदां परां वंदे ब्रह्मरूपां गुणाश्रयां ।
सर्वभूतमयीं देवीं श्रीमत्त्रिपुरसुंदरीं ॥ १ ॥
पुराणकारिणं वंदे गणेशं पार्वतीसुतं ।
यस्य स्मरणमात्रेण विघ्ना दूरीभवंति हि ॥ २ ॥
गुरुदेवं नमस्कृत्य – – – सर्वशारदं ।
यस्य पादरजोभिश्च तीर्थस्नानफलं लभेत् ॥ ३ ॥
आगमांबुनिधिमंथनोद्धृतं संस्कृतं निजगुरूपदेशतः ।
तंत्ररत्नमिदमुत्तमं बुधा भावयध्वमपहाय मत्सरं ॥ ४ ॥
असंख्या त्रिपुरा देवी असंख्याता च कालिका ।
वागीश्वरी तथासंख्या तथा च अकुलाकुला ॥ ५ ॥
मातंगिनी चान्नपूर्णा विमला चंडनायिका ।
त्रिपुरैकजटी दुर्गा या चान्या कुलसुंदरी ॥ ६ ॥
वैष्णवं गाणपत्यं च महासौरमतं तथा ।
शैवं शंकरजातं च यत्किंचिद्भूतसंभवं ॥ ७ ॥

With the verses which follow, compare Prof. Bhandarkar's extracts from the *Vāmakeśvaratantra*, Rep. 1883-84, pp. 87, 375; and Aufrecht, Cat. Bodl., no. 169.

चतुःषष्टिश्च तंत्राणि मातृणामुत्तमानि च ।
महामायाशंबरं च योगिनीजालशंबरं ॥ ८ ॥
[तत्त्वशंबर]कं नाम भैरवाष्टकमेव च ।
बहुरूपाष्टकं ज्ञानं जामलाष्टकमेव(r. याम°) च ॥ ९ ॥
तत्त्वज्ञानं(चन्द्रज्ञानं Bh., A.) वासुकिं च महासंमोहनं [तथा ।
महाशंखं(महोच्छुष्मं Bh.) महादेवं वातुलं च लयोत्तरं [(नयोत्तरं Bh.) ॥ १० ॥
हृग्भेदं(हृद्भेद Bh., A.) मातृभेदं च गृह्यतंत्रं(गु° Bh., [A.) च कामिकं ।
कलापदं(कलावादं A., कालपादं Bh.) कलासारं [(कालसारं Bh.) तथान्यत्कुब्जिकामतं ॥ ११ ॥
लयोत्तरं(न° Bh., ? मतोत्तरं A.) च विणाख्यं(वीणाख्यं [Bh., वीणातत्त्वं A.) तोतलं तोतलोत्तरं [(तोत्त° Bh., त्रोट° A.) ।
पंचामृतं रूपभेदं भूतोड्डामरमेव च ॥ १२ ॥

कुलसारं कुलोड्डीशं [कुलचूडामणिं तथा] ।
तंत्रं विश्वात्मकं(सर्वज्ञानोत्तरं चैव Bh., A.) देवि
[महापिचुमतं(महापिशमतं Bh.) तथा ॥ १३ ॥

महालक्ष्मीमतं देवि सिद्धयोगेश्वरीमतं ।
कुरूपिकाष्टकं देवि रूपिकामतमेव च ॥ १४ ॥

सर्वचोरमते देवी(r.°वि) विमलामतमेव च ।
पूर्वपश्चिमदक्षं च उत्तरं च निरुत्तरं ॥ १५ ॥

तंत्रं वैशेषिकं ज्ञानं वीरावलिमथापरं ।
अरुणेशं मोहिनीशं(आ° मोदनेशं Bh.) विशुद्धेश्वरमेव
[च ॥ १६ ॥

एतदादीनि तंत्राणि परिलोक्य विचार्य च ।
वैदिकान्वयसंभूतनवद्वीपनिवासिना ॥ १७ ॥

श्रीकृष्णविद्यावागीशभट्टाचार्येण धीमता ।
तंत्राणां सारभूतं च तंत्ररत्नं प्रतन्यते ॥ १८ ॥

हयशीर्षे ॥

जैमिनिः सुगतश्चैव नास्तिको लग्न एव च ।
कपिलश्चाक्षपादश्च षडेते हेतुवादिनः ॥ १९ ॥ °

According to Rāj. Mitra, Notices, i., p. 126, the work consists of five *paṭalas*, treating resp. of secret congregation, time for initiation, mystic diagrams, rituals, and regulation of the breath and gesticulation during worship.

In the present MS., which is not punctuated, the following divisions have been noticed:

इति वैदिकश्रीकृष्णविद्यावागीशभट्टाचार्यविरचिते तंत्ररत्ने चक्रविचारो नाम प्रथमपटलः ॥ अथ मासादि निर्णयः ॥ fol. 18*b*; इति दीक्षाविधिः । अथ पुरश्चरणं fol. 83*a*; अथ जपमालासंस्कारः fol. 109*b*; इति शिवावलिः । अथ श्यामाचाराः । fol. 137*a*; इति कालीसपर्या । अथ नित्यहोमविधिः fol. 165*a*; इति भैरवतंत्रे भैरवभैरवीसंवादे कालीकवचं (36 verses) fol. 167*b*; इत्युत्तरतंत्रे कालीप्रस्तावे कालीभैरवसंवादे दक्षिणकलिकाकवचं (83 vv.) fol. 172*a*; इति महाकालविरचितं श्रीदक्षिणकालिकास्वरूपाख्यं स्तोत्रं (22 vv.) fol. 174*b*; इति कालिकाकुलसर्वस्वे शिवपरशुरामसंवादे कालिकानामसहस्रं (स्तोत्रं 221 vv.) fol. 186*b*; इति तारामंत्रप्रकरणं । अथ तारावासना fol. 215*b*; इति शांतिस्तोत्रं (11 vv.) इति श्रीनलतंत्रे परमरहस्ये ताराष्टकं fol. 235*b*; इति शिवशासने तारास्तवः (17 vv.) fol. 237*b*; इत्येकचीराकल्पोक्ततारास्तवः (27 vv.) fol. 239*a*; इति श्रीशंकराचार्यविरचिता तारापञ्झटिका (31 vv.) fol. 241*b*; इति योगिनीमते ताराकवचं (28 vv.) fol. 243*a*; इति भैरवतंत्रे भैरवभैरवीसंवादे ताराकल्पे त्रैलोक्यमोहनं नाम कवचं (39 vv.) fol. 245*b*; इति गोरक्षसंहितायां नीलसरस्वतीकवचं (60 vv.) fol. 249*a*; इति श्रीहरगौरीसंवादे श्रीतारायाः कुलसर्वस्वनाम स्तोत्रं (189 vv.) fol. 259*b*; इति महाचीनक्रमः fol. 260*b*; इति कुमारीपूजा । अथ चितासाधनं fol. 265*b*.

It ends:

एवं शतत्रयादूर्ध्वं देवान्वै तर्पयेज्जलैः ।
स्नानतर्पणशून्यस्य न स्याद्देवस्य तर्पणं ॥

इत्यनेन विधानेन सिद्धिं प्राप्नोति निश्चितं ।
इह भुक्त्वा वरान्भोगानंते याति हरेः पदं ॥

इति वीरसाधनं ॥ Apparently incomplete.

The leaves are marked र° दी° or तं° र° दी, or तं° र° का; and on fol. 1*a* Colebrooke calls the work *Tantradīpikā*.

[H. T. Colebrooke.]

## 2574.

**1582.** Foll. 294; size 18¾ in. by 5¼ in.; good Bengali handwriting of 1790 A.D.; 8 or 9 lines in a page.

*Tantrasāra*, a summary of *Tantric* cult, compiled by *Kṛishṇānanda Vāgīśa Bhaṭṭācārya*.

It begins:

नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितं ।
गुरुं च ज्ञानदातारं कृष्णानन्देन धीमता ॥

तत्तद्ग्रन्थगताद्वाक्याज्ज्ञानार्थं प्रतिपद्य च ।
सौकर्यार्थं च संक्षेपात् तन्त्रसारः प्रतन्यते ॥

For an analysis of the work see Aufrecht, Cat. Bodl., no. 149 (cf. Rāj. Mitra, Notices, ii., p. 326; Weber, Berl. Cat., no. 1335). It is variously described as consisting of three (Rāj. M.), four (Aufr.) or five (Weber) sections (*pariccheda*). The colophons of those marked by Aufrecht are found here: I., fol. 31*b*; II.,

fol. 199*b* इति॰ तृतीयः(!) परिच्छेदः (but द्वितीयः MS. B., fol. 157*b*); III., fol. 252*b* इति स्तवककवच-परिच्छेदः ।

The MS. is preceded by a leaf of diagrams, and three leaves containing a list of contents.

It ends (cf. Notices, ii., p. 326):

वेदार्थशास्त्रविपरीतविलोकनेन
प्रायोभवद्बुजनलोपमपेक्ष्य मातः ।
तद्गूढकूटविशदीकरणेषु जातान्
मातः क्षमस्व तव पादयुगेषु याते ॥

यद्यन्मया नाथ विमूढबुद्ध्या
स्पष्टीकृतं गुह्यतमं तु तन्त्रे ।
क्षन्तव्यमेतत् करुणानिधान
क्रोधो न चार्हः खलु पामरेषु ॥

इति श्रीमहामहोपाध्यायश्रीकृष्णानन्दभट्टाचार्यविरचिततन्त्रसारः समाप्तः ॥

शाके पक्षशशाङ्कसप्तशशभृन्माने भवानीपदा-
म्भोजद्वन्द्वमनुस्मरन् सुरसुरश्रेष्ठद्विजैर्वन्दितं ।
नत्वा फाल्गुनिकद्वितीयदिवसे अष्टम्यां तिथौ भार्गवे
वारे जीवनशर्मणा विलिखिता यत्नादियं पुस्तिका ॥

यत्नेन लिखिता पुस्ती येनेयं ह्रियते मम ।
जननी विट्चरी तस्य जनकश्चापि विट्चरः ॥

शकाब्दाः १७१२ ॥ श्रीरामजीवनशर्मणः स्वाक्षरमिदं ॥ श्रीश्रीअनुपूर्णायै नमः ॥

The statement of the Berlin MS., that the work was revised by (*Bhairava*) *Amṛitānanda*, would seem to refer only to that MS. which commences differently from the others.

[ ? ]

## 2575.

**1200.** Foll. 255; size 12¼ in. by 4½ in.; carefully written, in Devanāgarī, towards the end of last century, by two or three different hands; eleven lines in a page.

The same work.

[H. T. COLEBROOKE.]

## 2576.

**2055.** Foll. 193; size 11½ in. by 5¾ in.; Devanāgarī writing of the early part of last century; twelve lines in a page.

*Mantramahodadhi*, an exposition of *Tantric* worship, in 25 chapters (*taraṅga*), composed, under the patronage of king *Lakshmīnṛisiṃha*, in Saṃvat 1645, by *Mahīdhara*, son of *Rāmabhakta*, and grandson of *Ratnākara*; with the author's own commentary entitled *Naukā*.

See Aufrecht, Cat. Bodl., nos. 154, 155; and the Benares edition of 1862. [GAIKAWAR.]

## 2577.

**1332.** Foll. 137+74; size 11¾ in. by 3¾ in.; Bengalī handwriting of the early part of last century; ten lines in a page.

*Mantramahodadhi*, followed by the commentary written separately. Some leaves in the latter having apparently been lost, have been replaced in Devanāgarī.

[H. T. COLEBROOKE.]

## 2578.

**1508b.** Foll. 68 (of which foll. 1, 6 and 7 are missing); size 11¾ in. by 4¼ in.; indifferent Devanāgarī writing of 1799 A.D.; thirteen lines in a page.

*Mantramahodadhi*, without the commentary.

[H. T. COLEBROOKE.]

## 2579.

**1442d.** Foll. 58 (fol. 9 of which is missing, while fol. 29 is double); size 12¼ in. by 4 in.; indifferent, modern Devanāgarī writing (foll. 28 and 29*a* by a different hand); eleven lines in a page.

*Mahīdhara's Naukā*, without the text.

Rather incorrect.

Some corrupt verses at the end: धातुवक्रभिगमाद्रिभूमिते(!) विक्रमार्कनृपतौ शकेश्वरे । ० ॥ विश्वनाथानंदनाथश्चाथ: काश्यां सदाशिव: । लिलेखैतां शुभां नौकां टीकां मंत्रमहोदधे: ॥ ० were probably copied from a previous MS. [H. T. COLEBROOKE.]

## 2580.

**1426.** Foll. 181; size 12¾ in. by 4½ in.; careless, modern Devanāgarī writing (foll. 119–127*a* by a different, regular hand); nine lines in a page.

*Mantraratnāvalī*, an exposition of *Tantric* rites and formulas in twenty-six(?) chapters (*ullāsa*), compiled, for king *Kīrtisiṃha*, by *Miśra-śrī-Bhāskara*.

It begins: सिद्धि: ॥

नत्वा श्रीगुरुकृष्णनाथचरणौ सर्वार्थसिद्धिप्रदौ
विघ्नध्वांतदिवाकरं गणपतिं देवीं च वागीश्वरीं ।
यद्ग्रंथेषु सुगोपितं गुरुमुखाद्बुद्ध्वा मुदे मंत्रिणां
सुस्पष्टा क्रियते मयार्चनविधौ श्रीमंत्ररत्नावली ॥ १ ॥

अमलकमलनेत्रापूर्णशीतांशुवक्त्राद्
दनुजमनुजदेवै: पूजिता –सिसंघै: ।
उदिततरणितेजोमंडलारक्तकांतिर्
दिशतु सकलसिद्धिं सुंदरी साधकेभ्य: ॥ २ ॥

औदार्ये कीर्तिसिंहो त्रिभयचितरणाडंबरे कीर्तिसिंह:
सौंदर्ये कीर्तिसिंहो रिपुबलमथनप्रोद्धत: कीर्तिसिंह: ।
सत्कीर्तौ कीर्तिसिंह: सुजनजनमनोवल्लभ: कीर्तिसिंह:
सद्विद्याकीर्तिसिंह: त्रिभुवनभवने कीर्तिसिंहात्पर: क:
[॥ ३ ॥

मिश्रश्रीभास्कराख्येन कीर्तिसिंहस्य चाज्ञया ।
मंत्ररत्नावली नाम क्रियते बालबोधिनी ॥ ४ ॥

तत्रादौ गुरुशिष्यलक्षणमाचक्ष्महे ॥

अवदातान्वय: शुद्ध: स्वोचिताचारतत्पर: ।
आश्रमी वेदवित् क्रोधरहित: सर्वशास्त्रवित् ॥

श्रद्धावानतसूपरश्च(*r.*० नसूयक:) प्रियवाक् प्रियदर्शन: ।
शुचि: सुवेषस्तरुण:(?० चास्तरण:) सर्वभूतसमानधी: ॥

श्रीमानतुद्धतमति: पूर्णातंताविमर्शक:(!) ।
सगुणार्चासुकृतधी: कृतज्ञ: शिष्यवत्सल: ॥

निग्रहानुग्रहे दक्षो महामंत्रपरायण: ।
ऊहापोहप्रकारक: शुद्धात्मा: कृपालय: ॥

इत्यादिलक्षणैर्युक्तो गुरु: स्याद्गरिमानिधि:(!) ।
शिष्य: शुद्धान्वय: श्रीमान् कुलीन: प्रियदर्शन: ॥

स्पष्टवाक् पुण्यचरितो ऽधीतधीर्दंभवर्जित: ।
कामक्रोधपरित्यागी रागी च गुरुपादयो: ॥

देवताप्रणत: कायमनोवाग्भिर्दिवानिशं ।
निरुजो(*r.* नी०) निर्जिताशेषयाजक:(?० पातक:)
[श्रद्धयान्वित: ॥

द्विजदेवपितॄणां च नित्यपूजापरायण: ।
युवा विनियताशेषकारण: करुणालय: ॥

इत्यादिलक्षणैर्युक्त: शिष्यो दीक्षाधिकारभाक् ।
तयोर्वत्सरवासेन ज्ञातान्योन्यस्वभावयो: ।
गुरुता शिष्यता वापि नान्यथेति विनिश्चय: ॥

इति मंत्रमुक्तावल्यां ॥ अथ मंत्रेषु विशेषनिरूपणं ॥ ०

अथ बालादिभेद: fol. 3*b*; अथ नक्षत्रप्रकार: fol. 4*a*; अथ ऋणशोधनं fol. 5*b*;—ii. अथ दीक्षाप्रकार: fol. 6*b*; iii. अथ कुंडानि fol. 11*b*; iv. भूमौ श्रीचक्रं पंचवर्णेन पूरयित्वा । अथ चायस्यदेवताया: दीक्षा । fol. 23*a*; v. अथ समयाचार: fol. 31*a*; vi. अथ होमविधि: fol. 33*b*; vii. अथ मंत्राणां दश संस्कारा: । fol. 40*b*; viii. यस्मिन्सृष्टिस्थितिध्वं[सि]न्यपिधानानुग्रहात्मकं(!) । कृत्यं पंचविधं शश्वद्भासते(?) तं स्तुम: शिवं ॥ ० sets of devotional verses with explanations, fol. 45*a*; ix. अथ मुद्रा fol. 62*a*; x. अथ कूर्मचक्रं fol. 64*a*; xi. विद्यापूजनं fol. 68*b*; xii. (रत्नपूजाविधानं) fol. 71*a*; xiii. अथ काम्यकर्माणि fol. 74*a*; xiv. अथ काम्यकर्महोम: fol. 77*b*; xv. (न्यासविधि:) fol. 82*b*; xvi. (दक्षिणापुत्थं) fol. 98*a*; xvii. अथ वाराहीभेदा: (! mainly formulas) fol. 105*b*; xviii. प्राणाग्निहोत्रविधि: fol. 115*b*; xix. do., fol. 120*b*; xx. अथ मातृकामंत्रा: fol. 122*b*; xxi. अथ शिरोमंत्रा: fol. 127*a*; xxii. अथ भुवनेश्वरीमंत्रविवरणं fol. 133*b*; xxiii. अथ त्वरितामंत्रविवरणं fol. 143*b*; xxiv. अथ दुर्गामंत्रा: fol. 156*b*; xxv. अथ गणपतिमंत्रा: fol. 165*a*; xxvi. अथ चरमंत्रा: fol. 175*b*.

This chapter seems to end fol. 180*b* अग्ने जातवेद इहावह सर्वकर्माणि साधय स्वाहा ॥ २६ ॥ when there follow three more lines of formulas,

ending इति षडंग ॥ followed by a *śārdrīlavikrīḍita* चंसासक्त०, and two *ślokas*, the second of which runs thus:

अमावास्यदिने विप्राभोजयेत्मधुरोत्तमैः ।
भक्ष्यभोज्यैर्यथाशक्ति दद्यात्तेभ्यो स्च दक्षिणाः ॥

This is followed by an incomplete *śloka* with a colophon written by a different hand, which is wrong both as to the number of the chapters (21) and the subject treated of.

In the colophon the work is attributed to *Kīrtisiṃha*: इति श्रीमहाराजाधिराजश्रीकीर्तिसिंहविरचितायां मंत्ररत्नावल्यां . . . उल्लासः ॥

The author quotes *Jñānārṇava, Jayadrathayāmala, Mantramuktāvalī, Tantrarāja, Pañcarātratantra, Prapañcasāra, Śāradātilaka* and *Sārasamuccaya*, etc. [H. T. COLEBROOKE.]

## 2581.

**1197.** Foll. 78; size 12½ in. by 4½ in.; careless, modern Devanāgarī writing, by the same hand as the bulk of the preceding MS.; nine lines in a page.

*Mantrārādhana-dīpikā*, an exposition of *Tantric* formulas, by *Yaśodhara*, son of *Kaṃsāri Miśra*.

Chapters vii.-ix., and part of the xth. Very incorrect.

VII. begins: नहितोनलः दीर्घवाम्येपरायश्चादपरायैहसौ पुनः सदाशिव ०

VIII. fol. 15: अथ शैवमंत्राः ॥ तत्रैकप्रासादमंत्रः । ०

IX. fol. 44: अथ वैष्णवमंत्राः ॥ तत्रादौ रामाभिषेको द्वादशाक्षरः । ०

It ends (fol. 77 *b*): इति श्रीकंसारिमिश्रात्मजयशोधरविरचितायां मंत्राराधनदीपिकायां नवमः प्रकाशः ॥

X. begins: अथाष्टादशाक्षरगोपालमंत्रं ॥ ०

The MS. breaks off abruptly with अष्टकम, after which a later hand has added the colophon: इति श्रीकंसारिमिश्रविरचितायां मंत्रदीपिकायां दशमप्रकाशः ॥ [H. T. COLEBROOKE.]

## 2582.

**968c.** Foll. 15; size 7½ in. by 4½ in.; careless Devanāgarī writing of 1753 A.D.; ... lines in a page.

*Mantramuktāvalī*, a short compilation of *Tantric* spells, with directions for the use of them; in very incorrect Sanskrit.

It begins: श्रीभगवान उवाच: ओं अस्य श्रीगुरुर्ब्रह्मा गुरुर्विष्णुर्गुरु देवमहेश्वरं गुरु स्वं परं ब्रह्म तस्मै श्रीगुरवे नमः आदित्यवारे मलेछबुद्धि च सोमवारे सर्वेविजयः मंगलवारे धनविद्या च बुधवैश्यमेव चः बृहस्पतिवारे शांतिं कृत्वा च शुक्रवार वैश्य भवेत् शनिवारे गच्छति बृद्धिपुत्रदाराधनं ०

It ends with mystic sets of the figures t and e in conjunction with the days of the week, thus: रविवारे ttttttotttteetttt रविदिने । times t, etc., शनिदिने 4 t, 3 e, 6 t, 1 e, ॥ इति श्रीमंत्रमुक्तावली संपूर्णा ॥

[H. T. COLEBROOKE.]

## 2583.

**1192b.** Foll. 70; size 12½ in. by 4¾ in.; careless Devanāgarī writing, of 1804 A.D.; eight lines in a page.

*Dakshiṇāmūrtisaṃhitā*, a work on *Tantric* worship by means of mystic formulas. It seems to consist of 64 chapters (*paṭala*), only the first 40 of which are, however, numbered in this MS.

It begins:

श्रीमच्छ्रीकोशहृदयं पंचसिंहासनात्मकं ।
फलं कल्पलतानां च चारुरत्नस्फुरत्कलं ॥ १ ॥

चतुरायतनानंदि चतुराम्नायकोशगं ।
नित्यानंदि परं ब्रह्मधाम नौमि सुखाप्तये ॥ २ ॥

श्रीदेव्युवाच ॥

कृपां कुरु महादेव कृपयानंदसुंदर ।
किंतु ब्रह्ममयं [धाम] श्रोतुमिच्छामि तत्त्वतः ॥ ३ ॥

कथं श्रीसहितं देव श्रीकोशहृदयं कथं ।
पंचसिंहासनं सेव्यं कथं कल्पलतात्मकं ॥ ४ ॥

कथं रत्नात्मकं देव कथमायतनात्मकं ।
कथमाम्नायसंसेव्यं कथं नित्यात्मकं प्रभो ॥ ५ ॥

ईश्वर उवाच ॥

एतत्सर्वात्मकं वस्तु त्रिपुरा पर[मे]श्वरी ।
चतुर्लक्ष्मी सेव्यमाना तदा कामदुघा वरा ॥ ६ ॥
श्रीविद्या च तथा लक्ष्मीर्महालक्ष्मीस्तथैव च ।
त्रिशक्तिः सर्वसाम्राज्यलक्ष्मी पंच प्रकीर्तिताः ॥ ७ ॥ °

1. *ekāksharalakshmīpūjāvidhi;* 2. *mahālakshmīpūjā;* 3. *triśaktimahālakshmīyajanavidhi;* 4. *sāmrājyavidyāyajanavidhi;* 5. *ātmāshṭāksharaparajyotirvidyārādhanam;* 6. *praṇavavidyāparanishkalabhedasamārādhanam;* 7. *ajapānāmavidhānam;* 8. *mātṛikāpūjāsādhanavidhi;* 9. *tripureśvarīsamārādhanavidhi;* 10. *kāmeśvarīpūjāvidhi*, etc.

It ends:

मलकेलिं ततः कुर्यात्सार्धं समयिभिः सुखं ।
अन्नदानं प्रकुर्वीत रसैः षड्भिः समन्वितं ॥

एवं यः कुरुते विद्वान् दमनारोपणक्रमं ।
तस्य सांवत्सरी पूजा श्रीविद्याधिष्ठिता भवेत् ॥

इति दक्षिणामूर्तिसंहितायां दमनकारोपणविधानं नाम पटलः समाप्तः ॥ [H. T. COLEBROOKE.]

## 2584.

**1230a.** Foll. 17; size 11 in. by 4½ in.; fairly good, modern Devanāgarī writing; nine lines in a page.

*Kāmākhyātantra*, a treatise on the worship of *Śakti*, in the form of *Kāmākhyā*, here consisting of 7 *paṭalas*.

It begins: श्रीदेव्युवाच ।

भगवन् सर्वधर्मज्ञ सर्वविद्याप्रिय प्रभो ।
सर्वदानंदहृदय सर्वागमविकाशक ॥

श्रुतानि सर्वतंत्राणि साधनानि च सर्वशः ।
विद्यास्ताः सकला देव फलानि त्वत्प्रसादतः ॥ °

Cf. Rāj. Mitra, Notices, iii., p. 39, where, as in the next MS., the treatise is divided into 9 *paṭalas*.

It ends:

एतत्ते कथितं स्नेहान्न प्रकाश्यं कदाचन ।
गोपनीयं गोपनीयं गोपनीयं सदा प्रिये ॥
पशोरग्रे विशेषेण गोपनीयं प्रयत्नतः ।
भ्रष्टानां साधकानां च सान्निध्ये न वदेदपि ॥
न दद्यात्कापालजेभ्यो विगीतेभ्यस्तथैव (?ऽविनी°) च ।
उदासीनजनस्यैव सान्निध्ये न वदेदपि ॥
दांभिकाय न दातव्यं नाभक्ताय कदाचन ।
मूर्खाय भावहीनाय दरिद्राय ममाज्ञया ॥
दद्याच्छांताय शुद्धाय कौलिकाय महेश्वरि ।
कालीभक्ताय शैवाय प्रदद्याच्च शिवाज्ञया ॥
अनेन भवमुक्ताय महाकालप्रपूजिने ।
सुरास्त्रीवंदकायाय शिवाबलिप्रदाय च ॥

इति श्रीकामाख्यातंत्रे पार्वतीश्वरसंवादे (thus always) सप्तमः पटलः ॥ [H. T. COLEBROOKE.]

## 2585.

**1442b.** Foll. 13; size 12¼ in. by 4 in.; very careless, modern Devanāgarī writing; ten lines in a page.

*Kāmākhyātantra.* The treatise is here divided into 9 *paṭalas*, the first two of which correspond to *paṭ.* 1, and 3 and 4 to *paṭ.* 2, of the preceding MS.

[H. T. COLEBROOKE.]

## 2586.

**3187.** Foll. 29; size 7¾ in. by 6 in.; well written, in Devanāgarī, on European paper (water-mark 1867); ten lines in a page.

*Kalpasūtra*, a manual of certain *Tantric* rites, ascribed to *Paraśurāma*.

It begins:

श्रीगुरुगणपतीष्टदेवताभ्यो नमः ॥ अथातो दीक्षां व्याख्यास्यामो भगवान्परमशिवभट्टारकः श्रुत्यष्टादशविद्याः सर्वाणि दर्शनानि लीलया तत्तदवस्थापन्नः प्रणीय स्वविमर्शरूपया भगवत्या भैरव्या स्वात्माभिन्नया पृष्टः पंचभिर्मुखैः पंचाम्नायान्परमार्थसारभूतान् प्रणिन्ये तत्रायं सिद्धांतः षट्त्रिंशत्तत्वानि विश्वं शरीरं कंचुकितः शिवो जीवो निष्कंचुकितः परमशिवः स्वविमर्शः

पुरुषार्थी वर्णात्मिका नित्याः शब्दा मंत्राणामचिंत्यशक्तिता संप्रदायविश्वासाभ्यां सर्वसिद्धिर्विश्वासभूयिष्ठं प्रामाण्यं गुरुमंत्रदेवतामनःपवनानामैक्येन भावनादंतरात्मविश्विरानंदं ब्रह्मणो रूपं तच्च देहे व्यवस्थितं० सर्वेषु दर्शनेषु गुप्तेयं विद्या । तत्र सर्वथा मतिमान्दीक्षेत । दीक्षात्रिधा: शाक्तिकी शांभवी मांत्री चेति । तत्र शाक्तिकी शक्तिप्रवेशनाच्छांभवी चरणविन्यासान्मांत्री मंत्रोपदिष्टा । सर्वांश्च कुर्यादेकैका चेत्येके । सद्गुरुः क्रमं प्रयत्नं सांगं कृत्वा तरुणोल्लासवान् शिष्यमाहूय वाससा मुखं बद्ध्वा गणपतिललिताश्यामावार्तालीपरापात्रबिंदुभिस्तमथोक्ष्य सिद्धांतं श्रावयित्वा ॥ तच्छिरसि रक्तशुक्लचरणौ भावयित्वा तदमृतक्षालितं सर्वमलंकुर्यात् ०

ब्राह्मे मुहूर्ते उत्थाय सहस्रदलकमलकर्णिकामध्यनिविष्टगुरुचरणयुगलविगलदमृतरसविसरपरिप्लुताखिलांगो ० fol. 3*a*; अथ यागविधिः fol. 3*b*; अथ होमविधिं व्याख्यास्यामः fol. 22*b*; अथातः सर्वेषां मंत्राणां सामान्यपद्धतिं व्याख्यास्यामः ॥ fol. 24*b*; भूर्भुवः स्वस्तत्सवितुर्वरेण्यं ० प्रचोदयात् । इति त्रिंशार्णा गायत्री ॥ यत इंद्र भयामहे ० (*Rigv.* viii. 38, 13) । स्वस्तिदा ० (ib. x. 152, 2) । इत्यैंद्री गायत्री ॥ ० खेचराय नमः ॥ ० नमो भगवते श्रीसूर्याय ॥ ० पुंडरीकाक्षाय नमः ॥ पुष्करेक्षणाय नमः ॥ अमलेक्षणाय नमः ॥ कमलेक्षणाय नमः ॥ विश्वरूपाय नमः ॥ श्रीमहाविष्णवे नमः ॥ इति षोडशमंत्रेण समवृष्टिरूपिणी दूरदृष्टिसिद्धिप्रदायकचक्षुष्मती विद्या ० । इति महाव्याधिनाशनी विद्या ॥ ०

It ends:

य इमां दशकांडीं महोपनिषदं महात्रैपुरसिद्धांतमालासर्वस्वभूतामहरहरधीते स सर्वयज्ञेषु यष्टा भवति यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति श्रुतमित्युपनिषदिति शिवं ॥ इति श्रीदुष्टक्षत्रियकुलकालांतकरेणुकागर्भसंभूतमहादेवप्रधानशिष्यश्रीनारायणावतारमहामहोपाध्यायश्रीपरशुरामविरचितं कल्पसूत्रं संपूर्णं ॥

This seems to be a different treatise from the same author's *Vidyākalpasūtra*, described by Rāj. Mitra, Notices, iv., p. 69.

'This copy was made from an undated Devanāgarī MS. belonging to *Lakshman Trimbakjī Gadgil* of Belgaum, consisting of 39 leaves, about 8″ by 3¾″; and presented to the India Office Library, 23rd Aug. 1878.'

[J. F. FLEET.]

## 2587.

**452b.** Foll. 11; size 9½ in. by 5 in.; fair Devanāgarī writing of the latter part of the last century; 12–15 lines in a page.

*Mahārasāyanavidhi*, also called *Kākacaṇḍeśvarīmata*, a *Tantric* treatise on quack medicines; deriving its name from *Kākacaṇḍeśvarī* (or *Kākacāmuṇḍā*), a particular form of *Śakti* or *Bhairavī*, to whom *Īśvara*, in a series of conversations, reveals his occult science.

Very incorrect. It begins:

कैलासशिखरासीन[म्] उमासार्धं जगद्गुरुं ।
योगिन्यः कथयं(°नोऽकथयन्) यंत्रं गुह्याद्गुह्यतरं परं ॥ १ ॥
सर्वज्ञानप्रकाशाय सर्वज्ञः सर्वकृद्भुयः(!) ।
एतैः कथं कथं देव त्वया सर्वं ममोपरि(!) ॥ २ ॥
ईश्वर उ० ॥
कंकालिकालरात्रिं च कालचंडाभयाविका ।
कालिका कालरात्रिं च काकचंडेश्वरीमते ॥ ३ ॥

The numbering of the *ślokas* is discontinued from fol. 6 (after *śloka* 127).

इति (प्रथमः ०) चतुर्थः पटलः fol. 4*b*; इति काकचांडेश्वरीमते त्रैलोक्यसुंदरीगुटिका संपूर्णा fol. 5*a*; इति ० जारणपटलः fol. 6*b*; इति शाल्मलीकल्पः ० इति ब्रह्मदंडीकल्पः fol. 7*a*; इति काकचांडेश्वरीकल्पः (?) fol. 7*b*; इति हारीतकीकल्पः fol. 8*a*; इति पोटलीपादरसेंद्रं fol. 8*b*; इति ० जलूकापटलः fol. 9*a*; इति ० तालकेश्वरं fol. 10*b*.

It ends:

सप्तमे सप्तके चैव खेचरी भवति व्यथा ।
अस्यपुन्येन सोर्ध्यति (!) इदं चैव रसायनं ॥
न कांतेन विना सूतं सूतं कांतिविवर्जितं ।
सतमंत्रसतोदेहेनह (!) पिंडमिवाभसि ॥
इति महारसायनविधिः समाप्तः ॥

[H. T. COLEBROOKE.]

## 2588.

**1248c.** Foll. 16; size 9½ in. by 3¾ in.; fairly good Devanāgarī writing of 1777 A.D.; nine lines in a page.

*Mantraratnākara*, by *Vijayarāmācārya*, pupil of *Caturbhujācārya*. The 13th chapter (of the section) entitled *Kārtavīryamantranirūpaṇa*, containing charms and spells, in the form of prayers addressed to *Kārtavīrya-Arjuna*, king of the Haihaya country, with the view of averting ill-luck of every kind.

It begins:

अथ सर्वेष्टदान् वक्ष्ये कार्तवीर्यमनुक्रमान् ।
यान्समाराध्य मनुजाः साधयंति निजेप्सितं ॥ १ ॥

रौद्री सद्याग्निचंद्राढ्या(!) लक्ष्मीर्येहींदुशांतियुक् ।
चिधिर्धरेंदुशांत्याढ्या निद्राग्यग्नींदुसंयुता ॥ २ ॥

पाशो मायांकुशं विष्णुप्रिया वर्मास्त्रमीरयेत् ।
कार्तवीर्यार्जुनो रेतो हृदंतः प्रणवादिकः ॥ ३ ॥

It ends:

श्रीफलैः श्रियमाप्नोति पद्मैर्वश्यो भवेन्नृपः ।
किं बहूक्तेन सर्वेष्टं प्राप्नोति साधकोत्तमः ॥ ३१४ ॥

इति श्रीमच्चतुर्भुजाचार्यचरणसरोजनिवसित(मनं)चंचरीका-स्वादितचित्मकरंदश्रीमद्विजयरामाचार्यविरचिते मंत्ररत्नाकरे कार्तवीर्यमंत्रनिरूपणे त्रयोदशस्तरंगः ॥

[H. T. COLEBROOKE.]

## 2589.

**1717.** Foll. 81, 83 and 67; size 9½ in. by 4¼ in.; careless Devanāgarī writing of 1768 A.D.; ten lines in a page.

*Śaktisaṃgama-tantrarāja*, a spicilegium of abstruse speculations on the transcendent mysteries of *Tantric* belief, in four *khaṇḍas*, only three of which—viz. I., III. (or II.), and IV., consisting of 20, 20, and 11 *paṭalas* resp.—are, however, contained in the present MS.

It begins (with the numbers supplied): श्रीदेव्युवाच ।

अनादिरूप भूतेश शशिशेखर शंकर ।
देवाधिदेव विश्वेश विश्वाराध्य सुरेश्वर ॥ १ ॥

निरंजन निराकार नित्यानंद गुणाकर ।
गुणातीत परस्वामिन्सर्वातीत परात्पर ॥ २ ॥

त्वत्तः श्रुतं जगत्सर्वं स्थावरजंगमादिकं ।
श्रुतानि सर्वतंत्राणि लक्षकोट्यर्बुदानि च ॥ ३ ॥

तंत्रार्णवादिकं देवराज राजेश्वर प्रभो ।
तंत्रराजः श्रुतो देव नानाभेदाश्च संश्रुताः ॥ ४ ॥

रसायनं श्रुतं देव सिद्धयो विविधाः श्रुताः ।
शक्तिसंगमनामानं तंत्रराजोत्तमोत्तमं ॥ ५ ॥

सूचितं देव देवेश मंत्रसिद्धाभिधागमे ।
न मह्यं कथितं देव संशयं छेदय प्रभो ॥ ६ ॥

चतुःखंडेन संयुक्तं सर्वसारोत्तमोत्तमं ।
तंत्रं कथय देवेश संप्रदायक्रमागतं ॥ ७ ॥

समग्रं तंत्रराजेंद्रसापेक्षरहितं(?) प्रभो ।
संप्रदायप्रभ्रष्टानां मार्गसंदर्शकारकं ।
कल्ये (!) सिद्धिप्रदं तत्र कथयस्व मम प्रभो ॥ ८ ॥

शिव उवाच ।

तंत्रराजः पूर्वमुक्तः खंडाष्टकसमुज्ज्वलः ।
पूर्वार्धमुत्तरार्धे(!) च सार्धद्वयसमन्वितः ॥ ९ ॥

पूर्वार्धं कादिसंज्ञं तु द्वितीयं हादिसंज्ञकं ।
कादौ तु वेद(*i. e.* 4)खंडानि हादावपि चतुष्टयं ॥ १० ॥

प्रतिखंडं महेशानि त्रिसहस्रं च षट्शतं ।
प्रत्यध्यायं शतश्लोकाः षट्त्रिंशत् पटलानि च* ॥ ११ ॥

इत्येकखंडमित्युक्तमेव खंडाष्टकं विदुः ।
दिव्यौघरचितो यत्र गुरुद्वारा(?) भविष्यति ॥ १२ ॥

शक्तिसंगमनामाख्यं श्रीवृहत्तंत्रराजकं ।
षट्खंडसमायुक्तं षष्टिसाहस्रकं शुभे ॥ १३ ॥

दिव्यौघरचितं तंत्रं सर्वतंत्रोत्तमोत्तमं ।
तत्रादि काल्या रचितं ताराख्यं द्वितीयकं ॥ १४ ॥

तृतीयं सुंदरीरूपं चतुर्थी छिन्नमस्तका ।
युगे युगे चंद्रसंख्यं कलौ खंडचतुष्टयं ॥ १५ ॥

षट्शती वत्सरांते तु द्विसप्तयुत्तरं शिवे ।
आविर्भवतु देवेशि दिव्यौघाज्ञा रतः शिवे ॥ १६ ॥

I. ends:

तत्त्वं निहनादेवमुखादुच्चार्यते(!) च यत् ।
तदेव सत्यं भवति प्रोक्तस्पर्शं(? r. प्रोक्तात्परं) किमिच्छसि॥

इति श्रीमदक्षोभ्यमहोग्रतारासंवादे शक्तिसंगमतंत्रराजे प्रथमखंडे कामधेन्वादियोगे विंशः पटलः समाप्तः ॥

* For the *Kādimata* see no 2538.

III.(?) begins: देव्युवाच ॥

देवदेव महादेव भक्तानुग्रहकारक ।
अनाद्यंत पराकाश तमोडे निर्गुणं विभुं ॥ १ ॥
त्वत्प्रसादान्मया नाथ ज्ञानमागमशासनं ।
कालांतरे समायाते पुनः पृष्टं मया विभो ॥ २ ॥
पूर्णाभिषेकदीक्षा तु कथं भेदत्वमागता ।

ईश्वर उवाच ॥ °

It ends:

सर्वेतंत्रे प्रयुक्तत्वादत्र संक्षेपतो मता(? मया) ।
मंत्रांतरत्वात्कथिता किमन्यत् श्रोतुमिच्छसि ॥

इति श्रीकालीकालसंवादे षट्शांभवरहस्ये उड्डभैरवीये शक्तिसंगमतंत्रराजे षष्टिसहस्रे धूमावतीकौतुकं संक्षेपविधिर्नाम विंशतितमः पटलः ॥ समाप्तश्चायं ग्रंथः ॥

IV. begins: देव्युवाच ।

देवदेव महादेव सर्वसिद्धिप्रवर्तक ।
तन्त्रं श्रुतं मया सर्वं रहस्यातिरहस्यकं ।
इदानीं वद देवेश रहस्यं परमं विभो ॥

शिव उवाच ।

रहस्यातिरहस्यं च कथं त्वयि निवेद्यते ।
तथापि तव सद्भक्त्या रहस्यमपि कथ्यते ॥
काली तारा छिन्नमस्ता सुंदरी बगला रमा ।
मातंगिभुवनासिद्धिविद्या(!) च भैरवी तथा ॥ °

It ends:

गोपनीयं गोपनीयं गोपनीयं पुनः पुनः ।
रहस्यातिरहस्यं च रहस्यातिरहस्यकं ॥ १०५ ॥
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥

इति श्रीमदक्षोभ्यमहोग्रतारासंवादे तारासूक्ते ब्रह्मजातिवर्णने एकादशः पटलः ११ समाप्तः ॥ संवत् १८१५ ॥

Cf. Rāj. Mitra, Notices, i., p. 229; Bik. Cat., p. 606; where *khaṇḍa* I. is said to consist of 20; II. of 65; III. of 19; IV. of 11 chapters. The opening and concluding couplets of the former MS. agree with those of the present one. [H. T. Colebrooke.]

## 2590.

**1412b.** Foll. 16; size 12¾ in. by 4⅜ in.; fair Bengali handwriting of about 1750 A.D.; twelve lines in a page.

*Parātantra*, or *Karavīrayāga*, a series of revelations regarding the occult science of *Tantric* worship, in the form of a dialogue between *Īśvara* and *Devī*. Very incorrect.

Whether the title *Kālīkulakrama* refers only to the last section of this treatise, or whether it belongs to the whole, as that of a section of a larger work, is not clear.

It begins:

बहुसिद्धि(r. सिद्ध)समाकीर्णे श्मशाने करवीरकं(r. ° के)।
तत्र वीरगणाः सर्वे महाभल्लान्त(कल्लोल C.)हूंकृते ॥
निवर्तते महाशत्रुयोगे (निवर्तितमहाचक्रे योगे C.) चिद-[शडामरे ।
महावृन्दे महास्थाने गणडाकिनि(महास्फारडाकिनीगण[C.)याचिते ॥

बाह्याद्या(ब्रह्माद्या C.)मातरश्चाष्टौ क्षेत्रेण(!) भैरवा॒यः ।
गणेशो (°शा C.) बटुकाः सिद्धा मातृचक्रे तु मालके[(मेलके C.) ॥

श्रीनाथादिगणाः [सर्वे] वीरनाथावतारिते ।
सिद्धिनाथावकाशेन संतोषितकुलेश्वरे ॥

सर्वभूषां परित्यज्य सानन्दोल्लासिमानसा ।
श्रीचक्रे स्म स्थितं देवं पृच्छते कुलसुन्दरी ॥

श्रीदेव्युवाच ।

सर्वश्रोतोत्तरं(श्रोत्रोद्भवं C.)ज्ञानं त्वत्प्रसादाच्छ्रुतं मया ।
यामलाष्टकपूर्वं तु तन्त्राण्यनेकधानि च ॥

शिरश्छेदश्च बहुधा महामन्थानपद्दकं(!) ।
मालातन्त्रं च चकार सागराभ्यामिहामतं ॥

चतुर्विंशतिचैलक्षश्रुताः (!) सर्वा विधारिता ।
इदानीं संशयो जातो तवैव वचनात्प्रभो ॥

एषा सा परमा शक्तिर्न द्वितीया परेश्वरी ।
एषा शक्तिर्महामाया विश्वं व्याप्य व्यवस्थिता ॥

नादिर्मध्या न चान्ता तु यया सर्वं प्रवर्तते ।
तथोक्ता न द्वितीया च तन्त्रे कुलमहार्णवे ॥

एषा संधीयते विश्वमेका त्रैलोक्यपूजिता ।
एतदेव तथा(?) ब्राह्मीषडाम्नायः कथं प्रभो ॥

षट्सिंहासनगा देवी नायिकाः षट् प्रकीर्तिताः ।
षडाम्नायविभिन्ना चैका सा परमा कथं ॥

अभिन्ना चाथ भिन्ना च त्वं चेदेव जगत्प्रभो ।
कथमेवापरा शक्तिर्विभिन्ना परमेश्वरी ॥ °

श्रीसदाशिव उवाच ।

मयि प्रियतमे देवि निशामय वदामि ते ।
गुह्यं गुह्यतमं दिव्यमकथ्यं कथयामि ते ॥
तव स्नेहात्प्रवक्ष्यामि रहस्यं कौलिकाय वै ।
तां नमस्कृत्य वक्ष्यामि विष्णुमायां जगन्मयीं ॥
नारायणीं महामायां प्रकृतिं विश्वरूपिणीं ।
एकापरा परा शक्तिः प्रकृतिर्विश्वमोहिनी ॥
विश्वविमोहिनी सा च वैष्णवी च प्रकीर्तिता ।
धारणाद्धात्रीमित्याहुः पालनां परमेश्वरीं ॥
त्रैलोक्यमोहनाम्मायायुता सा प्रकृतिः स्मृता ।
विश्वसंसारणात्सा तु वैष्णवी तु प्रकीर्तिता ॥ °

इति श्रीपूर्णेश्वरीपूर्वाम्नायः [॥ १ ॥ C.] fol. 2*b*; इति परातन्त्रे विश्वेश्वरीदक्षिणाम्नायः [॥ २ ॥ C.] fol. 3*b*; इति° पश्चिमसिंहासनं (पश्चिमाम्नायकुब्जिकादेवी ॥ ३ ॥ C.) fol. 4*a*; इति परातन्त्रे उत्तराम्नाये कालिकाक्रमः (कालीक्रमः ॥ ४ ॥ C.) fol. 4*b*; इति परातन्त्रे श्रीविद्याऊर्ध्वाम्नायः (ऊर्ध्वाम्नायत्रिपुरसुन्दरी ॥ ५ ॥ C.) fol. 6*b*; इति श्रीमहास्रोतसि शिरश्छेदे करवीरमहायागे परातन्त्रे (परातन्त्रक्रमे C.) द्वादशसाहस्रिकायां षडाम्नायाभेदसूत्रं ॥ ६ ॥ ib.; इति श्रीमहास्रोतसि शि° करवीरयागे परातन्त्रे (परातन्त्रक्रमे C.) क्रमद्वादशसाहस्रिकायां कालीक्रमनिर्णयसूत्रं fol. 11*a*; इति श्रीभैरवस्रोतसि शि° करवीरयागे परातन्त्रे (परातन्त्रक्रमे C.) परमार्थनिर्णयः 13*a*.

It ends:

चिच्छिन्ना बहुधा जाता नानाभेदसमाश्रिता ।
एका सा बहुरूपा च जानीयाद्दिव्यचक्षुषा ॥
स एव साधकः श्रेष्ठः सिद्धिज्ञानस्य भाजनं ।
अनुष्ठानरतं सर्वं सिद्धिभागी भवेद्ध्रुवं ॥

इति श्रीभैरवस्रोतसि (इति श्रीस्रोतसि C.) शिरश्छेदे महाकरवीरयागे परातन्त्रे कालीकुलक्रमः समाप्तः ॥

On the back of the last leaf the treatise is called *Karavīratantrakulakarma.*

The Cambridge Library possesses another MS. of this work (Add. 1477; 39 leaves, the second of which is, however, wanting) from which Profs. Aufrecht and Cowell have kindly supplied the various readings noted above.

[H. T. Colebrooke.]

## 2591.

**1192c.** Foll. 41; size 12½ in. by 4½ in.; indifferent Devanāgarī writing of 1804 A.D.; eleven lines in a page.

*Rahasyārṇava*, a manual of *Tantric* worship, in 15 chapters (*paṭala*), compiled, under orders of *Jayacandra Narendra* of Trigarta (Lahore), by *Vanamālin*, pupil of *Hṛidayānanda*. The MSS. (esp. the second) are rather incorrect.

It begins (somewhat corrected): श्रीपरदेवतायै नमो नमः ॥

सुधासारेण सिंचंतीं कंठनीलं सदाशिवम् ।
नवीनजलदश्यामां विघ्नेशजननीं नुमः ॥ १ ॥
नमामि ज्वालपां देवीं कालपाशनिकृंतनीं ।
ब्रह्मेशविष्णुनमितां क्षिप्रसिद्धिप्रदायिनीं ॥ २ ॥
गुरुं च हृदयानन्दं सर्वशास्त्रविशारदं ।
शिवरूपं नतो नित्यं मंत्राज्ञां विदधातु नः ॥ ३ ॥
जयचंद्रनरेंद्रस्य त्रिगर्तेशस्य चाज्ञया ।
विदुषां साधकानां च प्रीतये वनमालिना ॥ ४ ॥
सिद्धिप्रदः सदा तेषां पशूनां च विषप्रदः(!) ।
श्रीरहस्यार्णवो ग्रंथस्तन्यते सरसो मया ॥ ५ ॥
सप्रमाणं सतर्कं च विदुषां त्वचनादपि ।
भावचूडामणिं ज्ञात्वा तंत्रचूडामणिं तथा ॥ ६ ॥
कुलचूडामणिं चैव ज्ञानार्णवं च भैरवीं ।
कुलार्णवं वीरतंत्रं समयाचारमुत्तमं ॥ ७ ॥
गांधर्वमत्स्यसूक्तं च नीलतंत्रं ततः परं ।
एकवीरां समालोक्य तत्त्वार्णवं च भैरवं ॥ ८ ॥
अन्येषां च मतं ज्ञात्वा साधकानां हिताय च ।
गुरुक्रमविधानं च भावश्च त्रिविधस्तथा ॥ ९ ॥
कुमारीपूजनं चैव कुलाचारस्ततः परं ।
पीठपूजाविधिश्चैव निशीथसाधनं ततः ॥ १० ॥
पाण्डवैः पूजनं चैव द्रौपदीसंस्कृतिस्ततः ।
पुरश्चर्याक्रमश्चैव बलिदानविधिस्ततः ॥ ११ ॥
रहस्यातिरहस्यं च साधनं सर्वसिद्धिदं ।
विभूतिधारणं चैव संतयोगविधिस्तथा ॥ १२ ॥
योगश्चैव यथान्यायं ग्रंथे ऽस्मिंस्तन्यते मया ।
एनं विज्ञाय यो मर्त्यः कुरुते साधनं सदा ॥ १३ ॥

शंकरस्य प्रतिष्ठैषा तस्य सिद्धिः करे स्थिता ।
ततो गुरुक्रमं वक्ष्ये यथावदनुपूर्वशः ॥ १४ ॥

तदुक्तं भावचूडामणौ । ०

1. *Gurunirṇaya*, fol. 4*b*; 2. *bhāvanirṇaya*, fol. 8*a*; 3. *kumārikākalpa*, fol. 9*b*; 4. *samayācāra*, fol. 10*a*; 5. *pīṭhapūjā*, fol. 10*b*; 6. *niśīthapujāpaddhati*, fol. 11*a*; 7. *pāṇḍavamahāpūjāpaddhati*, fol. 22*a*; 8. *draupadīsaṃskṛiti*, fol. 23*b*; 9. *chinnādipaṭala*, fol. 28*b*; 10. *puraścaryākrama*, fol. 35*a*; 11. *balidānavidhi*, fol. 36*b*; 12. *vibhūtidhāraṇavidhi*, fol. 37*b*; 13. *antaryāgavidhi*, fol. 39*a*; 14. *yogacaraṇam*, fol. 39*b*; 15. *rahasyoktadravyaśodhanavidhānam*; ends:

अनंतरं श्रीपात्रं गृहीत्वा शांतिपठनं । तर्पणं च तत्त्वेन ईशस्वरूपमात्मानं सकुर्यात्(!) ॥ हरिमीडे ॥ ०

इति श्रीवनमाल्याचार्यश्रीरहस्योक्तद्रव्यशोधनविधानं पंचदशः पटलः ॥ This colophon has caused the alternative title of *Dravyaśodhana* being wrongly ascribed to the whole work.

The colophons usually run thus: इति श्रीवनमाल्याचार्यसंगृहीते रहस्यार्णवे ०

[H. T. Colebrooke.]

## 2592.

**581d.** Foll. 50; size 12¼ in. by 4½ in.; fairly written in Devanāgarī, by several hands, in 1800 A.D.; eleven lines in a page.

The same work. Both MSS. seem to have been transcribed from the same original.

[H. T. Colebrooke.]

## 2593, 2594.

**705, 706.** Foll. 1–150, 151–293; size 16¼ in. by 4¼ in.; clear Bengalī handwriting of about 1700 A.D.; nine lines in a page.

*Śivarahasya*, an extensive work on *Śiva*-worship. The complete work consists of 12 parts (*aṃśa*), only one of which, the seventh, is contained in these volumes.

It begins: ऋषय ऊचुः ।

सूत वेदार्थतत्त्वज्ञ शिवध्यानपरायण ।
मुक्त्युपायं वदास्मभ्यं कृपालो मुनिसत्तम ॥

कः सेव्यः सर्वदेवेषु को वा जप्यो मनुः सदा ।
स्थातव्यं कुत्र वा नित्यं किं वा सर्वार्थसाधकं ॥

सूत उवाच ।

धन्यान्मन्यामहे नूनमनन्यशरणान्मुनीन् ।
वनाशिनो वनायासाद्यस्तमन्यूनकल्मषान् ॥

भवद्भिः सर्ववेदार्थतत्त्वज्ञानमकल्मषैः ।
परात्परतरः शर्वः सर्वदा पूज्यते धिया ॥

भवद्भिः सर्ववेदार्थो ज्ञात एवास्ति यद्यपि ।
तथापि किंचिद्वक्ष्यामि यथा ज्ञातं मया तथा ॥

पुरा कैलासशिखरे सुखासीनं जगत्प्रभुं ।
वेदान्तवेद्यमीशानं शङ्करं लोकशङ्करं ॥

विश्वतश्चक्षुषं देवं विश्वतोमुखमव्ययं ।
विश्वतोबाहुमाराध्यं विश्वतःपादमीश्वरं ॥

निष्कलं निर्गुणं शान्तं निरवद्यमनामयं ।
निष्प्रपञ्चं निराकारं निर्मलं निरुपाधिकं ॥

शर्वं प्रसन्नवदनं सर्वाभरणभूषितं ।
गौरीभूषितवामाङ्गं ब्रह्मविष्ण्वादिसेवितं ॥

अप्रमेयजगज्जन्मस्थितिसंहारकारणं ।
सोमसूर्याग्निनयनं सोमार्धकृतशेखरं ॥

विल्वचन्दनलिप्ताङ्गं नरविल्वदलार्चितं ।
व्याघ्रचर्मपरीधानमनन्तेन्दुरविप्रभं ॥

नानामणिगणाकीर्णं किरीटकटकावृतं ।
दयासुधार्द्रनयनं वरदा(*r.* दो)भयपाणिनं ॥

निजसंतोषपूर्णाङ्गमुमालिङ्गितविग्रहं ।
विलोक्यातीव संतुष्टः षण्मुखः साम्बमीश्वरं ॥

मत्वा कृतार्थमात्मानं प्रणिपत्य सदाशिवं ।
पप्रच्छ सर्वलोकानां मुक्त्युपायं कृताञ्जलिः ॥

विश्वेश्वर महादेव विष्णुब्रह्मादिवन्दित ।
देवानां मानवानां च किं मोक्षस्यास्ति साधनं ॥

तव नामान्यनन्तानि सन्ति यद्यपि शङ्कर ।
तथापि तानि भव्यानि न ज्ञायन्ते मयाधुना ॥

प्रियाणि शिवनामानि सर्वाणि शिव यद्यपि ।
तथापि कानि रम्याणि तेषु प्रियतमानि ते ॥

तानि सर्वार्थदान्यद्य कृपया वक्तुमर्हसि ।
यन्नामस्मरणादेव सद्यो मुच्यते पातकैः ॥
रसनारससारज्ञा त्वन्नामामृतपायिनी ।
यस्यास्ति स पुमान्धन्यो मान्यो ह्यमनुजैरपि ॥
जन्मान्तरसहस्रेषु तप्तं यदि तपस्तदा ।
त्वन्नामस्मरणायत्तं चित्तं जन्तोः प्रजायते ॥
महेशनामामृतदिव्यधारापरिप्लुताङ्गोदरमध्यगोऽपि ।
न शोकमाप्नोति नरो यतो हंसरक्षितो वह्निगतः शिवेन ॥
यतो विभूतिकथ्याः शिवनामाश्रयाश्रयः ।
चत्वारो ह्यसुरानीकैश्चक्रुर्युद्धं पुरा मुदा ॥
ब्रह्महत्यासहस्राणि सम्यक्कृत्वापि पुक्कसः ।
शिवेति नाम विमलं श्रुत्वा मोक्षं गतः पुरा ॥
ये ते ऽपि प्रमथाः शुद्धाः शिवनामामृताशनाः ।
इन्द्राद्यर्चितपादाब्जा वसन्ति शिवसन्निधौ ॥
शिवनामैव संसारमहारोगौघशामकं ।
नान्यत्संसाररोगस्य शामकं दृश्यते मया ॥
शिव शङ्कर विश्वेश महादेवेति यन्मया ।
